यशोधरा महाकाव्यम्



– पं. ओगेटि परीक्षित् शर्मा

शा र दा - गौ र व - ग्र न्थ - मा ला, पु णे ३०

M. S. P. Sharma

Head of The

Sanskrit Deptt

Bharatiya Vidya

Bhawan

New Delhi

प्रकाशकः
पं. वसन्त अनन्त गाडगीळ
शारदा-गौरव-ग्रन्थ-माला
४२५ सदाशिव पेठ, पुण्यपत्तनम् ३०

प्राप्तिस्थलम् —
ओगेटि अच्युतरामशास्त्री, एम्. ए.
८-२-४६, प्रतापनगर, पंजगुट्टाकॉलनी
हैद्राबाद ५०० ००४

प्रकाशनम् —
गणेशचतुर्थी, २८ ऑगस्ट १९७६

मुखपृष्ठ-चित्रम् —
कलाकारः श्री. चलम्, मुम्बई

सर्वाधिकाराः स्वायत्ताः

Bhawan's Sri Sankaracharya ... Bharatiya Vidya Mahavidyalaya
556

मुद्रकः
पं. वसन्त अनन्त गाडगीळ
श्रीशारदा-मुद्रण-सिद्धि-मन्दिरम्
४२५ सदाशिव पेठ, पुण्यपत्तनम् ३०
यशवन्त-मुद्रणालयः
१८३५ सदाशिव पेठ, पुण्यपत्तनम् ३०

अङ्कितम्

यशोधरामहाकाव्यं पितृभ्यां दत्तमङ्कितम्
ऋतु-स्वर-रसाऽश्लिष्ट-विधावाङ्ग्लाब्द-भासुरे ।

शके वैशाख-पौर्णम्यां नायिका-ग्रह-सात्त्विके
मृगाङ्क-नल-वर्षस्य-प्रत्यूषे च सभक्तिकम् ॥

Foreward by Poet

Shri Vishvanatha Satyanarayana

Mr. Ogeti Parikshit Sharma has written a Kavya in Sanskrit by name 'Yashodhara'. The name itself suggests that it is a book on Gautama–Buddha, as 'Yashodhara' is the wife of Gautama. It may be said that it is to some extent a compilation of verses written at different times, giving it a form of a Kavya.

2. That even in these days people are writing Kavya in Sanskrit, proves the untruth of the saying that Sanskrit is a dead language. How can Sanskrit be a dead language ? Things which have life die, it means life left them. But Sanskrit is life itself. How can it die ? It never died, it does not die and it will not. It is tantamount to eternal life to expatiate upon this is out of place. Hundreds and hundreds of people are writing today in Sanskrit, Lord Krishna in Bhagavadgeeta proved that there is no death, it is an Avastha (अवस्था). Now coming to this present book 'Yashodhara' the author read out some portions to me, as I am old. I found the book is alright for the common reader. At some places particularly when 'Yashodhara' suffers from the bereavement of her lord, the Kavya is grand. It touches the heart.

3. He is not a simple scholar in Sanskrit and Telugu. He also knows the music, both Karnatic and Hindustani. He included the names of many Ragas in the descriptions of Yashodhara's and Gautama's peregrinations in the flower garden. Yashodhara sang in many tunes. She being a Royal child is but natural, she must have been tutored in music also. He closes the book with a fine touch, rather establishing the Bouddha Religion.

4. I wish him success in his life and also wish he writes more Kavyas in Sanskrit with a greater equipment and greater care.

Sd/–

V. Satyanarayana.
Kavisamrat, Poet Laureate, AP
16/3/76.

भू मि का

महत: प्रमोदस्यायमवसर-प्रसरो यदहं संस्कृत-भाषायां विरचितस्य 'यशोधरा'-नाम्नो महाकाव्यस्य प्रास्ताविक-रूपेण किमपि वक्तुं लब्धावसराऽस्मि ।

'पुराणमित्येव न साधु सर्वं नवीनमित्येव न चाप्यवद्यम् ।
सन्त: परीक्ष्यान्यतरद् भजन्ते मूढः पर-प्रत्यय-नेय-बुद्धिः ।।

—' इति महाकवि-कालिदासवचनान्यनुसृत्य 'शारदा-गौरव-ग्रन्थमालायाः सप्तत्रिंशत्तम-ग्रन्थाङ्करूपेण पं. **ओगेटि परिक्षिच्छर्मणः** सद्यःप्रकाशितायाः अस्याः रचनायाः विषये सांप्रतिक-संदर्भेषु सहानुभूति-पूर्णया दृष्टचा विचारः कर्तव्यः' इत्येव मनसि निर्णीय, स्वस्यां पात्रतायां संदिहानाऽपि सर्वतः प्रथमं महाकाव्यस्यास्य प्रणेतारं श्रीमन्तं परीक्षित्-शर्माणं प्रति साधुवादान् व्याहरामि ।

महात्मनो बुद्धस्य सुप्रसिद्धां परिनिष्क्रमणकथाम् आश्रित्य चिराद् उपेक्षितायाः यशोधरायाश्चरितं महाकाव्यस्यास्य विषयतां प्रापय्य कविनाऽनेन संस्कृत-साहित्यस्य महती श्रीवृद्धिः कृता । अत्र काव्ये सर्गाणां विंशत्यां क्रमश इष्टदेवतास्तुत्या समारभ्य प्राधान्येन हिमालय-रोहिणीनदी-कपिलवास्तुनगर-पुष्पलात्रिका - शुद्धोदनराज्यपालन - गौतम-कुमार - यशोधरा - यशोधरा - गौतमयोर्विवाहः, गौतमपट्टाभिषेक - वसन्त-वसन्तविहार-सूर्योदय-गौतमनगरसंदर्शन - सूर्यास्त - यशोधरासीमन्तोत्सव-चन्द्रोदय - यशोधरास्वप्न यशोधरा - प्रसव - महाभिनिष्क्रमण - यशोधरा-जागरण- गौतमसंन्यास-स्वीकरण-चन्द्रास्त - अन्तःपुरकोलाहल - महाप्रजा-वती - शोकनन्दविलाप-यशोधरा-सखी-संलाप - सखी - विजया - सान्त्वन-यशोधरा-परिताप-वियोगिनी-यशोधरा-यशोधराविलाप - श्वशुरोपलालन-सखी-सुमना - प्रसान्त्वन-यशोधरा - समाधान-वसन्त - ग्रीष्म - वर्षा - शरद् - हेमन्त - शिशिरर्तुघोषणा-राहुलशैशव-राहुलक्रीडा-यशोधरा - राहुलसंवाद-गौतमबुद्धप्रत्यागमन - रूप-वर्णनैः सुतरां समीचीनया पद्धत्या महाकाव्य-लक्षणोचितेन विषय-वस्तुना ललित-मधुर-पद-विन्यासैश्च काव्यात्मा प्रसादितः ।

संस्कृत-साहित्य-समवाये रामायणस्य तुलना प्रायस्तादृशेन महता पादपेन सह क्रियते यस्य शाखासु कवि-पतत्रिभिः स्वकीयानां काव्य-कुलायानां कलनाः कृताः । तादृश्येव च स्थितिर्बुद्धचरितस्य । जातककथा-विलोकानाद् एतत् स्पष्टं भवति । बहुभिः कविता-वितान-विरञ्चिभिः महात्मनो बुद्धस्य व्यक्तित्वं विषयीकृत्य नैके ग्रन्था विरचिताः । निर्वाण-प्राप्त्यर्थं भगवता बुद्धेन महाभिनिष्क्रमणं कृतम् । किन्तु तत्पत्न्या यशोधरायाः करुणामयी मूर्तिः समाजस्य संमुखं नागता ।

जनानां दुःखनिवारणाय बुद्धः प्रयतितवान् । यशोधरा यद्यपि स्वदुःख-भारेणैव खिन्न-खिन्नाऽऽसीत् किन्तु तस्याः त्यागस्यापि समादरस्तु कर्तव्य एव । अनया दृष्टया संस्कृत-कवीनां मौनतैव प्रतिभाति । हिन्दी-भाषायां राष्ट्रकवि-श्रीमैथिलीशरणगुप्तमहोदयैः 'साकेत'-नामकं महा-काव्यं रचितम् । तत्रोपेक्षिताया लक्ष्मणपत्न्या उर्मिलाया दशा इत्थं निरूपिता —

अबला जीवन हाय तुम्हारी यही कहानी,
आँचलमें है दूध आँखोंमें पानी ।

ईदृश्येव कथा गौतमबुद्ध-विरहिताया यशोधराया अप्यस्ति, अत एव तैरेव गुप्तमहोदयैरपि 'यशोधरा'-नामकं हिन्दीखण्डकाव्यं निर्मितम् । किन्तु संस्कृत-भाषायाम् इदं सर्वतःप्रथमं महाकाव्यं विद्यते । संप्रति संस्कृतभाषायां महाकाव्यानां रचना सुदुर्लभैव संजाता । अध्ययनस्य अथवा प्रेरणायाः प्रतिभायाः वाऽभाव एवात्र कारणं संलक्ष्यते । बहुषु सर्गेषु कृतीनां विभाजनस्य शास्त्रीयाऽनिवार्यताऽपि महाकाव्यानां निर्माणे बाधाम् उपस्थापयति । श्रीमता ओगेटिपरीक्षित्शर्मणा साम्प्रतिकस्य युगस्यावश्य-कताम् अनुभूय चिरादुपेक्षिताया यशोधरायाः प्रेरणा-प्रदं करुणारस-संभृतं कथानकम् आदृत्य महाकाव्य-विषयिणीं शास्त्रीयां प्रक्रियां च अङ्गीकृत्य महाकाव्यम् इदं विनिर्मितम् इति कस्य न सचेतसः प्रसादाय ?

महाकविर्भवभूतिरकथयत् 'एको रसः करुण एव ।' अन्ये रसास्तु तस्यैव भेदाः । करुणस्यैवैष प्रभावो यद् भवभूतेः शब्देषु —

'अपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम्' इति ।

अयमपि कविर्मनुते —

तन्मधुमयगीतं प्रथितं नूनं, यद्गाढं कथयति विषादभावम् ।
करुणारसभरितं मधुरं गीतं, स्वान्तं कुरुते विमलं सततम् ॥ इति ।

यथा मैथिलीशरणगुप्तानां नारीणां जीवन-विषये कारुण्यभावना वर्तते सैवात्र संस्कृतीभूय —

किमेतदाश्चर्यमहो धरित्र्यां, स्त्रीणां मनोवृत्तिरगम्य एव ।
पयोधर-क्षीरभृताः सुजीवाः, क्षणेन नेत्राञ्चल-साश्रुपाताः ॥
(स. प.–१०–११)

एवमेव ग्रावरोदनमपि कविः संस्कारवशादारभ्य कथयति —

रचयेयं तथा काव्यं करुणा-रस-निस्तुलम् ॥ (प्र. सं. ३४)

तथा —

यशोधरा-विलापं तु ग्रावारोदनकारणम् ॥ (प्र. सं. ३९)

महाकविः कालिदासोऽपि रघुवंशे कथयति —

"श्लोकत्वमापद्यत यस्य शोकः ।"

अर्थात् – वाल्मीकेः क्रौञ्च-वध-जन्यः शोक एव श्लोकत्वम् उपेत्य रामायणस्य रचनायां कारणतां संप्राप्त इति ।

परीक्षित्शर्माऽपि कथयति —

यशोधरी शोकमूर्तिः कलयन्ती स्वमानसम् ।
भेजे काव्यस्वरूपं तु ललितैः पदसंचयैः ॥

किं च सहृदयाः महाकाव्यमेतत् स्तुवन्ति वा निन्दन्ति वेति विषये कविरयं निश्चिन्तो वर्तते । यशोधरां प्रति तस्य मनसि या सहानुभूतिरासीत्, तस्या अभिव्यक्तय एव तेनेदं महाकाव्यं विनिर्मितम् । कथयति च —

निन्दन्तु केऽपि मे यत्नं, केचिन्नित्यं स्तुवन्तु वा ।
रचयामि नवं काव्यं, करुणाकलितात्मना ॥

अत एव दुराग्रह-ग्राह-दूषिताः भावाः अत्र सर्वथा न प्रविष्टाः ।

प्रसादस्य माधुर्यस्य च प्राचुर्यं सर्वत्र नरीनर्ति। वर्णनाशैली-शब्दशय्याऽलंकृति-योजना विषयानुरूप-वाक्प्रसारादयोऽप्यत्र समीचीना एव। गभीरा अपि विचाराः सरल-सरलायां भाषायां निबद्धाः प्रतीयन्ते । यथा —

अचेतनं चेतनमेति शून्यं, सर्वं प्रपञ्चे परिदृश्यमानम् ।
प्रयाति हा काल-विपर्ययेण, जीर्णं विशीर्णं मिलितं धरित्र्याम् ।।

एवं विहंगमदृष्ट्या स्थाली-पुलाकन्यायेन वा संक्षिप्त-समीक्षणेनाहं कवेः काव्यस्य च विषये बहु वक्तव्यं नेहे। साहित्यविमर्शकाः स्वयमेवास्यानन्देनात्मानं विनोद्य युक्तायुक्तं च विमृश्य नीर-क्षीर-विवेकितां प्रकटयिष्यन्तीति संचिन्त्य केवलमत्रैतदेव विनिवेदयामि यदस्य महाकाव्यस्य परिशीलने सोत्साहवद्भिः पाठकैर्भाव्यमिति ।

प्रान्ते कवये पं. ओगेटि परीक्षिच्छर्मणे स्वकीयानि प्रशस्तिवाक्यानि वर्धापनानि च समर्पयामि, तेषामस्य अभिनवप्रयासस्य सफलतायै, शारदा-गौरव-ग्रन्थमालायां महाकाव्यस्य प्रकाशन-सौविध्य-दानाय च तदधिक-सभाजन-वचांसि वितीर्य विरमामि पल्लवितेनेति ।

न. दिल्ली

डॉ. सरोजिनी महिषी
(संसत्सदस्या)

Foreward

It is indeed a pleasure to write a few words by way of introduction at the beginning of a Mahakavya in Sanskrit. The pre-requisite to this task is the sympathetic approach to the composition, and the capacity to analyse the different aspects in the proper context. I do not know to what extent I possess these; but I certainly appreciate the initiative and the efforts made by the poet Pandit Ogeti Parikshit Sharma, in depicting the age-old story of Buddha and Yashodhara in simple Sanskrit highlighting the role played by Yashodhara at the same time.

Ramayana is usually compared to a big tree where many birds in the form of poets have built their nests. So is the Buddhacharita. The Jataka stories provide ample proof for this also. Different aspects of Buddha's personality have been highlighted in the words by the scholars. Gautama Bnddha was to renunciate the worldly things to become Buddha, the Enlightened. Hence his wife Yashodhara's role seems to have been pushed in the background. She was pathos incarnate. Buddha took pity and shed tears for the suffering humanity. She shed tears for herself. But her reconciliation and sacrifice deserve appreciation.

Rarely do we come across the composition of a Mahakavya these days in Sanskrit. It may be due to lack of study, inspiration and scholarship in Sanskrit; or it may also be due to the obsolete nature of the descriptions etc. of the eighteen items, necessarily to find a place in Mahakavya. The poet Shri O. Parikshit Sharma has also tried to stick to these requisites even though he has said:

एतादृशं काव्यवस्तु केनाप्येवं न निर्मितम् ।

(I. 41)

Perhaps the poet is here referring to the selection of the theme. itself that is concentration on Yashodhara as the embodiment of pathos.

Maithili Sharan Gupta, a great poet in Hindi has written a Kavya by name 'Saketa' on the neglected characters of Ramayana wherein he depicts the role of Urmila, wife of Laxmana. The poet remarks herein :

अवला जीवन तेरी यह कहानी ।
आँचलमें है दूध, आँखोंमें है पानी ॥

evokes curiosity and comparison with the remarks of Shri Parikshit Sharma about Yashodhara :

किमेतदाश्चर्यमहो धरित्र्यां स्त्रीणां मनोवृत्तिरगम्य एव ।
पियोधरक्षीरभृताः सुजीवाः क्षणेन नेत्राञ्चल-साश्रुपाताः ॥

(X. 11)

What a strange thing on earth it is. It is really difficult to understand the minds of women! The blessed lives, holding milk in their breasts, immediately shed tears. The great Sanskrit poet Bhavabhuti said :

' – there is only one sentiment and that is of pathos. Rest of the sentiments are like VIBRYOL, shades of the same! The sentiment of pathos is capable of making the adament rock weep and the diamond melt.

अपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम् ।

The poet in this work Yashodhara, makes it clear in the beginning :

रचयेयं यथा काव्यं करुणारसनिस्तुलम् ।

and (I. 34)

यशोधरा - विलापं तु ग्रावारोदनकारकम् ।

(I. 38)

Kalidasa's words in Raghuvansha, "श्लोकत्वमापद्यत यस्य शोकः" Grief of Valmiki at the sight of the bird shot, got converted into poetry" seems to have inspired Shri Parikshit Sharma to remark :

याशोधरी शोकमूर्तिः कलयन्ती स्वमानसम् ।
भेजे काव्यस्वरूपं तु ललितैः पदसंचयैः ।।

(I. 40)

Whether the critics praise or censure, the poet says he does not care for that; overwhelmed by the sentiment of pathos for Yashodhara, he is determined to compose this Mahakavya on her :

निन्दन्तु केऽपि मे यत्नं केचिन्नित्यं स्तुवन्तु वा ।
रचयामि नवं काव्यं करुणाकलितात्मना ।।

(I. 39)

प्रसाद and माधुर्य ate amply exhibited in the Mahakavya. Even a very difficult idea on which the whole theme is based rather is expressed in a very lucid way:

अचेतनं चेतनमेति शून्यं सर्वं प्रपञ्चे परिदृश्यमानम् ।।

(VI. 22)

All that animate and inanimate which is seen in the world meets with destruction with the change of time. Minute observation by the poet is depicted at various places. In the Mahabhinishkramana (IX Canto), the King's pensive mood and anxiety are described in a graphic way :

न हि क्षणं तिष्ठति तप्तचित्तः न हि क्षणं पश्यति भिन्नचेताः ।
अशान्तभावैः ज्वलितो नरेन्द्रः प्रतिक्षणं स्थान–विपर्ययेण ।।

(IX. 9)

यशोधरापरिताप and वियोगिनी यशोधरा remind one of the अजविलाप in Raghuvansha of Kalidasa. Aja says :

कुसुमान्यपि गात्रसंगमात् प्रभवन्त्यायुरपोहितुं यदि ।
न भविष्यति हन्त साधनं किमिवान्यत् प्रहरिष्यतो विधेः ।।

Providence is censured as capable of making use of the tender flower for destruction.

Yashodhara says to Gautama, she doubts whether the hearts of kings are made of hard stone :

वद मे प्रिय विश्वभूषण विलपन्तीमनिशं समीक्ष्य माम् ।
न हि ते हृदयं विदीर्यते बत राज्ञां हृदयं शिलामयम् ।।

Absense of physical enjoyment does not necessarily mean and lead to spiritual achievement. This is the defence of Yashodhara, so lucidly put forth :

न हि दैहिकसौख्यहीनता परमार्थाय पदं भविष्यति ।

(XIII. 16)

So is her observation that 'Distance lends enchantment to the veiw' :

अतिदूरविराजितो नगः तरलो रम्यतरः प्रकाशते ।

(XIII. 26)

If the royal atmosphere, the palacial budilings and beautiful damsels are converted into voluntary renunciation in the case of Gautama Budhha, renunciation is imposed upon Yashodhara. She pines and laments for the same. Her character is graceful and dignified. Instead of pining and resigning to fate, she also could have risen to the occasion and glorified to path of enlightenment :

विधिना लिखितं यदस्ति मे ननु भोक्तव्यमवश्यमेव हि ।
न हि लाभ इहास्ति जल्पने प्रसमीक्षे भवितव्यतां धिया ।।

(XII. 53)

The figures of speech, Upama, Roopaka and Arthantaranyasa are almost strewn over the whole of the Kavya and indeed they add to the lucidity. To cite an example :

अदृष्टगीर्वाणविचित्ररेखा लिलेख बालः सितसैकतेषु ।
अदृष्टरेखा इव जीवितस्य न कोऽपि शक्तः पठितुं समीक्ष्य ।।

(XVIII. 24)

The boy wrote in the sands some strange lines. It was impossible for any one to read it. It was as difficult as the invisible line of Life.

The Mahakavya ends with the reunion of Gautama, the Buddha (Enlightened) and Yashodhara and Rahul as disciples.

Coming from the pen of Shri O. Parikshit Sharma who is उभय-भाषाप्रवीण, who has mastery over Sanskrit and also Telugu, Poetic composition has made progress from one canto to another with all grace, lucidity (प्रसाद) and the harmonious blend.

This work (composition) I hope would be able to inspire people to inculcate the love for the study of Sanskrit and poetry therein.

The composition is a welcome addition to the library of Sanskrit-loving people.

I congratulate Shri O. Parikshit Sharma for his achievement, and wish many more poetic compositions in Sanskrit would be to his credit in course of time !

Dr. Sarojini Mahishi

NEW DELHI. M. P.

Preface

I am glad to write this preface to the Sanskrit epic *Yaśodharā* by Pandit Ogeti Parikshit Sharma, who is known to me for quite a few years. Having trained himself in Sanskrit learning in the traditional way he chose to read for a University degree; and it was during the days of his post-graduate studies that I, as a teacher, came into contact with him. Pandit Ogeti is working at present as Telugu Expert in the Directorate of languages, a department of the Government of Maharashtra. The keen family traditions of Sanskrit learning and the two-way training have enriched the mind of Pandit Ogeti and strengthened his love and devotion for Sanskrit language. It is not surprising that Sanskrit poetry blossoms from his facile pen.

Pandit Ogeti has already earned a name for himself by his collection of lyrical songs, *Lalita-Gīta-Laharī* and endeared himself to his listeners by the delightful way he sings those Sanskrit songs. In this epic be has embarked on a more serious and sustained effort at poetic composition. The subject is from the life of Gautama Buddha, which has received its epic measure of treatment from the pen of Aśhvaghoṣa. But what the great classical poet did was to present the Buddha-carita, in which his wife Yaśodharā occupied but a small place. From a poetic point of view Yaśodharā is an *upekṣitā* like Sītā and Urmilā. It is to the credit of Pandit Ogeti that he focusses our attention on this neglected soul and reveals the lonely agony of a devoted wife, whose destiny lifted her to uncommon heights but plunged her also into an abyss of tragedy. The pathos in the life of a Superman's human wife is the governing sentiment of this epic (See, I. 37–40).

This epic of 20 cantos and of about 1070 verses carries the narrative from Śuddhodhana, the king of Kapilavastu, through the marriage of Gautama and Yaśodharā, their ravishing delights of married life, the birth of Rāhula, the renunciation of Gautama for *tapasyā*, the tragic sorrow of the royal household, till the final visit of Gautama after his enlightenment and the message of religious Faith that he brings. Although the details of the narrative are not to be missed, they have lesser importance in this poem, which is more an epic of emotion rather than an epic of narration. The tale is woven by descriptions : of places, mountain, river, seasons; of details of married life, and record of important happenings. These, in a way, form a framework for the picture of emotions, which is central to the author's intention. The emotion-torn mind of Gautama on the eve of his leaving the palace and his young sleeping wife and child, in the middle of the night, is convincingly presented (Canto IX). More central is the picture of grief-stricken Yaśodharā and the people who surround her, which is presented in nearly six cantos. This is a touching picture, though somewhat conventionally drawn, and the author's statement––

न कोऽपि शक्तः पठितुं धरण्यां कारुण्यभावाञ्चितरम्यकाव्यम् ।
विना रसार्द्रीकृतचित्तसद्म भाषां विजानन्नपि काव्यलोके ॥

(XVI. 30)

is not without reason. But the fact that the author did not allow the poem to lose itself in mere pathos and frustration is, to my mind, a striking feature of its construction. Yaśodharā emerging from her sorrow with a new awakening and courage, deriving comfort from the lovable pranks and prattle of her beloved Rāhula, and the visit of the Buddha which crowns her life with understanding and wisdom, are heartening touches which make sadness sweet.

The epic is composed on established lines. We have therefore the salutations at the opening, and an account of the family and personal life of the poet, followed by a description of Himālaya and the river Rohiṇī, before the thread of the epic narrative is taken in hand. The usual descriptions of the rise and setting of sun and moon, and of the seasons, have their full play. In the same way marriage, love-sports, pregnancy, birth of a child, its growing up and other details come to be described in the approved manner of epic composition. Inevitable as the descriptive mode is, it has fortunately escaped staleness and ostentatious conformity to form by two redeeming features. Pandit Ogeti is steeped in the poetry of classical poets. His own writing often echoes phrases and ideas from Sanskrit classical poetry. The description of Himālaya (Canto I) is full of allusions to the two epics of Kālidāsa. The day–to–day occupations of the separated Yaśodharā remind one of Kālidāsa's Yakṣapatnī (XIX.47–52), and to some extent of Bāṇa's Mahāśvetā. The play of Rāhula is reminiscent of Sarvadamana's sport (XIX. 31). And there are other such reminiscences (see, III. 16, IV. 7; V.20, XIV. 15, XV. 19 etc.). Such allusive mode of discriptions seems to add the charm of the old to the new writing. Further, the descriptions, though conventionally arranged, are free from imitation and verbosity. The author is himself a musician, and that has helped his descriptive style. The account of Vernal sport (Canto V) is interwoven with the technical names of musical melodies. The author chooses, with a touch of poetic propriety, the metre Viyoginī to paint the picture of the *viyoginī* Yaśodharā (Canto XIII), although most of the epic is written in Upajāti metre. The sense of music of words and of rhythm is a source of pleasure.

Occasionally, the author comes out with fresh ideas. Yaśodharā, for example, is described as solidified moonlight in a

sustained metaphor (III. 27); the young Gautama and Yaśodharā, entwined in love-sport appear as targets of द्वन्द्वार्थकाव्य and as समासशय्या (IV. 26); the sacred thread on the chest is imagined as the dividing line marking the torn heart of Gautama (IX. 3). Sometimes the author paraphrases well-known ideas (See, XIV. 48); but he introduces new ones also :

अतिदूरविराजितो नगः तरलो रम्यतरः प्रकाशते ।(XIII. 26)

is a Sanskrit rendering of an English saying. And,

जगति प्रथिता स्वतन्त्रता पुरुषाणां विषये न योषिताम् ।

(XIII. 35)

or स्त्रियं प्रपञ्चे पुरुषा विमन्वते विलासकेन्द्रं मधुपानपात्रम् ॥

(XV. 24)

are statements which a modern leader of women's liberty may very well make. The poet's eye moving in the old and the new worlds often brings a freshness of perspective.

The author's diction and style are mature and weighty without being heavy. He preserves the dignity of the Sanskrit language without sacrificing clarity. Conscious of poetry-writing, he does not strain after word-effect, rhetorical display or artificial construction. Occasionally he cannot resist a pun or an oxymoran (See, I. 110, II. 87, IV. 54, VIII. 34); and he seems to be fond of some words like यौवत, मतल्ली, बम्भर, शय, which are repeated. But he also writes sentences which in their simplicity and truth are irresistible :

सकालवर्षागमनप्रमोदात् दरिद्रभावो भजते दरिद्रताम् ।(II. 27)

विरागिणां नैव भवन्ति रागाः । (VI. 39)

It is indeed delightful to find that the pandit-type of training and overwhelming love for Sanskrit have not dulled Pandit Ogeti's eye to simple charm and his ear to the natural music of words. Some one may be tempted to pay him the same compliment which Yaśodharā has paid to the words of Gautama :

मधुरं सरसं रसात्मनां पदलालित्यमहो विनिर्मलम् । (XIII. 32)

I would be unfair to the reader if I were not to mention a few things which, however, do not harmonise with the structure of this poem. In the course of his composition the author alludes to Śakuntalā and Bhaimī (XII. 15, and XVI. 18–23) as a parallel to Yaśodharā's condition and as a source of consolation to her. I am not sure whether this is consistent with the times of Buddha. The author's references in the description of the seasons to mango and lime pickles (XVII. 9), gruel and buttermilk (XVII. 18) do not strike as contemporary allusions; they are comparatively modern, as is the idea of Yaśodharā humming a nasal melody to Rāhula (XVIII. 21). In the dialogue between mother and child (XIX. 23ff.), again, instead of allowing the child to speak in its natural way, the author seems to have appropriated its role; and that spoils the touching grief of a child's innocent utterances. But more jarring probably is the note of open sex that is introduced in the description of love-play between the young couple. It is true that the sorrow of Yaśodharā would gain an intensity on the background of her ecstatic love-life with Gautama before he deserted her. But even then there is no occasion to write like a modern writer on sex. On the contrary, the stature of Gautama and Yaśodharā demands a richly suggestive picture rather than verbal nakedness.

But, as I have said, the charm of Pandit Ogeti's poetry cannot be denied. The simplicity and sweetness of his diction, the natural music of his verse, and his ability for emotional delineation are sufficiently attractive. And he may look confidently ahead to winning new laurels in the garden of Sanskrit poetry.

Dr. G. K. Bhat
Director Postgraduate and Research Dept.
Bhandarkar Oriental Research Institute, POONA 4

A Word

As the body possesses life-force and physical mass, India has two national languages, namely Sanskrit and Hindi respectively. In India each regional language has got its own State for its provenance and recognition. But for the Sanskrit Language, which is the mother of our Indian culture and which embraces every regional culture of India, there is no limit or circumscribed area as such; it exists everywhere, in all the languages, like Almighty existing in molecules. It gives ever green life to the linguistic world, as the Sun gives life to the physical world. This fact is known fully well only to the highly learned and discerning thinkers. This language has a lustrous and wholesome growth which is seen through the grammar and etymology of Indian languages and all their branches of literature. No tongue can alter this fact, and no intellectual or linguist will ever deny it.

I thought that if in my life I contributed anything at all to literature, that should be only through the Sanskrit language. Any contribution to the ocean-like Sanskrit language is only a drop added to it. But it is a matter of self-satisfaction that I have had the privilege to coutribute my mite to the language, which is our legacy.

In physical calamities as the wind disturbs only the surface of the still water so all revolutions and invasions disturbed the surface of the culture and the growth of Sanskrit language, but not the foundation of those that had already been rooted firmly into the hearts of the people.

On account of the cultured parentage and accumulated patriotism, I had studied with nurtured feelings Sanskrit and Telugu with dedication and love towards the languages, in oriental schools under able teachers like –

Sarvashree 1. CHALLA SATYA NARAYANA SASTRI.

2. PARASHARAM KRISHNAMACARI

at Shree Bhavanarayana Swamy Sanskrit Pathashala, PONNUR, Guntur Dist., ANDHRA PRADESH; and

3. K. V. N. APPARAO

4. (Late) VEDULA RAMASASTRI

at Andhra Geervana Vidyapeetham, KOVVUR, West Godavari Dist., ANDHRA PRADESH.

As I was memorising some of the cantos and acts of the Kāvyas and Nāṭakas, I used to compose verses on the spot on given topics in my student career. With perseverance and study of the rhetoric treatises. I obtained a little poetic impetus in my boyhood itself. I have a musical ear too as an inborn gift. So that I devoted some time for learing vocal music also. The classical poetry and music are being intertwined in my aesthetic education and they have forced me to compose something only in the classical language.

When on the northern borders of our country Chinese aggression had taken place, in the year 1962, with bursting emotion I composed some twenty stanzas on the Himālayas. All those twenty stanzas were published in one of the famous weeklies of Andhra Pradesh. Then some of my friends wrote letters to me urging that "One Mahākāvya should come to light from the poetic pen, in no time". Bearing their good wishes in my mind, I studied some more treatises in Sanskrit and also casually Buddha Charitam of Aśvaghoṣa. In the poetry of Aśvaghoṣa I did not find any characterisation of Yaśodharā, the wife of Buddha. Then I felt the urge to compose something on the neglected character of Yaśodharā. When I was working as a Teulgu and Sanskrit Pandit at Bombay in Andhra Education

Society High School, in the year 1956, I composed in Sanskrit some 15 stanzas about the lamentation of Yaśodharā.

At that time, with the encourgement of the then principal Smt. K. V. Seshachar, all those stanzas were presented by our school girls as a dance ballet at the time of the school anniversary day.

The choreography and direction were provided by me and all those poems were rendered by me and one of my colleagues, Smt. Kameswari Sarma, in different rāgas. I served the Andhra Education Society High School as a Telugu and Sanskrit Pandit for about 17 years from 1956 to 1972.

Then, I composed Lalita Geeta Lahari, a collection of Lyrical Poems in Sanskrit. All those lyrics were published in a Sanskrit Weekly named GANDEEVAM at Banaras in the year 1964. The Editor of the weekly magazine was Pandit Ramabalak Sastri. All lyrics were published in a booklet form by Pt. Vasantrao Gadgil in the year 1968. The lyrical poems were rendered by me in most of the colleges of Bombay and at All India Radio, Bombay. When I found that my songs were very well received by the public, I started work on the Yaśodharā Mahākāvya with enthusiasm and zeal in the year 1970. But due to some difficulties I could not publish the same immediately. Now in spite of the hindrances, I have done this venture and I am offering this composition to the learned and poetic world. Unless and until, the readers of high calibre are satisfied, I cannot know how far I have succeeded in my endeavour. My only pleasure is in contributing my humble mite to the rich Sanskrit language.

I hope that my poetry answers Ānandavardhana's expectaon:

दृष्टपूर्वा अपि ह्यर्थाः काव्ये रसपरिग्रहात् ।
सर्वे नवा इवाभान्ति मधुमास इव द्रुमाः ।।(ध्वन्यालोकः)

I am grateful to every individual who devoted their valuable time to write their opinions about this Mahākāvya.

I am thankful to Mr. T. Chalam who was my student and who is at present working as an artist in Polydor at Bombay, for the beautiful cover page illustration which has made the book more attractive. I also extend my thanks to Pandit Vasantarao Gadgil who printed and brought out the Mahākāvya in time, into the light, making corrections and giving suggestions.

गुणाः प्रमाणं न दिशां विभागः ।

Directorate of Languages
Divisional, Office
New Central Building, Pune–1

Ogeti Parikshit Sarma
Language Officer (Telugu)

विषयानुक्रमणिका

प्रथमः सर्गः (३-१६)

इष्टदेवतास्तुतिः

कविस्तुतिः

भारतभारती

कविविज्ञापना

कविवंशपरिचयः

हिमालय-वर्णनम्

रोहिणीनदी-वर्णनम्

द्वितीयः सर्गः (१७-२७)

कपिलवास्तु-नगर-वर्णनम्

पुष्प-लाविका-वर्णनम्

शुद्धोदन-राज्यपालनम्

गौतम-कुमार-वर्णनम्

तृतीयः सर्गः (२८-३१)

यशोधरा-वर्णनम्

चतुर्थः सर्गः (३२-३८)

यशोधरा-गौतमयोः विवाहः

गौतमपट्टाभिषेकः

वसन्त-वर्णनम्

पञ्चमः सर्गः (३९-४६)

वसन्तविहारः

षष्ठः सर्गः (४७-५२)

सूर्योदय-वर्णनम्

गौतमनगर-संदर्शनम्

सूर्यास्तमय-वर्णनम्

सप्तमः सर्गः (५३-५८)

यशोधरा-सीमन्तोत्सवः

चन्द्रोदय-वर्णनम्

यशोधरास्वप्नः

अष्टमः सर्गः (५९-६२)

यशोधराप्रसवः

नवमः सर्गः (६३-६७)

महाभिनिष्क्रमणम्

दशमः सर्गः (६८-७३)

यशोधरा-जागरणम्

गौतमसंन्यासस्वीकरणम्

चन्द्रास्तमय-वर्णनम्

एकादशः सर्गः (७४-७८)
अन्तःपुर-कोलाहलः
महाप्रजावती-शोकः
नन्द-विलापः

द्वादशः सर्गः (७९-८३)
यशोधरा-सखी-संलापः
सखी-विजया-सान्त्वनम्
यशोधरा-परितापः

त्रयोदशः सर्गः (८४-८९)
वियोगिनी यशोधरा

चतुर्दशः सर्गः (९०-९५)
यशोधरा-विलापः

पञ्चदशः सर्गः (९६-९९)
श्वशुरोपलालनम्
सखी-सुमना-सान्त्वनम्

षोडशः सर्गः (१००-१०३)
यशोधरा-समाधानम्

सप्तदशः सर्गः (१०४-१०९)
ऋतुघोषणा ... वसन्तर्तुः,
गीष्मर्तुः
वर्षर्तुः
शरदृतुः,
हेमन्तर्तुः
शिशिरर्तुः

अष्टादशः सर्गः (११०-११५)
राहुल-शैशव-वर्णनम्
राहुल-क्रीडा-वर्णनम्

एकोनविंशतिः सर्गः (११६-१२३)
यशोधरा-राहुल-संवादः

विंशतिः सर्गः (१२४-१२८)
गौतमबुद्ध-प्रत्यागमनम्

ॐ

यशोधरा-महाकाव्यम् ।

तन्मधुमयगीतं प्रथितं नूनम्
यद् गाढं कथयति विषाद-भावम् ।
करुणा-रस-भरितं मधुरं गीतम्
स्वान्तं कुरुते विमलं सततम् ॥

BHARATIYA VIDYA BHAVAN
Kasturba Gandhi Marg
New Delhi-1.

प्रथमः सर्गः ।

इष्ट-देवता-स्तुतिः ।

श्रीविघ्नराजो विहसन् प्रदद्यात्
धृत्वा मुखे शाश्वत-सौख्य-चक्रम् ।
पीठोपरि-न्यस्त-सुदर्शनाख्यम्
दृष्ट्वाच्युतं चक्रकृते भ्रमन्तम् ।। १

ॐकार-वर्णाञ्चित-कण्ठ-हारा
विहारिणी दिव्य-हृदन्तराले ।
सदा कवीनां सुरभि-प्रदाने
विरिञ्चि-पत्नी रमतां धरण्याम् ।। २

प्रसन्न-सप्ताचल-शान्त-मुद्रया
विलोल-नेत्राञ्चल-सौम्य-वीक्षणैः ।
विशालमेनं सकलं चराचरम्
विभुः प्रदद्यात् परिपालयन् सुखम् ।। ३

प्रसिच्य चन्द्रांशु-विशुद्ध-गाङ्गैः
जलैश्च तामुत्पल-चारुनेत्रीम् ।
शिवः सदा लास्य-विमूर्च्छिताङ्गीम्
उमां विचुम्बन् शिवमातनोतु ।। ४

दशावतारेषु विकथ्यमानं
प्रेम्णा प्रजाभूतहितैषिणं तम् ।
दयार्द्र-चित्तं नवमं महान्तं
भजे हृदा गौतम-बुद्ध-देवम् ।। ५

कवि-स्तुतिः ।

प्रथमं स्तौमि गैर्वाण्यां राजमान-कवीश्वरान् ।
पण्डितान् मे गुरून् चैव प्राप्तुं दिव्याशिषः सदा ।। ६

प्रपञ्चे व्यापृतां देवीं सर्वशुक्लां सरस्वतीम् ।
ब्राह्मीं वेद-पुनीताभां नौमि तां भारतीं सदा ।। ७

प्राचेतसं समाधाय रामायण-महाकविम् ।
आद्यं सर्वकवीनां च पवित्रे मम चेतसि ।। ८

पाराशरमुनिं नित्यम् अश्वघोषं-महाकविम् ।
कवि-प्रभुं कालिदासं भवभूतिं सदा हृदि ।। ९

मुनित्रयं समभ्यर्च्य महावाङमय-मूलकम् ।
यथाशक्ति करिष्यामि काव्यमेतद् विनूतनम् ।। १०

विश्वनाथेति वंशीयं सत्यनारायणाख्यकम् ।
संस्कृतान्ध्राभिसंम्राजम् आन्ध्रास्थान-कवीश्वरम् ।। ११

निरुक्त-भारती-ग्रन्थ-कर्तारं वेदपाठकम् ।
संस्कृत-ज्ञान-दातारं सक्रम-क्रम-शिक्षकम् ।। १२

सत्यनारायणं पूज्यं मनसा चल्लवंशजम् ।
प्रणमामि सदा भक्त्या गुरुं मे ज्ञानदायिनम् ।। १३

संस्कृतान्ध्राभिनिष्णातं संस्काराद्वृतशीलिनम् ।
भू-ज्ञान-यज्ञ-होतारम् अप्परायगुरुं हृदि ।। १४

वेदुलान्वयसंभूतं संस्कृतान्ध्रप्रबोधकम् ।
उद्दण्डपण्डितं नित्यं वन्देऽहं रामशास्त्रिणम् ।। १५

चिल्कूरि-वंश-धिषणं निराडम्बरजीविनम् ।
शास्त्रिणं राममूर्ति च वन्दे पातञ्जलाकृतिम् ।। १६

अन्यान् सर्वकवीन्द्रांश्च प्रार्थये काम्यसिद्धये ।
पवित्रां चेतनां नित्यं वन्दे गुरु-परंपराम् ।। १७

भारत-भारती ।

पूर्वजन्मकृतं पुण्यं सत्यमस्मिन् युगे मम ।
संस्कृत-ज्ञान-रूपेण फलितं काव्य-भूमिजे ।। १८

प्राग्जन्म-संचितं ज्ञानं देवभाषाभिभूषिता ।
यशोधरा काव्यरूपं भ्राजते प्राप्य भूतले ।। १९

न काऽपि तुल्या देशेऽस्मिन् भाषा चान्यार्थ-वैभवे ।
दिव्यत्वे शब्दसृष्ट्यां च पुष्टा गीर्वाण-भाषया ।। २०

जीवने मधुरा वाणी श्वासे माधुर्य-सौरभा ।
पवित्रे भारते देशे शाश्वता भव्य-भारती ।। २१

या वाणी भारते राष्ट्रे विरेजे रम्य-भावना ।
सा ब्राह्मी पूर्व-रूपं तु लब्ध्वा लास्यतु मे भुवि ।। २२

प्रान्तीय-भाषाः सर्वाऽपि प्रान्तीयानां भवन्त्यहो ।
किन्तु गीर्वाण-भाषा तु सर्वदा लोकभारती ।। २३

सुगमं सुन्दरं काव्यं ग्रथितुं प्रयते सदा ।
संस्कृत-ज्ञान-हीनानां यथा काम्यं भविष्यति ।। २४

विना गीर्वाण-संपर्कं देश-भाषाः कलेवराः ।
पुष्टा गीर्वाण-भारत्या भान्ति नित्यं सुवासिताः ॥ २५

भारतीयान्तरात्मानं बद्धुं वेदान्त-तन्तुभिः ।
विना गीर्वाण-वाणीं च नान्यदस्तीति मे मतिः ॥ २६

भारती भामिनी कुर्यात् देशमेनं कलामयम् ।
सर्व-मानव-चित्तानि समैक्यं च यथा भवेत् ॥ २७

जन्म-जन्मनि गीर्वाणी भारती मेऽस्तु भारती ।
यद्यहं मानवो भूत्वा जीवेयं भारतावनौ ॥ २८

नमस्तस्यै सरस्वत्यै या प्रजाः संपुनाति च ।
लोके परे सौख्यदा या वाङ्मये सुप्रतिष्ठिता ॥ २९

पूर्वजाः शाश्वतं स्थानं सत्यं प्राप्ताः कवीश्वराः ।
गैर्वाणी-सेवया लोके प्राप्तुं चेदं समीहते ॥ ३०

कवि-विज्ञापना ।

यशोधरा-महाकाव्यं चिकीर्षुः चित्रशोभितम् ।
रसभावादि-शब्दार्थैः सरसानन्द-दायकम् ॥ ३१

अश्वघोषं प्रियं नौमि कवीन्द्रं बौद्ध-दर्शकम् ।
बुद्ध-काव्य-प्रणेतारं शब्दार्थार्थिक-भासुरम् ॥ ३२

अल्पज्ञोऽहं क्रान्तदर्शी ब्राह्मी-पूजन-तत्परः ।
रसार्द्र-हृदयं मेऽस्ति रसः काव्यान्तरे यथा ॥ ३३

रचयेयं तथा काव्यं करुणारस-निस्तुलम् ।
यथा गीर्वाण-भाषायां प्रथितं शाश्वतं भवेत् ॥ ३४

पूर्वं मया प्रणीतं च गेयकाव्यं सुधामयम् ।
लालित्य-गीत-संकीर्णं राग-ताल-समन्वितम् ॥ ३५

वस्तुनैव विना भाति लावण्येन महीतले ।
तस्माल्लावण्य-संमग्नं वस्त्विदं संतरामि च ॥ ३६

अश्वघोष-प्रणीते च काव्ये नैवं विलोकिता ।
यशोधरा-बुद्ध-पत्नी प्रामुख्येन मनस्विनी ॥ ३७

महाद्भुतं सुबुद्धस्य चरितं वर्णयामि च ।
यशोधरा-विलापं तु ग्रावारोदन-कारकम् ॥ ३८

निन्दन्तु केऽपि मे यत्नम् केचिन्नित्यं स्तुवन्तु वा ।
रचयामि नवं काव्यं करुणा-कलितात्मना ॥ ३९

यशोधरी शोकमूर्तिः कलयन्ती स्वमानसम् ।
भेजे काव्यस्वरूपं तु ललितैः पद-संचयैः ॥ ४०

एतादृशं काव्यवस्तु केनाप्येवं न निर्मितम् ।
प्रस्तुतं देवभाषायां विरचेयं मुदा कृतौ ॥ ४१

बौद्ध-शाखा परा नास्ति किं तु हिन्दु-महीरुहे ।
पुष्पिता फलिता भाति दिव्यशाखाभिभूषिते ॥ ४२

आर्ष-सागर-वेदान्ते सर्वा वेदान्त-वारिणः ।
विनैव नामरूपाणि भङ्गमग्ना भवन्ति च ॥ ४३

एकत्वे भिन्नरूपत्वं भिन्ने चैकत्व-भासनम् ।
समग्र-वेद-तत्त्वस्य जनस्य परमं मतम् ॥ ४४

याशोधरी या व्रततिः चित्रिता भुवि राजतु ।
करुणा-रस-संपुष्टा भावपुष्पैः सुवासितैः ॥ ४५

यशोधरायाः शोकश्च शरच्चन्द्र-प्रसन्नता ।
गीर्वाण-भारती नित्यं प्रजामोदं प्रयच्छतु ॥ ४६

कवि-वंश-परिचयः ।

ओगेटि-वंशे कौण्डिन्ये चासीद् वेलनाडु-वैदिके ।
याजुषी-कृष्ण-शाखायां किष्टय्येति पितामहः ॥ ४७

ओगेटि-वंशजाः सान्तम् अद्वैता-मृत-पायिनः ।
नास्ति शाखान्तर-द्वेषो वेदान्ते भारतावनौ ॥ ४८

पितामहस्तु शान्तात्मा कृषिकोद्योग-तत्परः ।
कनिष्ठो तस्य पुत्रेषु साम्बमूर्त्यस्ति मे पिता ॥ ४९

कौसल्या जननी पुत्रान् सुषुवे सद्-गुणान्वितान् ।
तेषु पुत्रेषु मे भ्राता बलवान् अग्रजः सुधीः ॥ ५०

मे पिता भारतीयात्मा बाल्ये चास्मानपाठयत् ।
संस्कृतं स्मार्त-भागं च मौञ्जी-धारण-सुव्रतान् ॥ ५१

वैभवं भाग्य-संपत्ति न कदाप्यभ्यकाङ्क्षत ।
यदृच्छा-लाभ-संतुष्टो जीवितं यापयन् असौ ॥ ५२

असौ नित्यं हि मौनीनां मार्गे भव्यं स्वजीवनम् ।
यापयन् अस्ति धर्मात्मा लोकेऽलौकिक-जीवनः ॥ ५३

आर्षत्वं काङक्षते नित्यम् आर्ष-देशीय-जीवनम् ।
आर्षत्वं घोषयामास मनो-वाक्-काय-कर्मणा ॥ ५४

स्वयं संस्थापमास आर्ष-धर्म-सनातनीम् ।
बालिका-पाठशालां च प्राच्य-धर्म-प्रबोधकः ॥ ५५

"हिन्दू-मताभिधानं च" पुस्तकं व्यरचि प्रियम् ।
अनेन पितृपादेन नित्य-सेवा-मनीषिणा ॥ ५६

आबाल्यं संघसेवां तु विधास्यन् कर्म-जीवनः ।
शुद्धि-प्रचारकाख्येन घोषयामास संस्कृतिम् ॥ ५७

माता दिवं गता पूर्वम् अस्मान् सर्वान् विहाय च ।
अग्रजो हनुमच्छास्त्री पञ्चत्वं प्राप यौवने ॥ ५८

अध्यसीष्ठाग्रजः स्मार्तं संस्कृतं शैशवे मुदा ।
बहुधा-कर्म-शीलश्च हिन्दी-भाषाभिभूषितः ॥ ५९

यशोधरा-काव्यकर्ता परीक्षिन्नाम-भूषितः ।
ज्येष्ठोऽभूद् दैवयोगेन कला-माधुर्य-लोलुपः ॥ ६०

ललितं गीत-काव्यं यल्लहरी-शब्द-संयुतम् ।
गायन् सर्व-जनामोदं भजते सुर-भारतीम् ॥ ६१

आन्ध्र-देशे विराजन्त्यां गर्तपुर्यां सुमण्डले ।
स्वर्णपुर्यां प्रसिद्धायां भावनारायणालये ॥ ६२

शैशवेऽभ्यस्तवान् कामं सप्तवर्षाणि संस्कृतम् ।
सत्यनारायणस्यान्ते गुरोर्गीर्वाण-शास्त्रिणः ॥ ६३

पश्चाद्-गोदावरी-तीरे सान्ध्र-गीर्वाण-मन्दिरे ।
गोपाद-क्षेत्र-संपन्ने चाप्परायस्य सन्निधौ ॥ ६४

अधीतोऽस्ति दृढं तत्त्वम् आन्ध्र-गीर्वाण-भाषयोः ।
गुरूणां तत्त्व-वेत्तॄणाम् उपदेशेन दीपितः ॥ ६५

अनुजः पण्डितश्चैव व्यवहारेषु कौशलः ।
वक्ता धारण-शीलोऽयम् अच्युताख्याभिसञ्जितः ॥ ६६

कर्म-शीलश्च मेधावी देश-भक्तः सदाश्रयः ।
आदर्श-जीवनासक्तः संस्कृतान्ध्राभिभूषितः ॥ ६७

देव-भाषा-प्रचाराय नाटचरूपेण जीवितम् ।
मुदाङ्कितं विधायासौ मनुते धन्यमात्मनि ॥ ६८

पूर्वजाः शक्ति-संपन्नाः भक्ति-भावैः समंचिताः ।
कस्यापि हानिं नाकुर्वन् वेदान्ते भव्य-चिन्तनाः ॥ ६९

एवम् ओगेटि-वंशोऽयं ख्यातः सर्वासु-दिक्षु च ।
पूत-संस्कार-भारत्या तृप्ताः सर्वेऽपि पूर्वजाः ॥ ७०

हिमालय-वर्णनम् ।

कुबेरगुप्तां दिशमावसन्सदा हिमालयो भारतदेशकीर्तिदः ।
विराजते शान्तिपथं प्रघोषयन् प्रपञ्चकल्याणसुखाय केवलम् ॥ ७१

हिमाचलं सर्व-धराधरोन्नतं प्रियं स्वकीयं प्रबलेन बर्बराः ।
छलेन कर्तुं सततं विमन्वते कथं स लभ्यो बहुपुण्यसञ्चयः ॥ ७२

तत्पर्वताग्रे बहुधा प्रवेष्टुं धराधरारोहणसिद्ध-हस्तैः ।
कृतप्रयत्नोऽपि न कोऽत्र सिद्धो विवेश मित्रैः सह भारतीयः ॥ ७३

अवाप शुभ्रैः तपसां समुच्चयैः महोन्नतस्थानमनन्त-गौरवम् ।
सतां मुनीनां चरितैः सुपावनैः कथं स लभ्यो बहु-धर्म-संचयः ॥ ७४

विरोचतां लोकहिताय जीवनं प्रवाहयत्येवमहर्निशं भृशम् ।
स्थलायते किन्नरसिद्धयोगिनां किरीटरूपेण हिमाचलः परम् ॥ ७५

यस्मिन् हिमाद्रौ गिरिजागिरीशौ ननर्ततुः सायममन्दनाट्यैः ।
शिवोऽपि यत्रैव तपश्चचार बाभातु सोऽयं मकुटायमानः ॥ ७६

यत्रैव रेमे गिरिराजबाला सखीजनैः सा हिमकन्दुकैश्च ।
प्रशीतलेष्वच्छहिमांशुभास्सु हिमाद्रि-सीमा सततं विभातु ॥ ७७

गौरीतपोवह्नितते: प्रभाभिः शिलामयं स्वं हृदयं द्रवित्वा ।
ततान देशे रसरूपमेत्य विभातु सोऽयं हिमवान् महिम्ना ॥ ७८

यस्मान्महीध्रात्परमेश्वरोऽपि स्वर्वाहिनीं तां नितरां निबध्य ।
स्वकीयरम्ये विपुले कपर्दे प्रवाहयत्येवमयं चकास्तु ॥ ७९

महेश्वरः सृष्टिलयानुकारी विलोक्य रम्यां प्रकृतिं प्रशान्ताम् ।
सदैव कैलासममुं चकाङ्क्षे हिमाचलस्याच्छ-पवित्र-धाम ।। ८०

उमा तपोभिः सततं विचिक्रिये विनिन्द्य रूपं नगराज-पुत्रिका ।
तपस्विनं यत्र बटुं पिनाकिनं विराजतां शुभ्र-तुषार-भूधरः ।। ८१

समागतं येन हिमाचलेन दिगन्त-विश्रान्त-वरिष्ठ-नाम ।
अद्वैत-भावेन विराजतां तावौन्नत्यमेतद्विहितं च येन ।। ८२

यस्मात् समस्ता च परंपरा मे संस्कार-रूपेण पवित्र-देशम् ।
समागता सा रस-वाहिनीभिः चकास्तु सोऽयं हिमवान् महिम्ना ।। ८३

यस्मिन् नगेन्द्रे शिवताण्डवाद्यत् विनिर्गतं पावन-नाट्य-शास्त्रम् ।
ढक्का-निनादात् शिवसूत्र-जालं धरा-धरेन्द्रः सततं विभातु ।। ८४

युगान्तकालेऽपि महाप्रभावितो यथास्थितिं भारतदेश-रक्षणे ।
महीतले संस्कृति-घोषणे रतो जेगीयतां भारत-भूधराधिपः ।। ८५

हिमालयः प्राकृत-दिव्य-रूपः प्राकारवद्रक्षति भव्यदेशम् ।
सजैत्रयात्राहत-पुण्यभूमिः सा भूदितीवासकलं ततान ।। ८६

तनूनपाद्यत्र मुमोह काङ्क्षया विलोक्य सप्तर्षि-सती-मतल्लिकाः ।
स्मरोऽपि फालेक्षण-भस्मसात्कृतो भृशं सदा राजतु शैल-पुङ्गवः ।। ८७

यत्रैव सूतोवरमौनिसंघं पुराणत-स्वार्थचयं शशास ।
यस्मिन्नगेन्द्रे बदरी चकास्ति सोऽयं युगान्तेऽपि परं विभातु ।। ८८

प्रालेयमूर्तिः यदि नास्ति भूतले नास्त्येव लोके मिहिकालयालयः ।
जायेत यद्येवमियं विपन्नता नैवास्ति सृष्टिः खलु विश्वकर्मणः ।। ८९

अनन्त-कालात्त-पवित्र-मूर्तिः समस्त-विज्ञान-समात्त-मूर्तिः ।
प्रसान्द्रहेमावृत-शुभ्रमूर्तिः विराजतां भारत-देश-मूर्तिः ॥ ९०

भगीरथो नाम जटी नरेन्द्रो वर्षाण्यनेकानि तपः चचार ।
यत्रैव गङ्गा-हरणार्थमेव प्रालेयमूर्तिः सततं विभातु ॥ ९१

वरूथिनी प्रेममयाच्च बन्धनात् लतान्तगेहे प्रवराख्य-भूसुरः ।
अवाप गार्हस्त्यभयेन मोचनं चकास्तु सोऽयं नगराजमूर्तिमान् ॥ ९२

कृष्णार्जुनौ चक्रतुरेव यत्र तपः प्रभूतं बदरीवने तौ ।
सोऽयं पवित्रीकृत-दिव्य-देहो विभासतां भारत-देशरूपी ॥ ९३

षाण्मातुरं यत्र शिवस्य पुत्रं गङ्गाजले दर्भ-पवित्र-देशे ।
ताः कृत्तिकागत्य पुपोषुरेनं सोऽयं नगेन्द्रो नितरां विभातु ॥ ९४

राजा दिलीपो गिरिगह्वरेषु सन्तानकाङ्क्षी सुरधेनु-पुत्रीम् ।
आनर्च पत्नी-सहितः सकामं तुषार-सीमा-निभृतं चकास्तु ॥ ९५

अरुन्धती दिव्य-पदार्द्रताभ्यां यः शीतलाद्रिः प्रबलं बभासे ।
मुनेः वशिष्ठस्य निदानभूतो जेगीयतां ज्ञानमयं धरेन्द्रः ॥ ९६

दिदृक्षया सर्व-दिगन्तमस्मिन् महीतले भारतराष्ट्र-शीर्षे ।
विलङ्घितं शब्द-गुणान्तरिक्षं दिने दिने सं ववृधे हिमाद्रिः ॥ ९७

एतादृशं दिव्य-चरित्र-भूमिं कुत्राप्यलब्धो हिमशैलमूर्तिः ।
दृष्ट्वा पवित्रं नुत-भारताख्यं दोर्भ्यां प्रगाढं मुदमालिलिङ्ग ॥ ९८

अचञ्चलोऽयं भुवि पर्वतेषु सनातनोऽयं बहुकालदर्शी ।
अनन्य-सत्त्वाख्य-गुणान्वितोऽयं विरागचित्तोऽपि रस-प्रपूर्णः ॥ ९९

हिमालयोऽयं स्वदुहितृवर्गं प्रदाय शान्त्या च महार्णवाय ।
विराग-भावो तपसा पुनीतो प्रकाशते ब्रह्ममयंन दीप्त्या ॥ १००

रोहिणी-नदी-वर्णनम्।

उपत्यकायां वररोहिणी नदी तन्निम्नया प्रोषित-भर्तृका सती।
विना धवेनाकृत-शान्त-वाहिनी विचिन्तयन्तीव चकास्ति गामिनी॥ १०१

सा रोहिणी पर्वत-मस्तकेषु परिभ्रमन्ती नगसानुदेशम्।
तपस्यतो धूर्जटि-मौलि-शीर्णा भिया विवेशासित-नागिनीव॥ १०२

तरङ्गिणी फेनिलहासिनी सा तथा पवित्रा लसते नगेन्द्रे।
यथा गिरीशस्य सुवामभागे "यज्ञोपवीतं परमं पवित्रम्"॥ १०३

यवीयसीं तामबलां सुरोहिणीं नियुक्तवान् किं निकटे हिमाचलः।
प्रदाय कन्याः सकला च सिन्धवे सदैव खिन्ना वहतीह रोहिणी॥ १०४

तरङ्ग-भावाञ्चित-चारु-विभ्रमा रसप्रसन्नेन प्रवाहिनी सती।
तन्निम्नया दर्शितखिन्न-जीवना प्रदक्षिणं सा कुरुते हिमालयम्॥ १०५

आशैशवात् तत्र विलासवत्यः स्नानेन तस्यां गिरिजा स्रवन्त्याम्।
अजस्र-संभावित-मीननेत्राः संरेजिरे मीनसमूहवीक्षणात्॥ १०६

अशिक्षयद्भावमनन्त-विभ्रमं स्रवन्तिका तत्र विलासिनी जनम्।
ततो-नगर्यां मदमत्त-योषितो विच्छित्ति-माधुर्य-विलास-मण्डिताः॥ १०७

. . . . .

सा वाहिनी फेनिल-हास-रम्या भ्रू-भङ्ग-संभूत-विकार-भावैः।
सर्वं जनं मोहमयं विधाय प्रकाशते लास्य-विशारदेव॥ १०८

तत्रैव नार्यः स्तनमण्डलानि कस्तूरिका-सङ्कु-मदाञ्चितानि।
प्रक्षाल्य कामं मधुजीवितं तत् प्रकुर्वते पङ्किलमेव नित्यम्॥ १०९

प्रदोषकालेषु जले मुनीनां काषाय-वर्णाम्बर-धावनेन।
सा रोहिणीराग-जलेन पूर्णा दिने दिने भाति विरागिणीव॥ ११०

तरङ्गिणी मञ्जुलवारिगामिनी हिमाचले मेदुरयान-शोभिनी ।
प्रतिक्षणं भासित-लोल-जीवना विराजते व्याकुल-जीवितेव सा ॥ १११

सदाविहङ्गैः बहुधाविसर्पिणी सदाश्रया जन्तुततेः सुवाहिनी ।
न चान्वभूत् शान्ति-सुखान्त-जीवनं प्रजानुरागेण विवर्धिताशया ॥ ११२

सा रोहिणी जीवन-पूर्ण-जीवना मूर्तीकृता संस्कृत-भाव-सर्पिणी ।
चित्तं प्रशान्तं कुरुतेम्बुपायिनां संचारि-चित्ताञ्चित-चञ्चलापगा ॥ ११३

रसार्द्रचित्तं वनिता-समूहाद् अभ्यस्तमासीदुत-यौवतेन ।
नितान्त-संपर्क-वशात्-सलीलं तस्याः समानीतमिवावभासे ॥ ११४

आजन्मतः शीतल-शैलवासात् निःसंशयं सा सरसा मनोज्ञा ।
मनोज्ञरूपा हिमवारिपूर्णा नूनं वहन्ती नुत-जीवना सा ॥ ११५

समस्त-देशाकृति-भव्यमूर्त्तेः माहेश्वराभील-कपर्द-भारात् ।
प्रभञ्जनाभिन्न-शिरोज-भागात् वहत्यजस्रं भववाहिनीव ॥ ११६

स्थाण्वाश्रमे हैमवती तपस्विनी काषाय-वर्णाञ्चित-रम्यवल्कलम् ।
धौतं च सूर्यातप-तापनाय किं संचिक्षिपेतीव चकास्ति रोहिणी ॥ ११७

भर्त्रा परित्यक्त-यशोधराया हृदि स्थिता प्रेमरस-स्वरूपा ।
शक्तिः सदाबाह्य-समीक्षणाय यातीव रेजे रयवाहिनीयम् ॥ ११८

विलास-वीची-विलसद्-द्रुमाणां पुष्पोच्चया-भासित-वर्ण-तोयैः ।
आमोद-गन्धावृत-जीवना सा रेजे प्रियं नित्यसुवासिनीव ॥ ११९

प्रतिक्षणं प्रस्खलिता धराधरे महोन्नत-स्थानगतापि वाहिनी ।
क्रमेण खिन्ना बहुवेग-भावना पपात भूमावनिशं वियोगिनी ॥ १२०

सा रोहिणी बुद्बुद-पुञ्ज-शोभिनी संदर्शयन्तीव तदीयजीवितम् ।
पङ्काविलैः स्वीयधनाशयैः हृदैः खिन्ना सदा भाति च मन्दगामिनी ॥१२१

मन्दानिलः सान्द्र-नदीपयःकणैः नीत्वा लतान्तामलगन्ध-सौरभम् ।
उद्योगशीलान् निरतं च हालिकान् संतोषपूर्णान् कुरुते गतश्रमान् ॥ १२२

विलासिनी सा नगराजकन्या दयार्द्रचित्ता सरसाङ्गरूपा ।
कथं समासादित-लास्ययाना बभूव कान्तार-शिलोच्चयेषु ॥ १२३

विलोल-वीची-बहु-विभ्रमाञ्चिता प्रियं सदावर्तगभीरनाभिना ।
प्रभञ्जनाकम्पितकङ्कणस्वना रसात्मकान् कान् न करोति भामिनी ॥१२४

आभासते स्वीय-चरित्र-हेतुभिः सा वाहिनी निर्मल-जीवना सती।
आशान्तगत्या व्यभिचारभावुका दृष्ट्वा जगत्स्वप्नदशोपमां भृशम् ॥१२५

इति श्री-गीर्वाणान्ध्र-भाषा-प्रवीणेन ओगेटि परीक्षित्-शर्मणा विरचिते विंशतिसर्गीय यशोधरा-महाकाव्ये इष्टदेवता-स्तुतिः कवि-स्तुतिः कवि-विज्ञापना कवि-वंश-परिचयः हिमालयवर्णनं रोहिणीनदीवर्णनेत्यादिभिः समलंकृतः प्रथमः सर्गः समाप्तः ॥

द्वि ती यः स गः ।

कपिलवास्तु-नगर-वर्णनम् ।

पत्तनं कपिल-वास्तु नितान्तं सर्व-वर्ण-मधुरं विचित्रितम् ।
नाकलोकमपि पुण्यवर्तनैः निर्जितं च कुरुते स्वभाससा ॥ १

सुधाविलुप्ताः च महोन्नतास्ते प्रासाद-भागाः सित-चन्द्रिकासु ।
आभान्ति हैमाकृत-सर्व-भागाः हिमाचलस्येव पवित्र-कूटाः ॥ २

उत्तुङग-सौधाग्र-बहिःस्थलीषु विलोक्य कन्या-जन-वल्गितानि ।
पान्थाः सुखं श्रावण-मेघचित्ताः विद्युल्लताभाः इति चिन्तयन्ति ॥ ३

विलासिनीनां चटुल-प्रवर्तनैः विशालहर्म्यैः विशदं समुन्नतैः ।
विदूरयन्ती विविधाः पुरोभृशं हिमालयादर्श इव प्रकाशते ॥ ४

प्रवीक्षितुं तत्र विलासिनीगणं प्रसन्न-बिब्बोक-विलास-भावुकम् ।
तदा तदा यान्ति च नाकवासिनः धरातलं यौवत-सौख्यलोलुपाः ॥ ५

सायंतने तत्र विटाः सचेटाः विलोक्य सर्वे किलिकिञ्जितानि ।
मुग्धाङ्गनानां विविधानुभावान् लपन्ति ते जाग्रति संभ्रमन्ति ॥ ६

पादाञ्चितैर्नूपुरमञ्जुनादैः संगीत-साहित्य-सुधा-प्रवाहैः ।
गन्धर्व-गानोपम-कण्ठनादैः कुर्वन्ति वेश्याः नगरीं सकामाम् ॥ ७

पान्थो मृगाङ्कः श्रमभिन्न-गात्रः सुधामयेष्वुन्नत-गोपुरेषु ।
विश्रम्य विश्रम्य निशां प्रतीर्य क्षपावसाने भजते हि कार्त्स्न्यम् ॥ ८

गावः प्रियं तत्र विरूढघासं क्षेत्रे चरन्त्यः सततं लसन्ति ।
भूम्याः प्रतीका इव पुण्यरूपाः कुण्डोध्निभाराः सुरधेनुवत्साः ॥ ९

सर्वाः प्रजाः गोसमुदायमेवं भजन्ति मातेति पवित्र-भावैः ।
पठन्ति नित्यं दुहिता वसूनां वेदोक्तमेवं मनसा स्मरन्त्यः ।। १०

दिने दिने पञ्चमराग-विस्मृताः मुदान्यपुष्टा विटपं समाश्रिताः ।
हठात्पुरन्ध्री-जन-पञ्चमस्वरं निशम्य कूजन्ति सुरागपञ्चमम् ।। ११

वक्रालकाः पीनपयोधराश्च गन्धाङ्ग-रागाञ्चित-कुन्दनाङ्गाः ।
कस्तूरिका-केतकि-राग-पुञ्जैः गन्धायिता भान्ति मनोजभावाः ।। १२

उद्धृत्य बाहू कबरीभराणि सायं सकामाः प्रमदा विचोलाः ।
प्रसादयित्वा स्वकुचांशुकानि तन्वन्ति यूनां हृदयेषु भावम् ।। १३

माराभिरामाः सहसा कुमाराः तत्रस्थ-बिब्बोकवती-विलासान् ।
दिदृक्षवः सायमनङ्ग-भावैः विशन्ति तत्पत्तन-रम्य-भूमिम् ।। १४

कलामयं तत् पत्तनमाविलोक्य कलासु रक्ताः सकला बभासिरे ।
तदा तदाकाश-विहारि-चन्द्रमाः कलाविहीनः तिमिरायते ह्रिया ।। १५

विभिन्नवर्गैः विविधैश्च वर्तनैः प्रसन्न-शोभावह-रम्यपत्तनम् ।
अमन्द-कोलाहल-मण्डितं प्रियं चकास्ति संधीकृत-भावरूपम् ।। १६

अनन्त-वेदान्त-विदः समस्ताः भूदेवताः भासुर-भानुतेजाः ।
कुर्वन्ति नित्यं वर-वेद-घोषं तया पुनीता नगरी चकासे ।। १७

अपक्रमं नैव चलन्ति नित्यं तस्यां नगर्यां विविधाश्च धर्माः ।
धर्मार्थ-वेदाभिमतानुकार्यं यथाविधि प्राज्ञ-जनो विधत्ते ।। १८

कल्ये प्रियं भागवतोत्तमास्ते गायन्ति नृत्यन्ति पवित्रगानैः ।
आकर्ण्य तद्गान-रसं प्रमत्तो मन्दानिलः सार्थकतां प्रपेदे ।। १९

निरन्तरं धेनु-सुता विभान्तम् अम्बारवाध्वानित-रम्यपत्तनम् ।
सारङ्ग-यूथैः कृत-चारु-रूपं विमन्वते सत्त्वगुणानुरूपम् ॥ २०

कन्याः प्रभाते स्वगृहाङ्गणेषु लिखन्ति रम्यं बहुरङ्गवल्यः ।
चित्रेषु तासां गत-कौशलं च प्रदर्शयन्त्यः सततं विभान्ति ॥ २१

सर्वाङ्ग-सौभाग्य-मदेन भासते यस्माद्विलासैः मदिराक्षि-योषिताम् ।
आनन्दगत्या समयो व्यतीयते तस्माद्धि तत्प्राप कलामयं जगत् ॥ २२

अनन्तलावण्य-विलासरूपा प्रभूत-वैदग्ध्य-विराजमाना ।
नानाविधैः जन्तुसमूहपूता विराजते शान्तिमयेन गत्या ॥ २३

रम्यां तदीयाकृतिमेव नित्यं शुभं च तस्याः चलनादिकं यत् ।
नितान्त-गानामृतवर्षिणीं तां विलोक्य गन्तुं नहि कोपि शक्तः ॥ २४

धान्यैः पशूनां विविधैः समूहकैः आनन्दितं तन्नगरं समृद्धिभिः ।
स्थानं बभूवेदमनन्त-सम्पदां नाकः श्रिया सर्वमहोजसां यथा ॥ २५

कुलक्रमादागत-धर्म-नैष्ठिकाः लसन्ति ते भासुर-भूसुराः परम् ।
नयेन ते शासति बाहु-जन्मगाः क्रमेण वैश्याश्च विराट-पादजाः ॥ २६

न तत्र देशे सुतरां भवन्ति वृथेति बाधाः जनहानिरूपाः ।
सकाल-वर्षागमन-प्रमोदात् दरिद्र-भावो भजते दरिद्रताम् ॥ २७

तस्यां नगर्यां प्रतिगेहपार्श्वे लसन्ति वृक्षा व्रततीः समाश्रिताः ।
उद्यान-वृक्षावृत-रम्यसौधाः कुर्वन्ति नेत्रोत्सवमागतानाम् ॥ २८

उद्यान-भूमौ प्रचुरं प्ररूढं तृणं मनोहारि-हरीतवर्णम् ।
विलोकिनां नेत्रपथं समेति धराधृतं चीरमिवात्र देशे ॥ २९

सुपुष्प-दामाञ्चित-केशपाशाः सुवल्कलाबद्ध-कुचाग्र-भागाः ।
प्रतिक्षणं वर्धित-कान्तरूपाः लसन्ति रामाः सततं विलासैः ॥ ३०

द्विरेफमालोपमिताश्च कैशिकाः नानाविधैः मण्डन-भङ्गिभिश्च ।
विभिन्नरूपान्तर-दीप्यमानाः रामाः रतिं धिक्कृतवन्त्यजस्रम् ॥ ३१

दृष्ट्वा च तासां मधु-मण्डनादीन् पुरा कवीन्द्राः स्वकवित्व-वाणीम् ।
आभूषयाञ्चक्रुरमोघवर्णैः विलास-शय्यागत-भावरागैः ॥ ३२

महोन्नतस्थानमपूर्व-वैभवं सुवास्तु-शास्त्रान्तर-दर्शितं यथा ।
अनारतं पुण्यचयेन शोभितं नामानुगुण्यं खलु शिल्पितं प्रियम् ॥ ३३

स्तुवन्ति तद्देशमगण्य-भावैः प्रेमार्द्र-संस्कार-पुनीत-चित्तैः ।
पुनीत-चारित्र्य-विचित्र-शीलैः पातालपर्यन्त-विसारि-कीर्त्या ॥ ३४

मुहुर्मुहुः मर्दल-रम्यनादाः पयोद-नालाकृत-दिव्यशब्दैः ।
समं ध्वनन्तीति प्रमोदचित्ताः न पत्तनं ते जहतीह पान्थाः ॥ ३५

पुष्प-लाविका-वर्णनम् ।

तस्यां नगर्यां विपणीषु जीवनः चाम्पेय-मालाञ्चित-पुष्प-लाविकाः ।
सापेक्षया तान् चतुरान् विटान् परं पृच्छन्ति पश्यन्ति हसन्ति वीक्षणैः ॥ ३६

रसार्द्रचेताः सुहृदश्च चेटाः समेत्य ताः पुष्पवतीः सगूढम् ।
समार्तवं हे कथमेव दास्यैः अनार्तवं तत् सपदं वदस्व ॥ ३७

इति प्रगल्भाः सततं भुजङ्गाः विलोक्य तासां भुजमूलभासः ।
पृच्छन्त एवाभिमतं च मूल्यं परिभ्रमन्ति भ्रमरायमानाः ॥ ३८

पक्वाम्र-संकाश-भुजौ च तासां स्तनद्वयं पङ्कज-कोरकाभम् ।
विलोक्यते प्रेक्षग-मालिकाभिः बबन्धुराद्रागल-भावसूत्रम् ॥ ३९

रे चेट! किं नेष्यसि रक्तपुष्पं परागरागाञ्चितमेतदत्र ।
कुत्रापि न प्राप्स्यसि पुष्पितं त्वं विसृज्य यास्यैः यदि मौढ्यमेव ॥ ४०

स्वेद-प्रसिक्तं मधुरं च योषितां गन्धानिलं चम्पक-सौरभं तनुम् ।
आघ्राय पुष्पैः सममेव कामुकाः पुष्पासवापान-विघूर्ण-मानसाः ॥ ४१

वदस्व हे पुष्पवति! प्रदातुं पराग-पुष्पं सरसैश्च मूल्यैः ।
सर्वे वयं त्वां प्रति सायमेव क्रेतुं भवत्पुष्पचयं भजेम ॥ ४२

उत्सङ्गदेशे मदनस्य पुष्पं विराजते रक्तिम-चित्रितं ते ।
कथं प्रदास्यैः वद पद्मनेत्रे! क्रेतुं च काङ्क्षा मम विद्यते तत् ॥ ४३

हे पुंश्चलि! त्वं विपुलं वदस्व मरन्द-बिन्दून् कतिवारमाशु ।
जुगुञ्जुरेते भ्रमराः सकामं विद्रावितेऽस्मिन् मदनस्य पुष्पे ॥ ४४

शेफालिकापुष्पमनोभिरामाः रामाः प्रियं कौतुककण्ठनादैः ।
आहूय तत्रत्य-विटान् सकामं पृच्छन्ति साकूत-मनोविकारैः ॥ ४५

आगत्य सायं सरसाश्च कामुकाः तिष्ठन्ति ते सात्त्विक-भाव-संकुलाः ।
अदृश्यमानाः खलु पुष्पलाविकाः इति त्वराक्रामित-चित्त-भावुकाः ॥ ४६

विचित्रदामाञ्जितमूर्धजास्ताः पुष्पोच्चयं तत्र विकीर्य रामाः ।
तत्रैव चैतन्य-विहीन-शिल्पाः उपाविशन् ईक्षण-मालिकाभिः ॥ ४७

अनेक-पुष्पाभरणैः सुचित्रिताः विलास-रामाः स्मर-भाव-भूषिताः ।
विलोकिनां मन्मथ-भाव-दीपकाः लसन्ति नूनं विपणीषु भासिताः ॥ ४८

दृष्ट्वा परागामलसूनराशीः तासां शिरोजान् सुमभूषितांश्च ।
द्वयोर्हि साम्यं नहि भावयन्तः विटाः परं मौनमुखा विरेजुः ॥ ४९

विलोल-नेत्राञ्चल-वीक्षणैः परं प्रकोष्ठभागे क्वणितैश्च कङ्कणैः ।
उरोज-भारैश्च नताङ्गनाजनं विमन्दते कोमल-पुष्प-लाविकाः ॥ ५०

प्रबोधयन्तीव सदा प्रहर्षं जन्मान्तरे सञ्चित-वासनादीन् ।
प्रत्यूष-पङ्केरुह-सार-सौरभं व्याजैः प्रियं सा नगरी बभासे ॥ ५१

प्रियं द्विरेफाः मधुरं चरन्तः गुञ्जन्ति कीर्तिं नगराङ्गनायाः ।
पुष्पाच्च पुष्पं मधु-पान-मत्ताः तत्राङ्गना मूर्धज-मालिकासु ॥ ५२

पुंनाग-चम्पा-करवीर-कुन्दैः अशोक-मन्दार-शिरीष-सूनैः ।
अजस्रमाकन्द-तरु-प्रवालैः आमोदितं तन्नगरं सुगन्धैः ॥ ५३

हस्ते गृहीत्वा चतुरं विलासैः शेफालिकां दर्शय चारुनेत्रे ।
कराब्ज-शेफालिक-पुष्पदाम-नान्दी भवत्यात्मज-सङ्गराय ॥ ५४

अन्तर्हितां वन्यकरालघासैः शेफालिकां चालय भावराशे।
शेफालिका-सज्जित-हस्त-लीला भवत्यहो सा रसिक-प्रिया हि ॥ ५५

रेगण्ड ! शेफालिक-पुष्पदाम नीत्वा प्रियायै सरसं प्रदेहि।
शेफालिकादाम मनोविकारं तनोति रागं च विलासिनीनाम् ॥ ५६

एवंविधैः गुम्फित-शब्दचित्रैः प्रसून-संपच्चय-दिव्य-वर्णैः।
लसन्ति चेटाः मदनाभिरामाः रामाश्च संतोष-भरेण मत्ताः ॥ ५७

शुद्धोदन-राज्य-पालनम्।

तस्यां नगर्यां बहु-भाग्य-भोगी वसुन्धरालिङ्गित-दिव्यगात्रः।
धराधिपाग्रेसर-मानवेन्द्रो प्रशास्ति नित्यं सदयं प्रजालिम् ॥ ५८

परंपराप्राप्त-महीतलेन प्रगाढ सन्क्रामित-वर्तनेन।
संस्कारपूतेन पदोच्चयेन धर्मप्रकर्षेण स शास्ति राज्यम् ॥ ५९

हयालि-हेषाकुल-रोदसी-गुहाः मदेभ-हुंकार-नगेन्द्र-कन्दराः।
गदन्ति शब्दैरिति भूतलं प्रियं विनारिवर्गं हरितश्च निश्चलाः ॥ ६०

गुणान्वितान् त्यागमयान् नरेन्द्रान् संस्मार्यतान् पूर्वज-भूमिपालान्।
परं हरिश्चन्द्र-महेन्द्र-वर्गान् प्रजाश्च तं भूमिपतिं स्तुवन्ति ॥ ६१

शुद्धोदनो भूपतिरेवमासीत् स भीमकान्तैः गुणवर्तनैश्च।
महोन्नतः शैलइवाभिमानी महार्णवो गुम्फन-भावरत्नैः ॥ ६२

अनेन शुद्धोदन-चक्रवर्तिना प्रशासितास्ते धरणीतले जनाः।
अनाथनाथोयमिति प्रकीर्तनैः अनारतं तं प्रचुरं स्तुवन्त्यहो ॥ ६३

दिवं यथा पालयति स्म गोत्रभिद् नयेन राज्यं स महीपतिः पुरीम् ।
अमात्यवर्यैः बहुबुद्धि-शालिभिः समस्त-कल्याण-परंपरावृतः ।। ६४

हिमालय-श्रेणिभिरेव सज्जितं तदा तदीयं वर-पत्तनं भृशम् ।
विराजते यत्र हिरण्य-योनिना यथा पराक्रान्तमयी भविष्यति ।। ६५

महीपतिः तत्र परं महौजाः तस्मिन् विशाले कपिलाख्यदेशे ।
आश्वासयन्नास-जनानुरागं धर्मेण सः शाक्य-कुलावतंसः ।। ६६

तदा तदीये पुरुषार्थ-राजिते कुत्राप्यदृष्टः खलु भिक्षुकोऽपि ।
निरन्तरं दानगुणो चकास्ति मदेभ-विप्रेषु विभासुरेषु ।। ६७

सुचन्द्र-शाला भवनाग्रभागे मदैर्विभान्त्येव सदा गजेन्द्राः ।
तेषां बृहद्-बृंहित-शब्दितं रवं प्रकुर्वते मञ्जुल-मेघनाथम् ।। ६८

प्रवीक्ष्यतं भूमिपतिं धनाढ्यं धनाधिपः प्राप कुबेरनाम ।
अदृष्टरूपो भजते कुबेरः दिने दिने जीवित-सौख्यहीनः ।। ६९

तदीय राज्ञः पृतना भरेण मही चचालेति कथासु सर्वे ।
स्तुवन्ति नित्यं बहु-सौख्यमग्नाः संतोष-भारेण पवित्रमूर्तिम् ।। ७०

रत्नाकरः केवलमेव नाम जनैः सदा वर्णित-भावरूपः ।
अवापलोके खलु सागरोऽयं निशम्य तद्रत्नमयं प्रदेशम् ।। ७१

वसुंधरा सस्य-वसानधारिणी फलैः सुपुष्पैः नितरां विराजते ।
यथा च माता प्रजयाभिवेल्लिता पवित्र-वात्सल्य-मनोरथा सती ।। ७२

कुत्रापि नास्त्येव तदा महीतले पृथ्वीसमा भारत-रूपगोवधा ।
सर्वे मुदा क्षीर-घृतादिसेवनैः आभान्ति सुस्निग्ध-सुरूपदेहाः ।। ७३

महीपतेः तान्त्रिक राज्यपालने लतान्त-गन्धानिल-पूतकानने ।
अनेक हिंस्रावृत-काननान्तरे विलोक्यते नैव कदापि मारणम् ॥ ७४

शशास राजा पुरुषार्थवर्गैः यथा सुखं स्वीयप्रजा इवेति ।
प्रजाश्च तं केवलमामनन्ति कल्पद्रुमाकल्पित-मूर्तिमन्तम् ॥ ७५

अनन्त-धात्री धरण-क्षमापतिः दयानिवासीकृत-मानसेन्द्रियः ।
समस्त-सौख्याकर-जीवनान्वितो कुमारहीनः स च भूमिपालकः ॥ ७६

प्रायेणलोके भगवान्विरिञ्चिः विधाय सौख्यं विविधं महिम्ना ।
एकेन हीनं कुरुते जनालिं नैकत्र सर्वो गुण-संनिपातः ॥ ७७

गौतम-कुमार-वर्णनम् ।

मायेति राज्ञी महिषी च तस्य कुमार-रत्नं सुषुवे सुकाले ।
तदैव सा लोकमिदं विहाय जगाम नाकं जननी-मतल्ली ॥ ७८

तदा प्रभृत्येव कुमार-पोषणं प्रकारयामास पिता महीपतिः ।
दिने दिनेऽसौ ववृधेऽर्भकः प्रियं स शुक्लपक्षे वर-चन्द्रमा इव ॥ ७९

जातं कुमारं प्रति-फेणुरेवं सिद्धान्तिनो ज्योतिषकोविदास्तम् ।
प्रशासयेत् राज्यमनन्तकालं नोचेत् विरागी भविता च नूनम् ॥ ८०

प्रसूत-पुत्रस्य तदा चकार पिता स्वयं गौतम-नामधेयम् ।
व्यतीत-काले दशमे दिने च पुरोहितानां निकटे नरेन्द्रः । ८१

स शैशवे भूमि-परागमुष्टीः कृत्वा हसन् शून्यतलं च पश्यन् ।
रुरोद पश्चादनिमित्तहासैः स तात्त्विकानां बहु-भावरूपः ॥ ८२

आसन् नगर्यां बहु-वीरधीराः संग्राम-रङ्गेषु विचक्षणाश्च ।
तन्मध्यदेशे मधुरं विरेजे शक्त्युद्धतात्मा-क्षितिपात्मजोऽयम् ॥ ८३

श्रुतेन बुद्धिः वयसावपुश्च लक्ष्मी-कटाक्षेण समृद्ध-भोगः ।
रराज सः शाक्य-कुलाधिपस्तु समं विभक्तः स्व-शरीरलक्ष्म्या ॥ ८४

प्रशान्तवाक्यैः सुषमा-प्रपूर्णैः प्रत्यङ्ग-संसक्त-तनु-प्रकाशैः ।
रराज सः शान्तरसस्य लक्ष्यः प्रसन्ननेत्राञ्चल रम्यदृग्भिः ॥ ८५

किं शान्तमूर्तिः किमु शौर्यराशिः किं मन्मथः किं जलजाप्तबन्धुः ।
अवातरत्स्वर्ग्यममुत्रलोके साक्षात् स वज्रीति प्रजानुमेयः ॥ ८६

विभूति-भूत्या प्रिय-मण्डितश्च कन्दर्प-युक्तोपि न दर्पयुक्तः ।
सौहार्द-भावं तनुते सुघोणा दयार्णवौ तस्य विशालनेत्रे ॥ ८७

भृशं स्वमित्रैः प्रचुरं प्रधाविनं प्रडीन-संडीन-विकार-खेलनैः ।
चित्राति चित्रं शर-शस्त्र-चालकं भजन्ति पौराः सततं च गौतमम् ॥ ८८

आलीढ-पादादि-समस्त-बन्धनैः शस्त्रास्त्र-शूलादि-सकुन्त-मुद्गरैः ।
घोट्टाण-मातङ्ग-रथादि-चालनैः नूनं विरेजे स च राजनन्दनः ॥ ८९

राजापि पुत्राकृति-मूर्तिमन्तं स्वात्मानमेवं निभृतं प्रवीक्ष्य ।
अयं कुमारो जितवैरिवर्गः तथेति जल्पन् नितरां तुतोष ॥ ९०

यदाजि-शूलाञ्चित-पीनबाहुं संचालयामास रणे महौजाः ।
हाहा-रवैः तत्र नृपालवर्गाः त्रिशूल-पाणीति परं जजल्पुः ॥ ९१

तदीय कार्तस्वर-वर्णदेहं का भामिनी कामयते न गूढम् ।
का सा नितम्बालस-मन्दयाना लग्नाभवेत्तस्य भुजान्तराले ॥ ९२

रस-स्वरूपं मधुरं पिबन्त्यो घर्माम्बु-लग्नाऽसित-काकपक्षम् ।
मुखारविन्दे विदलिष्यमाणम् इन्दिन्दिराकारविलोचनाः ताः ॥ ९३

इति श्रीगीर्वाणान्ध्र-भाषा-प्रवीणेन ओगेटि-परिक्षित्-शर्मणा विरचिते विंशति-सर्गीय यशोधरा-महाकाव्ये कपिलवास्तु-नगरवर्णनम्, पुष्पलाविका-वर्णनम्, शुद्धोदन-राज्य-पालनम्, गौतमकुमारवर्णनेत्यादि-विषयसमलङ्कृतः द्वितीयः सर्गः समाप्तः ।



तृतीयः सर्गः ।

यशोधरा - वर्णनम् ।

यशोधरानाम सुपुत्रिकासीत् महीपतेः कीर्तितदण्डपाणेः ।
मदेभयाना जितकीरवाणी प्रशिल्पिता नाट्यविलासिनीव ॥ १

तस्यां नगर्यां मदमत्त-यौवतं कामान्धकारावृत-राजवर्गकम् ।
दाढ्यं समाबद्धमनोजवीक्षणैः अन्योन्य संलग्नमनाः भवन्ति च ॥ २

अचेतनं तत्र तदीय-चेतनैः सचेतनं भाति नवोद्गमाङ्कुरैः ।
प्रसन्नलीलादर-चारुविभ्रमैः विना च तां चेतनमेत्यचेतनम् ॥ ३

सा नन्दिनी भूपति-दण्डपाणेः समस्तबालासु ललामभूता ।
श्रुत्वा च तं सुन्दर-भव्यमूर्ति प्रियं नृपं काङ्क्षति गौतमाख्यम् ॥ ४

यशोधरा-दीर्घमरालकेशान् विलोक्य लज्जाकुलितामयूराः ।
कुर्वन्ति ते काननवासमेव त्रपा-भराः चित्रितबर्हपुष्टाः ॥ ५

मुखं तदीयं कमल-श्रियाभृशं सुधामयूखस्य रुचा विनिर्ममौ ।
ततस्तदीयं वदनं च वर्ण्यते परागपद्मेन सुधांशुमालिना ॥ ६

चूतप्रवालेन तदीयमोष्ठं वसन्तकाले प्रथमोद्गमेन ।
सदापि संतोलयितुं सुयुक्तं प्रियं भवत्येव कलाप्रियाणाम् ॥ ७

कुन्दैः चकल्पे सितदन्तपङ्क्ति निर्दृष्ट-रूपेण परं विधाता ।
तनोति शुभ्रं स्मितमासमन्तात् ताम्राधरव्याप्त तदीय-कान्तिः ॥ ८

नीलोत्पलाभ्यां वरनेत्रयुग्मकं चिकाय तस्याः कमलासनः परम् ।
तथेति ते कज्जल-लिप्त-लोचने विरेजतुः चञ्चल-रल्लकैः भृशम् ॥ ९

विनिर्मितां तां वर-पञ्चमार्गणैः विलोक्य सर्वोपि विमुह्यते ध्रुवम् ।
तदीय-शोभां वदनस्य कामपि स्मरोपि प्राप्नोति च भावविक्लवम् ॥ १०

मृणालनालेन समं तदीयौ स्रस्तांसरम्यौ मृदुलौ च बाहू ।
विलोकिनां कण्ठगतौ तदानीं प्रवर्धयन्तौ मकरध्वजाधिम् ॥ ११

बभौ तदीयं कुचमण्डलं तु तदीय-लावण्य-निमज्जितानाम् ।
संरक्षणार्थं बहुमान-पात्रं सृष्टं तदेतत्खलु चिन्तजेन ॥ १२

नितम्बबिम्बं परिवर्धमानं स्तनद्वयं गौरव-र्वाधितं च ।
तदीय-मध्यं मिलितं बभूव विलोक्य शून्ये बल-वैरि-भीत्या ॥ १३

कुचद्वयं चन्दनगंधलेपितं तुषारहारावृत-रम्य-चूचुकम् ।
नितम्बबिम्बं मणिमेखलास्पदं न कुर्वते कस्य मनो रसात्मकम् ॥ १४

घोणा तदीया चरिताभिरूपी मनोज-भावास्पद-चारु-रेखा ।
सुरागिणी दाडिम-कुड्मलाभा विराजते कामित-दायिनीव ॥ १५

नवेतिसंख्याकृति-दिव्य-कर्णौ कन्दर्पकेली-समये मनोज्ञान् ।
आलापनादीन् मधुरांश्च शब्दान् श्रोतुं समर्थाविति रूपितौ तौ ॥ १६

इतस्ततः चालन-चञ्चलं परं यशो रा-श्रोणि-रथाङ्गवर्तुलम् ।
करोति यूनां हृदयं तु कार्मुकं मनोज-भावोच्चय खेलनायतम् ॥ १७

ऊरू सुतन्व्याः सुषमाभिरामौ अपूर्वरम्याकृति-चारुरूपौ ।
नितान्त-सानन्द-रतान्तसौख्ये लतान्त-शय्येव वितेनतुः तौ ॥ १८

तूणीर-रूपौ मृदुमांसलौ तौ जानू-तदीयौ कुरुतः प्रकामम् ।
संचाल-योग्यौ नटनानुरूपौ मनोजभावं मदमज्जितानाम् ॥ १९

लाक्षारसेनाञ्चित-पादपङ्कजा भूमौ विनिक्षेपण रागरञ्जिता ।
प्रायेण शङ्कां कुरुते विलोकिनां सा पद्मिनी जातिरिति प्रहर्षिणी ॥ २०

यदा यदा सा तरुणी विभाषते प्रयान्ति मौनेन वनं च कोकिलाः ।
विलोक्य तस्याः गमनं तु हंसकाः विचार्य तन्मानसमेव तत्यजुः ॥ २१

तस्याः शरीरात् निभृताच्छरोचिः प्रवाहरूपेण सदा वहन्ती ।
विलोकिनां घोषयतीव नित्यं प्रवाह-वेगे पतिता भवेयुः ॥ २२

अलङ्कृता सा कमलायताक्षी नीलोत्पलैः कुड्मल-कुन्द-वर्गैः ।
अशोक-पुष्पैः नवचूतगुच्छैः कन्दर्प-बाणांश्च तिरश्चकार ॥ २३

भावप्रवाहैः सुमनो विकारैः गानेन नाट्येन विजल्पनेन ।
सर्वाङ्ग-सौन्दर्यमयेन मूर्त्या सौन्दर्यतायाश्च निदर्शनं सा ॥ २४

रेखात्रयेणावृत-कम्बुकण्ठो लावण्यरूपायित-दिव्यवर्णैः ।
विराजते न्यक्कृत-पाञ्चजन्यः स्वरेण कण्ठागत-कम्रनादैः ॥ २५

यशोधरा-कुन्दनवर्णदेहे शोभाक्षणे या नवतामुपैति ।
अन्यत्र मार्गादिति तामभिख्यां बद्धेव सा प्रावरणा विरेजे ॥ २६

556
 BVBSSMV

चकोरनेत्रा चलदृग्विलासैः विचित्र-हारावलि-तारकाभिः ।
ग्लौपाण्डुवक्त्रामृतदेहकान्त्या रराज पिण्डीकृत-चन्द्रिकेव ॥ २७

अनन्त-हारावलि-तारकालिः विराजमाना नभसि प्रकामम् ।
आलोक्य तत्पाद-नखालिशोभां ह्रिया सिषेवे नखराजिमेत्य ॥ २८

अस्पृष्टदेहा रमणीयवर्णा सा निर्मिता तोयजसूतिचित्ते ।
तस्मादियं भाति सुवर्णदिव्यैः प्रकाशजालैः हिमधामरुग्भिः ॥ २९

यशोधरा-लोचनतारकाञ्चिता स्मितप्रपूर्णा मुखचन्द्रपूर्णिमा ।
निजाङ्ग-रागारुणचीरमण्डिता रराज सन्ध्येव मनोज-रागिणी ॥ ३०

इति श्रीगीर्वाणान्ध्र-भाषा-प्रवीणेन ओगेटि-परीक्षित्-शर्मणा विरचिते विंशति-सर्गीय-यशोधरा-महाकाव्ये यशोधरा-वर्णना-समलङ्कृतः तृतीयः सर्गः समाप्तः ।

556

चतुर्थः सर्गः।

यशोधरा-गौतमयोः विवाहः।

यशोधरायै वयसि स्थितायै वैवाहिकं मङ्गलकार्यमाशु।
चिकीर्षुराघोषितवान् स राजा दौहितृ-वक्त्राम्बुजगन्धलोलः॥ १

स्वयंवरार्थं बहुराजपुत्रकाः समाययुः तस्य महीपतेः गृहम्।
गजाश्वरूढाः मृगराजमध्यमाः किरीटहाराङ्गदरत्नमण्डिताः॥ २

सर्वे कुमाराः स्वबलाभिदर्शनं नानाविधैस्तीक्ष्णकरालतोमरैः।
संदर्शयामासुरपारपाटवं समस्त-नारीगण-हर्ष-दायकम्॥ ३

क्रीडासु सर्वासु बभूव राजा क्रीडाभिरामोऽयमिति प्रसिद्धः।
अग्रेसरो गौतम-चक्रवर्ती प्रफेणुराहारवकीर्तनैः ते॥ ४

कलाप्रपूर्णः खलु गौतमोऽयं वंशोदधेः शारदचन्द्रमाश्च।
यशोधरायाः हृदयेश्वरोऽयं रराज भावी जगतः प्रजानाम्॥ ५

यदा यदा सा मनुते नृपालं प्राप्नोति देहे पुलकाङ्कुरादीन्।
तदा सुगात्री वसुधैवभाति बीजाङ्कुरैः चेतज-भावपुञ्जैः॥ ६

यशोधरादीपशिखेवरागिणी शनैः शनैः सा कलहंस-चालनैः।
विचित्र-हारावलिभूषिता प्रिया समागता गौतम-चक्रवर्तिनम्॥ ७

विलोलदृग्भिः शफरीविलोचना सुगन्धिलैः चम्पकचारुकुड्मलैः।
विरच्य मन्दाक्ष-विसारि-स्रग्विणीं निचिक्षिपे गौतम-कम्बुकन्धरे॥ ८

विलोक्य कामं जघनालसां ताम् अवाप राजा मदनस्य भावम्।
त्रपाप्रसूनाञ्चित-मञ्जुलास्याम् एकत्रमूर्तीकृत-सुन्दराङ्गीम्॥ ९

सुनिर्मिता मण्डनमूर्तिरेषा घृणाक्षरन्याय-समग्रभावा ।
अहो विधाताक्षियुगं ददौ मे कथं लभेयं बत तृप्तिमत्र ॥ १०

सर्वं तदीयं भवनं सुधामयं वीरुद्भिरासीत् समलंकृतं भृशम् ।
कृत्वा च गन्धामलतोयसेचनैः संघोषयामास स्वयंवरं तदा ॥ ११

अनेक-रत्नाभरणानि दत्त्वा यशोधरायै प्रियदण्डपाणिः ।
तस्याः सखीमण्डल-मुख्य-सख्यै समर्पयामास विवाहभारम् ॥ १२

अनन्तरं नागरिकाः प्रमोदैः वैविध्य-रत्नाम्बरहारजालैः ।
सर्वाः कुमार्यो नवहेमहारैर् अलंकृतास्तद्भवनं च प्रापुः ॥ १३

एकैकशस्तत्र समागतास्ते उपाविशन् सौम्यगभीरदृग्भिः ।
सिंहासनेषूज्ज्वलराजितेषु मामेव कन्या स्वयमेष्यतीति ॥ १४

क्रीडाङ्गणे ते क्रमशः प्रयाताः गभीर-भावैः परमाप्तवाचः ।
उपाविशंस्तत्र विदर्शयन्तः वक्षांसि पीनोन्नत-भासुराणि ॥ १५

क्रमेण रामाः त्रपया प्रयान्त्यः दृष्ट्वा नरेन्द्रं बहुभीतचित्ताः ।
विरेजुरेवं पुलकाङ्कुरैस्ताः कष्टेन याताः परिहीय भूपम् ॥ १६

विलोक्य तं खञ्जन-नील-लोचना प्रसारयामास कटाक्षवीक्षणम् ।
समागता काचन चारु-केशिकी जहास मन्दाक्षमसन्दशोभिनी ॥ १७

समेत्य सा काञ्चन-पद्मशोभिनी ददौ च तस्मै नव-पद्मकोरकम् ।
विलोक्य तां गौतम-भूमिपालकः विसिस्मिये भावज-भावपुञ्जकैः ॥ १८

आनन्द-कल्याण-दिने तरुण्यः कल्याण-रागं वर-भैरवीं ताः ।
जगुश्च तद्राग-सुधाप्रभावः विकल्पयामास पवित्र-संध्याम् ॥ १९

संतोष-चित्तेन महीपवर्गाः स्वयंवराभासित रम्यहर्म्याः ।
परस्परप्रेम-फलायितौ तौ विराजतामित्यवदन् सघोषम् ॥ २०

प्रवीक्ष्य सा तं कमलायताक्षी समर्पयामास लतान्तमालाम् ।
तयोः सकामेक्षण-पाशबद्धो बभौ सकामो नितरां सकामः ॥ २१

यशोधरां राजकुल-प्रसूतां समान-शीलां तरुणीं वयस्काम् ।
अदेयपूर्वां ववृणे नरेन्द्रो समस्त-राजन्य-कदम्बमध्ये ॥ २२

आनन्द-भूपाल-कदम्बमध्ये धर्मार्थ-काम्येषु न चाल्यतेति ।
अग्नेः पुरस्तात्खलु भूसुराणां प्रियं तदा जल्पितवान् स राजा ॥ २३

सर्वेऽपि गन्धाक्षतरागपुष्पैः वधूवरौ नूतन-दीवनाभिः ।
अस्नापयन् कोमलकण्ठनादैः तौ नित्यमेवं रमतां विलासैः ॥ २४

संरेजतुस्तौ दरहासमण्डनैः शब्दार्थ-संयोग इव प्रवर्तनैः ।
कन्दर्प-संयोग-विमत्तबन्धनैः व्याख्यान-रूपौ रतिराज्यकाव्ये ॥ २५

बभूवतुः सुन्दर-भावरूपौ आदर्श-दाम्पत्य-विराजमानौ ।
द्वन्द्वार्थ-काव्यामृत-लक्ष्यभूतौ समासशय्येव विदृश्यमानौ ॥ २६

गौतम-पट्टाभिषेकः ।

विलोक्य पुत्रं मदनाभिरामं यशोधरालिङ्गन-भासुराङ्गम् ।
सहर्षभारेण विनम्रगात्रस्तृप्तिं न लेभे वसुधाधिपस्तु ॥ २७

पट्टाभिषेक्तव्य इति प्रियं वदन् आज्ञप्तवान् मन्त्रिगणं नृपः स्वयम् ।
यशोधरा संगमचारुभासुरः कल्ये प्रियं मण्डितमण्डपे तुरम् ॥ २८

तदैव शुद्धोदन-चक्रवर्ती पट्टाभिषेक्तुं युवकं कुमारम् ।
चिकीर्य सन्नाहममन्द-वेगं प्रघोषयामास समस्तदेशम् ॥ २९

जलं तदाऽनीतममूल्यकुम्भैः नितान्त-पुण्यामल-वाहिनीभ्यः ।
पूतं समालङ्कृतचारुवर्णैः संमिश्रितं पुष्पपरागरागैः ॥ ३०

प्रत्यूषकाले स च राजनन्दनः निर्वर्त्य शास्त्रोचित-कर्मकाण्डम् ।
स्नात्वा प्रियं तैः शुभवारिजालैः धृत्वा दुकूलानि विवेश गेहम् ॥ ३१

विप्राः सदा वेदपुनीतरूपाः हिरण्यकुम्भेषु विराजमानम् ।
अवाकिरन् मन्त्रजलं तदानीं मूर्धाभिषिक्ते च यशोधरायाम् ॥ ३२

स्नात्वा तदानीं प्रियदर्शिनी सा सुपुष्पमालाञ्चितकेशपाशा ।
बभाज तं गौतम-भूमिपालं ज्योत्स्ना यथा चन्द्रगता विभाति ॥ ३३

तदाभिषेकावृत-वारिजालैः परं धरित्री पुलकाञ्चितेव ।
तस्यै कृतं किं जलसेचनेयं बभूव घासाङ्कुर-हासभावैः ॥ ३४

किरीटमेकं नवरत्नरम्यं चिक्षेप मन्त्री युवराजमूर्ध्नि ।
अवाकिरन्नक्षत-पुष्पराशीन् सभ्याश्च हर्षेण विजल्पयन्तः ॥ ३५

बबन्धमन्त्री सुकटि-प्रदेशे तवासुकोरूपधरं महाऽसिम् ।
निन्युस्तुरं चारुसितातपत्रं सुचामरौ चामर-वाहिकाः तम् ।। ३६

महोत्सवे तत्र धराधिपास्तदा मदेभवाजीरथ-काञ्चनान्विताः ।
यशोधरा-गौतम-चक्रवर्तिनौ समेत्य ते सादरमेव नेमुः ।। ३७

प्रणम्य सर्वे बहुमानपूर्वं पीताम्बरादीन् नवरत्नजालम् ।
समर्पयित्वा बहुधाऽशिषस्ते विधाय पीठान्तरमव्रजन् च ।। ३८

पट्टाभिषेकोत्सव एव रेजे तत्रत्य-राजन्य-मनोहरं च ।
विलासनेत्रोत्सव-दीपिकाभिः आनन्द-पारंगत-मूर्ति-भावैः ।। ३९

पट्टाभिषेकं समवेक्ष्य लोको बभाण संतोषमहर्निशं च ।
राजा प्रजानां करुणान्तरङ्गः यशोधरारूपित-सौम्य-भावा ।। ४०

तौ दम्पती विप्रजनाभिदर्शितं सिंहासनं काञ्चनरत्नचिह्नितम् ।
आसज्जितौ पूत-शरीर-भासुरैः नाकं यथा दिव्य-शची-पुरन्दरौ ।। ४१

यथा महीपाः निरता भवन्ति च जनानुरागं परिपालनक्षमाः ।
तथा प्रजा जीवति मेदिनीतले परस्परायत्तमिदं हि जीवनम् ।। ४२

वसन्त-वर्णनम् ।

अत्रान्तरे सर्वमिदं जगत्-प्रियं रेजे सलीलं मधुवासितं परम् ।
स्थाणुः प्रकर्षेण विचित्र-चेतनो वासन्त-रागेण सुवासितो मुदा ॥ ४३

उद्यानभूमिं पवनैः मिलिन्दैः फलैश्च पुष्पैर्बहुधा विहङ्गैः ।
मयूर-पुंस्कोकिल-कीररावैः मनोहरं चित्रितवान् वसन्तः ॥ ४४

भुजङ्ग-भुक्तं मलयानिलं तं शनैः शनैः सूक्ष्मतरं वहन्तम् ।
वसन्त-बन्धुः सहसा समेत्य प्रेम्णा दृढं सत्वरमालिलिङ्ग ॥ ४५

अहो विवस्त्रां शिशिरो दुरात्मा सर्वाङ्ग-शोभां प्रकटीचकार ।
तथेति मत्वा सहसा वसन्तो प्राच्छादयामास नवप्रवालैः ॥ ४६

कन्दर्पमूर्तिः परिवारयुक्तो योद्धुं प्रतस्थे युवती-समूहम् ।
पुंस्कोकिलानां वरकीररावैः चन्द्रेण साकं मलयानिलैश्च ॥ ४७

वृक्षाग्र-भागेषु विलोलपुच्छाः कूजन्ति चिक्रोडगणाः सहर्षम् ।
पीत्वाऽसवं पुष्पचये-नितान्तं वासन्तिकावैभवमालपन्तः ॥ ४८

द्विरेफ-मालां सततं ध्वनन्ती पद्माच्च पद्मं मधुर-स्वरेण ।
सरोवर-श्री-चयमेव-पूर्णं करोति तूर्णं गणनां प्रमत्ता ॥ ४९

प्रियं परागेण सुहासिनीव मनोज्ञ-वासन्त-समीरलिप्ता ।
सराग-पुष्पैः प्रकृति-प्रभावैः विराजते पुष्पवतीव नूनम् ॥ ५०

उरोज-संभार-भरेण दृप्ताः नितम्ब-बिम्बालस-मन्दयानाः ।
भामाः सकामा मधुरं स्वदृग्भिः चित्तेषु यूनां प्रबलं विशन्ति ॥ ५१

ॐकार-वर्णैः मधुरं जपन्तः गुञ्जन्ति रम्यं मधुपानमत्ताः ।
आयान्ति पुष्पात् कुसुमान्तरं च रुद्राक्ष-मालायित-भृङ्ग-बालाः ॥ ५१

अशोक-माकन्द-मरन्द-भारैः नव-प्रवालोद्गत-सिन्दुवारैः ।
विचित्र-मल्ली-सुम-चम्पकैश्च गन्धायितं काननमेव सर्वम् ॥ ५३

स किंशुकः पुष्पित-रक्त-गुच्छैः सुमैः सचित्रो वद किं? शुकेति ।
प्रभूत-रागेण विमोदमानो पप्रच्छ कीरं परिहास-वाक्यैः ॥ ५४

बभौ धरित्री सुमराग-पाण्डुरा सुगन्ध-संमिश्रित-देह-मण्डना ।
विचित्र-पुष्पावलि-चारु-भूषिता ललास सा माधव-संगमोत्सुका ॥ ५५

वने हरीताऽरुण-बभ्रु-भाभिः वर्णैः परं चित्रित-चारु-रूपा ।
विभाति नूनं मधु-भाव-लिप्ता वसन्त-शोभावृत-कानन-श्रीः ॥ ५६

कन्दर्प-बालः सहितः सुधांशुना मत्तेभ-मन्दानिल-वाहनेच्छुकः ।
पुंस्कोकिलानां मधुराव-कीर्तनैः आहिण्डमानः सरसं विराजते ॥ ५७

वसन्तरागात् पटुकीचकाग्राः वसन्त-रागेण जगुस्तदानीम् ।
वसन्त-मूर्तेः महिमानमेवं परस्पराघट्टन-वेणुनादैः ॥ ५८

सदागतिः गन्धिल-पुष्परागैः रोलम्ब-झङ्कार-पदाञ्चितैश्च ।
आहिण्डमानो नगरेषु नित्यं वाणिज्य-पारीण-इवाऽवतस्थे ॥ ५९

चित्राऽतिचित्रं बहु-वर्ण-पूर्णं वसन्तमानीय विभिन्न-पात्रैः ।
आरट्य संतोष-भरेण कामं किरन्ति वीथ्यासु जनेषु हासैः ॥ ६०

इति श्रीगीर्वाणान्ध्र-भाषा-प्रवीणेन ओगेटि-परीक्षित्-शर्मणा विरचिते विंशति-सर्गीय-यशोधरा-महाकाव्ये यशोधरा-गौतमयोः विवाहः, गौतम-पट्टाभिषेकः, वसन्तऋतु-वर्णनेत्यादि-समलङ्कृतः चतुर्थः सर्गः समाप्तः ।

पञ्चमः सर्गः।

वसन्त-विहारः।

अस्मिन् वसन्ते नव-यौवनेन सुखं स्वपत्न्या शिखरे रिरंसुः।
उद्यान-भूमिं परिवार-युक्तः गतः सुबुद्धः स्व-सखी-जनेन ॥ १

आयान्तमेनं सहसा विलोक्य पिकालि-गीतैः मलयानिलैश्च।
आश्रावयत् कोमल-मञ्जुनादं तथेति रेजे मधु-मास-लक्ष्मीः ॥ २

तथागतं गौतम-चक्रवर्तिनं सखीजनं तं परिवार-वेष्टितम्।
विकीर्य पुष्पाणि सपल्लवं तदा ददौ वनं स्वागतमाशु विभ्रमैः ॥ ३

एकान्त-देशे मधु-मास-वासिते कामान्धता-व्याप्त-मदेन दर्पिताः।
आबभ्रमुः चित्तज-भावना इव रामाः सहर्षं पुलकाञ्चितास्तदा ॥ ४

दर्पेण काचित् मधु-मत्त-भामा विलास-भावैः कुसुमाकरस्य।
धृत्वा सुवेषं पुरुषोचितं तु गुरुस्तनीं सस्मितमालिलिङ्ग ॥ ५

अन्यास्तु लास्ये निभृतं तु दक्षाः तालानुसारेण विलासवत्यः।
अन्योन्यमानन्द-मरन्द-मत्ताः ननर्तुराश्लिष्य परस्परं ताः ॥ ६

कन्या च काचित् कलहंस-याना जगौ विमत्ता कलहंस-रागम्।
सा कन्यकाभूत् प्रिय-पात्र-रूपं सर्वाङ्गना मानस-डोलिनीव ॥ ७

पपार वेणुं वदनोद्गतानिलैः स्वरैश्च तस्मिन् बहु-मूर्च्छनादिकम्।
निशम्य तत् रागमयं सुशब्दितं बभौ प्रफुल्लं सकलं जगत्तदा ॥ ८

अन्योन्यमालम्ब्य कराग्र-भागान् पदैः प्रतिष्ठापित-केन्द्र-भागाः।
आबभ्रमुः चालित-दीर्घ-वेण्यः ता नागकन्या इव वक्रयानैः ॥ ९

मनोजमाद्यत् मदिराक्षि-कामिनी विभिन्न-गन्धैः मधु-पुष्प-सौरभैः ।
विभूषिता-वृत्त-सुवर्ण-सुन्दरैः जगौ रसाऽसार-सुरागमारभिम् ॥ १०

सारङ्ग-यूथान् प्रविलोक्य रामाः सारङ्ग-झंकार-मुवलगनैश्च ।
सानन्द-संफुल्ल-सदन्तरङ्गाः सारङ्ग-रागं प्रजगुस्तदानीम् ॥ ११

ऐरावताभाः प्रचुरं वसन्ते प्रडीन-सौभाग्य-विलास-रूपाः ।
रामाः सहर्षं हसित-प्रवाहैः विभासिता गन्धिल-पुष्पगुच्छाः ॥ १२

लुलाव काचित् मदनं समर्चितुं प्रफुल्ल-पुष्पाणि सपल्लवानि च ।
तदैव कर्पूर-पराग-पाण्डुरा चकार देवं मदनं च मृत्स्नया ॥ १३

विभाव-हेवाकवती विपञ्चिकाम् अनादयत् कङ्कण-ताल-वादिनी ।
ततान तानं प्रणितैश्च निक्वणैः विडम्बयन् बम्भर-मञ्जु-गुञ्जनम् ॥१४

पलाश-पुष्पं शुक-चञ्चु-रागं विलोक्य सा भीमपलास-रागम् ।
जगौ प्रिया काचन चारु-केशी प्रभूत-कामा वर-चारु-केशीम् ॥ १५

वसन्त-रागं मधु-पान-रागिणी ललाप रागेण समन्मथा सती ।
पीयूष-हिन्दोलमनङ्ग-मोहिनी तदैव काचित् मद-शालिनी मुदा ॥ १६

सरोवरे मत्त-विहार-मग्नैः हंसैः कृतो मार्दव-हंसनादः ।
बिम्बाधराः कूजनमानिशम्य गायन्त्यहो मञ्जुल-हंस-नादम् ॥ १७

जगुश्चिरं रम्य-पदार्थ-रूपं मनोज-भावाकर-चारु-देहम् ।
प्रेमास्पदं भूपति-मोहनाङ्गं रामाः प्रियं मोहन-राग-तालैः ॥ १८

प्रवीक्ष्य तासां भुज-मूल-सुत्विषः विसिष्मिये कामुक-भाव-लोकनैः ।
विज्ञाय भावं हृदयान्तरस्थं त्रपा-भरेणैव ननाम यौवतम् ॥ १९

आस्वाद्य सीधुं विपुलैक-पात्रे ददौ प्रियायै दरहास-वक्त्रः ।
नीत्वा शनैः तन्मधु-पान-पात्रं जगाल सीधुं मदिरेक्षणा सा ॥ २०

तौ दम्पती केलि-कथासु पूर्णं ममज्जतुः विस्मृत-बाह्य-लोकम् ।
नक्तंदिवं नेति विचिन्तयन्तौ विरेमतुः काममनङ्ग-राज्ये ॥ २१

मुग्धाङ्गना काचन चारु-केशा प्रपूर्य तोयं बहु-वर्ण-पूर्णम् ।
सुकीचके रन्ध्रमये प्रकीर्णम् अवाकिरत् सादरमङ्गनासु ॥ २२

कन्या प्रलापाऽमृत-वर्षिणीव प्रियं पदार्थैरमृताधरोष्ठात् ।
विजल्पिताऽश्लीलपदावलीं तु जगौ प्रियं साऽमृतवर्षिणीं च ॥ २३

सा चक्रवाकस्तन-शोभिनी तु तच्चक्रवाकीय-कुलं प्रवीक्ष्य ।
सा चक्रवत्भ्रामित-देह-वल्ली ललाप रागं वर-चक्रवाकम् ॥ २४

नरेन्द्र-पुङ्गाय सुभाषिणी प्रियं सुगन्धिलैः चम्पक-पद्म-कोरकैः ।
विरच्य रम्यां सुमराग-मालिकां जगौ सुरागाञ्चित-राग-मालिकाम् ॥ २५

श्यामायमानां प्रकृतिं विलोक्य श्यामा तदा काचन चारु-शीला ।
समाललापेदमनन्त-गीतं श्यामा सुरागं मधुरं सुगात्री ॥ २६

ललाप सा कोमल-काम-वर्धिनीं प्रभूत-संतोष-परीत-मानसा ।
विलोक्य सर्वां प्रकृतिं विलासिनी समस्त-कान्तागण-काम-वर्धिनीम् ॥ २७

भाग्यश्रियाऽश्लिष्टमनोज्ञ-मूर्त्यै मुग्धाङ्गना-मण्डलमेव गानम् ।
आश्रावयामास विमूर्च्छनाभिः भागेश्वरी-रागममोघमाशु ॥ २८

हिन्दोल-रागेण मुदा तरुण्यः सानन्दलीलादर-मन्दहासाः ।
जगुः सहर्षाञ्चित-हावभावाः वसन्त-कीर्तिं प्रमदाः प्रमत्ताः ॥ २९

प्रवीक्ष्य तस्मिन् परिपूर्ण-चन्द्रिकां चकोर-नेत्रा प्रियपूर्ण-चन्द्रिकाम् ।
समागतं तं मलयानिलं प्रिया पदैः प्रियं सा मलयानिलं जगौ ॥ ३०

केदार-भूमिं सकुतूहलेन विलोक्य केदारमसौ ललाप ।
उदार-भावेन चकोर-नेत्रा सदार-युक्तोऽयमिति प्रहर्षम् ॥ ३१

वराऽलिपङ्क्तिः व्रजते सुमालिं मरन्द-पानाय विगुञ्जमाना ।
दृष्ट्वा भिया तच्चलनादिकं सा जगौ वरालिं मधुपान-लोला ॥ ३२

कर्पूर-पूगी-मृगनाभियुक्तम् एला-लवङ्गाञ्चित-गन्ध-पूतम् ।
ददौ च सुस्मेर-सुधापरीतं ताम्बूलमस्मै चपलाक्षिलीलम् ॥ ३३

ताम्बूलमेतत् बहु चर्वितं मुदा तस्याः सुधापूर्ण-मुखे निचिक्षिपे ।
अथ तदीयं वदनाऽभिरञ्जितं सानन्द-भावेन महीपतिः स्वयम् ॥ ३४

प्रिये त्वदीयं मुखचन्द्र-मण्डलं समीक्ष्य संयाति च नीरदन्तरम् ।
कलङ्कहीनं मृगलक्ष्म-चिह्नितो सुधांशुमाली सुतरां विलज्जितः ॥ ३५

स राजपुत्रो बहुधा च सुस्वपे यशोधरा-कोमल-बाहु-बन्धने ।
परस्पराऽश्लेषण-राग-रञ्जितौ तौ रेजतुः मन्मथ-सायकाविव ॥ ३६

भूपाल-मूर्तिं स्वकलत्र-युक्तं विलोक्य काचित् मधुरं ललाप ।
भूपाल-रागं लय-ताल-भावैः सूर्योदयं कारयतीव तूर्णम् ॥ ३७

प्रवात्ययाऽकम्पित-वृक्षचालनैः रोलम्ब-माला-कृतमञ्जु-गुञ्जनैः ।
पुंस्कोकिलानां कल-पञ्चमस्वरैः शब्दायिताः सर्व-नगेन्द्र-कन्दराः ॥ ३८

विलासिनीनां मधुराग-गानैः वीणादि-वाद्यत्रय-कर्णपेयैः ।
वेगात्पतद्भिः विमल-प्रवाहैः सर्वं जगत् नादमयं विरेजे ॥ ३९

अनन्तरं ताः सकलास्तरुण्यः सिस्नासवः स्वेदवियुक्त-देहाः ।
सरोवरं प्राप्य विमुक्त-चीराः परस्पराऽऽकृष्ट-कराग्रबन्धाः ।। ४०

प्रविश्य वेगं सरसं तटाकम् आकण्ठ-मग्नाः प्रमदा वितेनुः ।
तासां सुधम्मिल्ल-ततिः समस्ता ततान पद्माऽऽवृत-शैवलेव ।। ४१

रिरंसवस्ताः प्रमदाः सहर्षं सरोज-राजी-तृटने प्रसक्ताः ।
सरोवरे मन्द-विलास-यानैः सरोवर-श्री-चय-रूपमापुः ।। ४२

लवाम्बु-कंजात-परीवृतं तदा बभौ मनोहारि-सुपद्म-शोभितम् ।
विलासिनीनां मधु-पङ्कजाऽऽननैः वसन्त-लक्ष्मी बहुरूप-भाजिनी ।। ४३

स्नाताः च ताः संस्कृत-केशपाशाः चीरैः समावेष्टित-रम्य-देहाः ।
कुसुम्भ-रागेण विलिप्तदेहाः विरेजुरेवं वरचन्द्र-रेखाः ।। ४४

आकण्ठमग्नाः प्रमदाजनास्ताः परस्परं वारिकणैः चिखेलुः ।
तासां विलोलायत-दृष्टिपातैः बभूव राजा जलकेलि-लोलः ।। ४५

विलास-हल्लीसक-मण्डलाञ्चिताः प्रमोद-भारानत-मध्यमाः प्रियम् ।
ननर्तुरानन्द-रताः सुकन्याः रराज मोहावृत-गौतमस्तदा ।। ४६

नभस्तलाभः प्रचुरं तटाको ललास वामेक्षण-तारकाभिः ।
शान्ताकृतिः शाक्यकुलाधिपस्तु तन्मध्यदेशे मृगलक्ष्मरूपः ।। ४७

सशीकरो गन्धवहः सहर्षं संचर्चयामास छलेन तूर्णम् ।
विभिन्न-पुष्पाकर-सूनरागं गन्धानुलेपेन तदीयमङ्गम् ।। ४८

पीत्वाऽऽसवं केलि-कथासु मत्तो चिक्षेप पत्नी-प्रिय-मञ्जु-वक्त्रे ।
कपोलभागे रचिता सुवल्ली प्रमार्जिता गाढ-विचुम्बनेन ।। ४९

स चन्द्रमाः स्वीय-मयूख-तन्तुभिः उवाय कीर्ति धवलां महीपतेः ।
ततश्च शुभ्रा धवला प्रसन्नता ततान लोके सित-वस्त्र-रूपिणी ।। ५०

प्रतिक्षणं नैव जहाति चुम्बनं नितान्त-कामाऽवृतमानसा सा ।
आलिङ्ग्य तं विस्मृत-बाह्यलोका लतेव गाढं वर-रूप-भूपम् ।। ५१

सुरोहिणी-सैकत-वेदिकासु विधाय शय्यां स्तबकैश्च तत्र ।
अशोक-माकन्द-नवप्रवालैः विरेमतुः प्रेमरसे मधौ तौ ।। ५२

छलेन सुप्तां तरुणीं यशोधरां समेत्य कामं रस-निस्तुलं भृशम् ।
कपोलदेशं मुकुरात् विनिर्मलं चुचुम्ब मत्तः सरसः पदे पदे ।। ५३

प्रियं तदा चुम्बन-लग्नचित्तं स्वयं प्रकामं मनसा निपीय ।
उरोज-भारे पुलकान्विता सा संवाहयामास पिनद्धबाहा ।। ५४

स्मरोऽपि चन्द्रे निकषोपलेऽस्मिन् उल्लीढयामास सुपञ्च-बाणान् ।
बभूव चन्द्रे परिदृश्यमाना सा कालिमा चित्तज-मन्थिनीव ।। ५५

हे कामिनि! त्वं खलु जीवितं मे संपूर्ण-जन्मान्तर-पुण्यलभ्या ।
इति प्रजल्पन् परिरभ्यगाढं निनाय तां भावज-तन्मयत्वम् ।। ५६

शेफाग्र-संमार्जित-योनिरन्ध्रो जलायितं मन्मथ-केलियोग्यम् ।
शयेन तस्याश्च नितम्ब-भागं विमर्दयामास मदेन भूपः ।। ५७

यशोधरा गौतम-काम-दण्डं हस्ते गृहीत्वा निबिडं चकार ।
मदेन तस्याः मदनालयं तु लिलेह जिघ्रन् वृषभायमानः ।। ५८

संयोगकाले स्मरभावचित्रैः अज्ञात-शीत्कार-रवप्रभूतैः ।
बउब्रित-चेष्टाकृत-बाहु-बन्धैः विरेजतुः फूत्कृत-नागबन्धैः ।। ५९

तदा समारब्ध-रति-क्रियायां प्रकर्ष-पाण्डित्य-विलोकने परौ ।
मृदङ्ग-शब्द-क्रममारभेतां परस्पर-श्रोणि-विघट्टनाङ्गैः ॥ ६०

विलासिनी काम-निमीलिताक्षी मग्ना दृढं सा सुरत-प्रसङ्गे ।
चकार रम्यं मणितं सरागं पारावती-रावमिवाऽत्त-तृप्त्या ॥ ६१

यशोधरा काममनङ्ग-तप्ता भर्त्रा मनोज्ञं रति-पण्डितेन ।
भुक्त्वा रसं सा सुरत-प्रसङ्गे तृप्ति न लेभे रति-भावरूपा ॥ ६२

द्राक्षोपमाभ्यां घन-चूचुकाभ्यां तदीय-देहं प्रसभं सुमुद्रितः ।
प्रतिक्षणं वर्धित-काम-भावा भूपं न तत्याज सुखावधौ सा ॥ ६३

तथापि सा नैव जहाति भूपं पदे पदे काम्यति तं पुमांसम् ।
तस्याश्चिरं भावज-रूपितायाः चिकीर्षतीहा पुरुषायिताय ॥ ६४

तदीय-भावं सहसा विदित्वा दिदेश रामां पुरुषायिताय ।
अयं नरेन्द्रः परमानसज्ञः विलास-भावाकर-चारु-मूर्तीम् ॥ ६५

सकुण्डलालङ्कृत-कामरूपिणी यशोधरा चञ्चल-चञ्चलाभगा ।
चकार कामं पुरुषायितं चिरं प्रभूत-वैयात्य-गुणेन सत्वरम् ॥ ६६

कुचाग्र-भास्वत् प्रियचूचुके-दृढं कराग्रभागैः प्रचुरं निपीड्य ।
शीत्कार-रम्यं तरुणी-मुखाब्जं जुगुञ्ज कामं भ्रमरः पदे पदे ॥ ६७

आलिङ्ग्य तस्यास्तन-मण्डलं तु नियोज्य योन्यां मद-मेढ्र-दण्डम् ।
गण्डूष-फूत्कार-विचुम्बनैश्च ततार भूपो रस-भावनाब्धिम् ॥ ६८

आरभ्य किंवा खनतामगाधम् चिराय घर्माविल-देहिनौ तौ ।
अज्ञातवन्तौ प्रणयाब्धि-तीरं विश्रान्ति-भावं सपदं विजग्मतुः ॥ ६९

अन्योन्य-बाहा-परिरम्भणेन नितम्ब-बिम्बोपरि लुण्ठनेन ।
तौ दम्पती प्रेमरसे निमज्य वितेरतुः सौख्य-पयोधिमाशु ॥ ७०

परस्परं तौ विवशौ विचक्रतुः समस्त-वात्स्यायन-कामबन्धान् ।
विलोक्य तत्सर्वमिदं समागमं वसन्त-मूर्तिः निभृतं सरागः ॥ ७१

उत्सङ्गदेशे विनिमय्य भामा तदीय-शीर्षं पृथुले च मांसले ।
संतोषयामास रतिश्रमालुम् आकर्ण-लोलायत-वीक्षणैश्च ॥ ७२

यशोधरा काम-वितप्त-देहं विलासिनीभ्यः सुखदायिनं तम् ।
प्रेम्णा वरं गौतम-राजपुत्रं संवीजयामास पटाञ्चलेन ॥ ७३

संयापयामासतुरार्द्र-भावैः अन्योन्य-वाणी-रत-मानसौ तौ ।
विना न किंचित् मति-भेदमास्ताम् आत्मैक्य-भावेन च भिन्न-देहौ ॥ ७४

एवंविधैः चित्र-विचित्र-कार्यैः रात्रिंदिवं तौ यभधातु-भावम् ।
अद्वैत-भावेन रसार्णवे तौ संप्राप्य तृप्तौ मदनस्य राज्ये ॥ ७५

इति श्रीगीर्वाणान्ध्र-भाषा-प्रवीणेन ओगेटि-परीक्षित्-शर्मणा विरचिते विंशति-सर्गीय-यशोधरा-महाकाव्ये वसन्त-विहार-समलंकृतः पञ्चमः सर्गः समाप्तः ।

षष्ठः सर्गः ।

सूर्योदय-वर्णनम् ।

उदेति भास्वन् विलसद्द्रुमाभः प्रबोधयन् जीवन-संततिं च ।
कर्तुं यथापूर्वमहः पतिः स्वयं महीतले कर्म-निमग्न-संततिम् ।। १

ब्राह्मी-मुहूर्ते निखिल-प्रपञ्चं जागर्ति तस्मिन् खलु कार्य-सक्तम् ।
पूर्वा दिशा ज्ञानमय-प्रभाभिः प्रदोषकालं विशदं तनोति ।। २

ब्राह्मी-मुहूर्तात् चतुरोदितश्रीः सहस्र-वर्णाञ्चित-रागिणीव ।
प्राचीं दिशं स्वीय-तनु-प्रकाशैः संमार्ज्य मार्गं कुरुतेऽरुणाय ।। ३

स चारुणोऽनूरु-तनुप्रभावः सप्ताश्वबद्धं मनसानुमेयम् ।
रथं समारुह्य धरातलस्य चेष्टां दिदृक्षुः सहसाऽवतीर्णः ।। ४

कान्तिच्छटाभिन्न-तमिस्र-लोकं विधाय लोकाय ददौ विकासम् ।
कान्ति-प्रपूतानि दिगन्तराणि नीत्वा जनेभ्यः सलिलाऽर्घ्यपाद्यान् ।। ५

अजस्र-भू-रक्षण-दीक्षितोऽयं सहस्र-भानूदय-मूलकन्दः ।
ज्योतिश्चमू-जीवन-रक्षकश्च त्रयीमयश्चाक्षुष-दिव्यमूर्तिः ।। ६

शनैः शनैः तामस-घस्मराङ्गः प्राची-मुखालंकृत-रागचिह्नः ।
आकाश-कासार-सहस्र-पत्रं प्रत्यक्षदैवं वितनोति लोकम् ।। ७

उषोऽङ्गना चारु-विचित्र-ऋग्भिः विरच्य रम्यं बहुरङ्गवल्यः ।
आकाशमार्गं शतधा सुवर्णैः प्रकल्पयामास विनाऽवरोधम् । ८

सहस्र-पत्राणि सरोवरेषु हंसाश्च कारण्डव-चक्रवाकाः ।
लसन्ति रम्यं विचरन्ति कामं महौजसं लोकपतिं प्रवीक्ष्य ।। ९

निद्रोत्थिताः सर्व-दिशः प्रहर्षं विलोक्य सूर्यं तमनुव्रजन्त्यः ।
महोज्ज्वलैः तस्य हिरण्यरुग्भिः प्रक्षालिताः भान्ति तनु-प्रकाशैः ॥ १०

विज्ञान-शास्त्रौघ-निदान-भूतं भिषग्वरं लौकिक-शिल्पिनं च ।
प्रपञ्च-भूताऽदिक-मूलभूतं विभावसुं स्तौति धरातलोऽयम् ॥ ११

गौतम-नगर-संदर्शनम् ।

इत्थं व्यतीते मधुरे वसन्ते विचारयामास हठात् स राजा ।
एवं प्रपञ्चः सततं प्रनन्देत् नो चेत् हि सर्वः सुतरां च क्रन्देत् ॥ १२

तस्मिन् वसन्ते वसुधाधिपोऽपि राज्ये जनस्याऽत्मसुखं दिदृक्षुः ।
तेषां च कृत्यं विमलं सुशीलं मनोहरं शान्तमनाः चकाङ्क्षे ॥ १३

सितातपत्रेण समञ्चितं रथं नवांशु-सप्ताश्व-जवीय-वाजिनम् ।
विचित्र-रत्नावलि-चारु-मण्डितं स गौतमोऽधिष्ठितवान् विदर्पितः ॥ १४

दृष्ट्वा पुरीं चित्रित-दीपपङ्क्तिम् आनन्द-संभार-भरेण नित्यम् ।
विलासिनी-प्रेक्षण-मालिकाभिः तुतोष राजा नितरां स्वराज्यम् ॥ १५

रे चन्न! सर्वो मम जीवलोकः विराजते सौख्यमयेन-गत्या ।
जातोऽस्मि सुक्षत्रिय-वंशमूर्तिः सार्थक्यमेवाऽत्र मदीय-नाम ॥ १६

पौराङ्गनाः सादरमेव तत्र भूपालमूर्तिं समवेक्ष्य रम्यम् ।
प्रदाय नीराजनमार्तिं च पवित्रलाजान् समवाकिरन् ताः ॥ १७

एवं प्रकर्षेण विलोक्य सर्वं हठादपश्यत् क्षतगात्र-कुष्ठम् ।
नासाङ्गुलीभिः विकृतं कुरूपं दूरे चरन्तं विकलाङ्गमेकम् ॥ १८

गत्वाऽग्रभागे स ददर्श वृद्धम् अक्ष्णा च काणं नतमध्यमाङ्गम् ।
पादत्रयेण स्खलितं प्रयान्तं जराविशीर्णं तनुरल्लकात्तम् ॥ १९

ततः प्रयान्तं शवमेकमाशु नरैश्चतुर्भिः सविषादभावैः ।
श्मशान-भूमिं च विनीयमानं ददर्श भूपः स्थगितो दयावान् ॥ २०

पप्रच्छ तं सारथिनं महीपतिः किमेतदित्याकुल-वीक्षणो भिया ।
उदीरितं तेन सदा प्रपञ्चकं तथैव यातीति विनावरुन्धनम् ॥ २१

अचेतनं चेतनमेति शून्यं सर्वं प्रपञ्चे परिदृश्यमानम् ।
प्रयाति हा ! कालविपर्ययेन जीर्णं विशीर्णं मिलितं धरित्र्याम् ॥ २२

मायावृतः सत्यमयं प्रपञ्चः क्षणे क्षणे नूतनमेति दृश्यम् ।
दृश्यं प्रयात्येवमदृश्यभावं सर्वं जगत् भ्रान्तिमयं नरेन्द्र ॥ २३

महानुभावाः जनिताः धरातले पुरा नरेन्द्राः सकलाः दिवंगताः ।
जगत्समस्तं क्षणिकं विचेतनं वयं च सर्वेऽद्भुत-बुद्बुदाः परम् ॥ २४

धिगस्तु मे जीवनलोलुपत्वं धिगस्तु कामेक्षण-यौवतं च ।
कथं प्रपञ्चं भजते जनोऽयं किमर्थमेवं मरणं प्रयाति ॥ २५

यशोधरा मे तरुणी विलासिनी लभेत भीमां विषमां दशामिमाम् ।
रथं मदीयं चपलं च सारथे ! निवर्तयस्वेति शशास दारुणम् ॥ २६

रे चन्न ! नूनं विदितोऽस्मि सत्यम् अन्धोऽस्मि जातः खलु काम-राज्ये ।
विलास-रूपं च विलाप-भूतम् अन्वेष्टुमिच्छामि च मूलरूपम् ॥ २७

एवं विषादापहृतस्वभावः पेदे कराम्भोज-गृहीत-शीर्षः ।
उन्मत्तदृग्भिः सहसा विलिप्तः चित्राकृतिं प्राप नृपः तदानीम् ॥ २८

निर्लिप्तताक्रान्तममुं नरेन्द्रं दृष्ट्वा च शुद्धोदन-चक्रवर्ती ।
विषादरूपं परमाप्तवाचो बभाण तं सादर-सान्त्वनाभिः ॥ २९

चन्नस्तु सर्वं निजगाद तस्मै यथाक्रमं गद्गद-रुद्ध-कण्ठः ।
प्रतोलिका-दृष्ट-र्तिं च राज्ञा भयेन सान्तं विपुलं वचोभिः ॥ ३०

असाम्प्रतं साम्प्रतमेव यूनां हे राजपुत्र भवदीयभावः ।
भजस्व भोगान् मधुयौवने त्वं जपस्व मोक्षाय परं जरायाम् ॥ ३१

एतादृशी भूभुज-वंशजानां स्थितिः क्रमेणादरणीय-रूपा ।
यद्यत्प्रियं तत्प्रथमं विधीय वंशोन्नतिं कल्पय राजमौले ॥ ३२

श्रुत्वा परं स्वीयगुरोः वचस्तदा व्यजिज्ञपत् तं बहुधा व्यथाकुलः ।
गुरो! मदीयं दृढनिश्चयं पुनः न कोऽपि लोके विफलं करिष्यति ॥ ३३

यदीदमेवं सकलं कलामयं नवं वपुः नश्वरमेव भूयते ।
यदत्र लोके मरणं सदाऽस्ति चेत् तथा च को लोकपदस्य भावः ॥ ३४

कथं नु लोके ज्वररुग्मपीडिताः जना भवन्त्यत्र प्रकुष्ठरोगिणः ।
किमर्थमेवं पलिताश्च जन्तवो वदस्व काणा बधिरा भवन्त्यहो ॥ ३५

सृष्टिः कदाऽभूत् कथमेवमासीत् कोऽयं नियन्ता जगतः स्वयंभूः ।
अन्यः कथं विन्दति दुःखभारं किमर्थमेको भजते सुखालिम् ॥ ३६

श्रुत्वा तदीयं दृढनिश्चयं तु पिता तदा व्यापृतचिन्तनात्मा ।
वातानुकूलान् विपुलांश्च सौधान् शीतोष्णयोग्यान् विचकार तूर्णम् ॥ ३७

योऽयं पुरा सर्वकलाप्रपूर्णः पुपोष देहं बहुभोग-मग्नः ।
स एव पेदे सहसा नरेन्द्रो शशाङ्करेखेव तनिम्नतां च ॥ ३८

तच्चन्द्रशाला-भवने सतीनां मध्यं च गत्वा विमुखो बभूव ।
राजा सुखी यौवतसौख्यपायी विरागिणां नैव भवन्ति रागाः ।। ३९

जगौ तदा चारुमती ललामा प्रफुल्ल-पुष्पाञ्जलिना प्रणम्य ।
कर्तुं नरेन्द्राय च गौतमाय यथाप्रियं चारुमतिं सरागम् ।। ४०

अलङ्कृतो नैव विराजते प्रियं तदीयदेहो विपुले सुखासने ।
मनस्तु चिन्ताव्यथितं ययौ वनं परिभ्रमत् दुर्गम-दुर्ग-भूतले ।। ४१

नहि क्षणं पश्यति तत्र यौवतं सदा स्वचित्ते प्रबलं च तप्तः ।
विलोक्य तन्मानसरङ्गमण्टपे प्रतिक्षणं चित्रितलोकचित्रणाम् ।। ४२

सूर्यास्तमय-वर्णनम् ।

आलोक्य सर्वं धरणीतलाभं संचारपूतं च विधाय सान्तम् ।
शक्तिःप्रकाशामलजीवनं च दत्त्वा स्वगेहं तपनः प्रयाति ।। ४३

वसुंधरां-तीक्ष्णकरैः सहस्रैः संतोषयित्वा युवती जने च ।
वितीर्य रागं तरणिः प्रयाति प्रायेण सन्तः सकलं त्यजन्ति ।। ४४

दिनान्तकाले गतनिःस्पृहोऽपि प्राप्नोति रागं तरणिः प्रियालुः ।
सायं प्रतीची स्मरणादितीव रक्तः परं भाति विरागमूर्तिः ।। ४५

संध्यारुणश्रीः प्रियमण्डनाभूत् समागतं तं तरुणार्कबिम्बम् ।
सा निस्तुलाभाकृत-रागलिप्ता स्वकीयहेलां लुलुकेम्बुधौ प्रिया ।। ४६

सा पश्चिमाशा वरुणात्मजेव संध्यारुणाभाच्छविलिप्ततोयैः ।
संध्यानटत्र्यम्बकतीक्ष्णदृग्भिः कपर्दरागच्छविदीप्तकाष्ठैः ।। ४७

दिदृक्षया किं बहिरेवमासीत् इतीव सा सागर-बाडबेऽयम् ।
अन्तःस्थिताशार्णवमध्यशायी लोकस्थितिं जीवन-चारु-शोभाम् ॥ ४८

विलोक्य देशं तपनः प्रहर्षं गृहोन्मुखोऽभूदिति सर्वलोकः ।
सायं स्वगेहं सकलार्थ-साध्यैः भावैः परं याति विशीर्णदेहः ॥ ४९

तं पश्चिमाशाङ्क-विलुठ्यमानं समीक्ष्य पूर्वा गत-निःस्पृहेयम् ।
ररौ विमुक्ता तमसावृता च विचित्रतारेक्षण-जीवनाऽसीत् ॥ ५०

इतस्ततोक्षिप्त-महाग्निरूपं प्रातः-समारभ्य वितप्यमानम् ।
कालः परं कन्दुकवद्विधाय महार्णवे क्षिप्यति शान्तिमाप्तुम् ॥ ५१

आलोक्य सर्वं निभृतं चराचरं संसार-भारैः सुखदुःख-भाजिनम् ।
आत्मीय-कालभ्रमणाभिभूषितं विरक्तभावः तपनः तिरोदधे ॥ ५२

इति श्रीगीर्वाणान्ध्र-भाषा-प्रवीणेन ओगेटि-परीक्षित्-शर्मणा विरचिते विंशति-सर्गीय-यशोधरा-महाकाव्ये सूर्योदयवर्णन-गौतम-नगर-संदर्शन-सूर्यास्तमयवर्णन-समलङ्कृतः षष्ठः सर्गः समाप्तः ।

सप्तमः सर्गः ।

यशोधरा-सीमन्तोत्सवः ।

कालक्रमेणाऽथ कठोरगर्भम् उवाह तन्वी पटुभारभूतम् ।
कपोलपाली कृशतां प्रपेदे सुमध्यमा पीवरतां च भेजे ॥ १

बहूनि वस्तूनि विकाङ्क्षते ह्रिया कदापि सा नैकमपीहयाऽश्नुते ।
विवर्धमानोदरमन्दगामिनी यदश्नुतं तद् वमते पदे पदे ॥ २

स्तनद्वयं पङ्कजकोरकप्रभं बभूव रम्यं पटुसान्द्रवर्तुलम् ।
ललास तच्चूचुक-युग्मकं तदा द्विरेफ-संभार-कुशेशयं यथा ॥ ३

मृत्स्ना विभूतिं बहु खादते सा परं मृदामोदपरीप्सलास्या ।
शरीरकान्त्या जितधात्रिवर्णा सरत्नगर्भेव परं विरेजे ॥ ४

प्रभूतगर्भालसविह्वलाङ्गी तदा तदा भूमितले निषण्णा ।
विषण्णभावास्पद-चारुगात्री शय्यां सदा काङ्क्षति गुर्विणी सा ॥ ५

एवं च षाण्मासमनूह्य तन्वी विचित्रभावाविलतन्द्रितास्या ।
निर्माय शून्ये नवभव्यसौधान् सेहे स्व-गुर्वीमपि गर्भबाधाम् ॥ ६

यशोधरां सप्तम-मास-वेशिनीं कठोर-गर्भावृत-खिन्न-गात्रीम् ।
विकल्पयामास विलोक्य यौवतं सीमन्त-संतोष-महोत्सवं प्रियम् ॥ ७

उपाविशत् रत्न-वितर्दिकायां सा गुर्विणी सप्तम-मास-भासिनी ।
नानाविधैः मण्डन-रत्न-जालैः वसुन्धरेवात्त-फलोन्मुखाय ॥ ८

शशंस काचित् मधुर-स्वरेण श्रीराग-युक्तं दर-हास-वक्त्रम् ।
प्रसूष्व राज्ञीति प्रियं वचोभिः प्रहर्ष-संफुल्ल-मुखारविन्दा ॥ ९

हर्षेण ताः कुङ्कुम-गन्धलिप्ताः भामास्तदानीं वलयाङ्गदानि ।
आरोपयामासुरहो क्रमेण प्रकर्ष-माद्वीक-प्रकोष्ठ-भागे ॥ १०

सीमन्तिनी पुष्प-लवङ्ग-पूगान् आनीय रामा-कर-नीरजेषु ।
समर्प्य गन्धागरु-कुङ्कुमेन चकार सीमन्ततले सुरेखाम् ॥ ११

कुमारतुल्यं भवती कुमारं भजस्व लोके जित-चन्द्र-कीर्तिम् ।
ग्रहानुकूल्याभिमते सुकाले वसुन्धरापालनदक्षगात्रम् ॥ १२

सुगन्ध-पात्रेण परीमलाङ्गी विलासिनीनां निकटे विलासैः ।
समेत्य तासां गलसीमभागे संचर्चयामास करेण गन्धम् ॥ १३

रोलम्ब-लोलालक-चित्रितास्या नारङ्ग-दाडी-कदली-फलानि ।
शामन्त-चाम्पेय-लतान्त-जालं दत्त्वा रमाभ्यः चिकुरान् ससज्ज ॥ १४

तदैव बिब्बोकवती सलीलं सकङ्कण-क्वाण-विलास-जालैः ।
कस्तूरिका-कुङ्कुम-मिश्रणेन ललाट-देशे तिलकं चकार ॥ १५

अनन्तरं कैशिक-भाररम्या हारिद्र-रागाक्षत-शस्तहस्ता ।
हस्ते गृहीत्वा वनिताब्जपादान् लिलेप हारिद्र-रसं नताङ्गी ॥ १६

विलासिनी काचन रौप्यपात्रे लाक्षारसं प्रेमरसानुरूपम् ।
प्रपूर्य तासां पदनीरजेषु प्रारञ्जयामास कलाप्रवीणा ॥ १७

ताम्बूल-पूगी-फल-शूर्पवाहिनी तत्रत्य-नारीगण-संनिधिं गता ।
दत्त्वाङ्गनाभ्यः सकलं सकौतुकं रेजे मुखाम्भोज-मिलिन्द-कुन्तलैः ॥ १८

आरञ्जयत् सा मुखमण्डलानि संध्यारुणाभा कमलोपमास्या ।
आनीय पात्रे मृदु-केतकी-रजः सीमन्त-शोभाकर-कामिनीनाम् ॥ १९

अन्या नुताङ्गी कलमर्दलस्वनैः कन्या च काचित् क्वण-वीणया प्रियम् ।
आनन्द-शय्यामधिडोलिनीमिव कल्याण-रागेण चकार भामिनी ॥ २०

तदालिक-स्वेद-विचित्र-भाला निःश्वास-सोच्छ्वास-गुरुस्तनीव ।
स्वेद-प्रसिक्तातिमनोहराङ्गी ददौ प्रियं खाद्य-चयं रमाभ्यः ॥ २१

तत्रत्य-वासन्त-समीरगन्धः वहन् सदाह्लादकरं तनोति ।
आबाहुमूलाङ्गज-शोभितानां सीमन्त-शोभा-विलसत्-प्रियाणाम् ॥ २२

वसन्त-कल्याण-वरालि-रागैः मधुस्वरैः पेशल-कण्ठ-नादैः ।
चकार रामा कलनिःस्वनैश्च संगीत-शालामिव सौध-शालाम् ॥ २३

चन्द्रोदय-वर्णनम् ।

सा तामसी चन्द्रकरैः सहर्षम् आकृष्टवस्त्रा पुलकाञ्चिताभूत् ।
तां तामसीं तामस-सौख्यकाङ्क्षी मुदान्वभूत् मन्मथ-राज्य-सौख्यम् ॥ २४

कालाम्बरादेश-विकीर्ण-कुन्तला कराल-कालीव विनीलडम्बरा ।
तमिस्रया लिप्त-दिगन्त-रूपिणी शशाङ्क-बिम्बेन बभौ विचुम्बिता ॥ २५

कलङ्कयुक्तोऽपि सुधामरीचिभिः कलानिधिः क्षीरमहार्णवाम्बरे ।
प्रकाशतेऽसौ नवनीत-पिण्डवत् मायासुतस्यास्य पवित्र-कीर्तिवत् ॥ २६

द्विरेफ-मालालक-वक्त्रबिम्बं समीक्ष्य कामं रजनी च खिन्ना ।
प्रतिक्षणं भाति कला-विहीना उषोदये मत्सर-भावपूर्णा ॥ २७

निद्राभिरामा पटु-विह्वलाङ्गी निर्दुष्ट-रूपावयवाच्छरूपा ।
चित्रार्पिताकार-सुरागरेखा ररञ्ज चन्द्रेण विचुम्बिताऽस्या ॥ २८

राजवन्ती लोल-विलास-तारका कलान्विता कालिम-वर्णचित्रिता ।
ललास सा तामस-भावनिर्गुणा यशोधरा पावन-जीवनाभगा ।। २९

मरुप्रदेशोद्भव-धूसरोष्ट्रवत् ग्लौबिम्ब-मूर्तिः प्रचुरं विहायसे ।
विभावमानो विचरन् प्रवीक्ष्य तां नितान्त-चिन्ताभर-रूपमाप सः ।। ३०

ज्योतिष्मती स्त्रीगुणलालसा त्विषा विराजमानाप्युडुराज-कान्तिभिः ।
क्लिश्नाति चित्ते गतचन्द्रमास्तुरं भवेयमित्याकुल-मानसा भिया ।। ३१

मूर्तीकृता पापतमिस्र-पुञ्जैः ज्योत्स्ना-परीता मदभावपूर्णा ।
आनन्द-भारावृत-जीवनाऽपि लोभावृता संकुचितेव भाति ।। ३२

गूढक्रिया-सक्त-विलोचनाञ्चलैः ज्योत्स्नांशुक-प्रावरणा-प्रभास्वरैः ।
संधाय चन्द्राननमम्बराञ्चलैः आभासते गोप्यरतिक्रियापरा ।। ३३

BHARATIYA VIDYA BHAVAN
Kasturba Gandhi Marg
New Delhi-1

यशोधरा-स्वप्नः ।

महर्हंशय्यागत-मन्थराकृतिः यशोधरा गर्भवती प्रकामम् ।
असेत-संतान-मनोरथेव गर्भालसायास-भरेण मूर्तिः ॥ ३४

प्रसूति-वेलामभिकाङ्क्षिणी सा प्रमोद-संदोहल-दोलिनी भृशम् ।
कामं स्वपन्ती भयदायिनं तदा स्वप्नत्रयं दृष्टवती सुयोगिनी ॥ ३५

आलोक्य भीता वृषभेश्वरं तुरं सास्ना-ककुद्-शृङ्ग-महोग्ररूपिणम् ।
हुङ्कार-वेगात् दलितान्तरालकं तत्पत्तन-श्रीचय-मुष्टधाविनम् ॥ ३६

बिडौजलोके चटुला पताकिनी परैः विभग्नेव भिया विलोकिता ।
तदीय-देशे रमणीय-केतनं निधाय यातं खल-मण्डलैः तदा ॥ ३७

तस्याः कराभ्यां गलितानि भूमौ अनेकवर्णाञ्चित-कङ्कणानि ।
भग्नानि वेगात् शतधा कृतानि तथेति दुःस्वप्नवती बभूव ॥ ३८

उत्थाय तूर्णं विकृतास्य-लास्या स्वेद-प्रसिक्तेन मुखाम्बुजेन ।
अकिंचनज्ञा पटु-शुष्क-वक्त्रा किमेतदासीदिति वेपमाना ॥ ३९

वैक्लव्य-भावावृत-गुर्विणी सा प्रभुं स्वभर्तारसमं नरेन्द्रम् ।
आसाद्य सर्वं चरितं विदृष्टं न्यवेदयत् भीत-परीत-चित्ता ॥ ४०

श्रुत्वा तदीयां व्यथितां कथां च प्रसान्त्वयन् तां नृपतिर्बभाण ।
यशोधरे मे हृदयं द्वितीयं न किञ्चिदत्रास्ति भयस्य हेतुः ॥ ४१

इति प्रियं चुम्बनमाचरन् तां नीत्वा स्वकीये मृदु-बाहुमध्ये ।
ममार्ज हस्ताग्ररुहैः पतन्तं कवोष्ण-बाष्पं समयानुचारी ॥ ४२

उवास तस्मिन् मृदु-बाहु-बन्धने यशोधरा-भीषण-भाव-संकुला ।
शिरोधरां स्कन्धतले निवेश्य लतेव भूजं बहुगाढवेष्ठिता ॥ ४३

तथा परिष्वङ्गन्य विलग्नचित्तां राजा बभाणेदमतीव शान्तम् ।
यशोधरे प्राणसमे भजस्व निर्भीक-भावेन लतान्त-शय्याम् ॥ ४४

सा लालिता प्रेम-रस-स्वरूपा विकम्पिता दैन्यपरीत-भावा ।
लतान्त-शुक्लाम्बर-तुल्य-देशे सुष्वाप गाढं बहु-वेदनात्ता ॥ ४५

इति श्रीगीर्वाणान्ध्र-भाषा-प्रवीणेन ओगेटि-परीक्षित्-शर्मणा विरचिते विंशति-सर्गीय-यशोधरा-महाकाव्ये यशोधरा-सीमन्तोत्सवः, चन्द्रोदय-वर्णनं, यशोधरास्वप्नेत्यादि-समलङ्कृतः सप्तमः सर्गः समाप्तः ।

अ ष्ट मः स र्गः ।

यशोधरा-प्रसवः ।

सुपुष्परम्योपवने प्रभूते रम्यं विशालं भवनं हैम् ।
तस्मिश्च सौधे वनिता विभाति विद्युत्-यथा वारिधरे विशाले ॥ १

प्रगाढ-निद्रानुरता मनस्विनी सिताम्बराच्छादित-तल्पमध्यगा ।
रराज नूनं शरदिन्दु-विम्बवत् प्रसन्न-सौन्दर्य-सुधा-मरीचिभिः ॥ २

यशोधरेत्याकथितं स्वपूर्वजैः सुनामधेयं मधुरं च शैशवे ।
ध्रुवं नु बाभाति यशोधरेव सा प्रसाद-माधुर्य-गुणाभिभूषिता ॥ ३

निद्राति सा दक्षिण-पार्श्व-भागे विन्यस्य शीर्षं मृदु-बाहुदेशे ।
वामं पदं दक्षिण-पार्ष्णि-मूले तृतीय-संख्येव तनोः विलासैः ॥ ४

यशोधरायाः सविधे प्रदीपिका मुदा स्वदीप्त्या नितरां विगर्विता ।
विलोक्य सर्वाङ्ग-विलासिनीं तदा रराज सा धूम्र-मुखीव निश्चला ॥ ५

सर्वं जगत् स्वप्न-दशानुरक्तं निःशब्दतां प्राप्य बभौ निशीथे ।
नक्षत्रतारागण-संततिश्च विधुत्विषाऽच्छादित-शून्य-देशे ॥ ६

हिमांशुरेखेव सिताम्बरे चिरं सुखप्रसुप्तां तरुणीं निशाकरः ।
विलोक्य नूनं चिरमुत्सुकस्तदा क्षपात्यये याति भियेव पाण्डुताम् ॥ ७

ललाटपर्यस्त-विशीर्ण-कुन्तलाः प्रदर्शयन्त्यः सततं स्वयंभुवा ।
विलिख्यमानाक्षर-पङ्क्ति-शोभिनो यशोधरा-प्रोषित-भर्तृका ध्रुवम् ॥ ८

पुञ्जीकृता कान्तिमती प्रगाढं चैतन्यरम्या शरदीव गङ्गा ।
अनेकभावाकृतिदिव्यरूपा ललास सौन्दर्यमयीव निद्रा ॥ ९

ललाट-देशोद्‌गम-रागरेखा पेदे सुदीपाङ्कुर-भावसाम्यम् ।
अपाङ्ग-पात्रे विबभूवतुस्ते सधूम्ररेखे विनत-भ्रुवौ च ॥ १०

असूत बालेन्दु-समान-बालकं प्रशान्तकाले तरुणी यशोधरा ।
जगत्प्रशान्तैः सुमनोज्ञ-वायुभिः ललास तस्मिन् समये प्रसन्नता ॥ ११

तदन्तिके रत्नसमप्रदीपो बभौ फणीन्द्राकृति-दारुदेशे ।
तौ रक्षितुं किं स्वयमेव शेषः जागर्ति तस्मिन्निति मे वितर्कः ॥ १२

अरिष्टगेहो घनसार-वासितैः ललास ताम्बूल-पटीर-चन्दनैः ।
सुरामठैः चारु-मृगीमदैः चिरं प्रसूति-गन्धैः नितराम् अनाविलैः ॥ १३

कुमार-देहोद्‌गमकान्ति-पुञ्जकैः विराजितं तन्निभृतं निकेतनम् ।
समस्त-दीपाश्च हतत्विषोऽभवन् सूर्योदये त्यक्त-रुच-प्रभा इव ॥ १४

तदर्भकोत्पन्न-विचित्र-कान्तिः प्रसूतिगेहं धवलीचकार ।
नो चेत् तदा दीपशिखा हि नूनं प्रभामहत्या च विचित्र-भाभिः ॥ १५

बालं तदा पल्लव-पुञ्जरूपं संचालयन्तं लघु-पाणिपादम् ।
तदा तदाक्रन्दनरक्तिमाङ्गं विलोकयन्ती हसति स्म माता ॥ १६

आलोकयन्ती स्व-सुताननेन्दुं सौधानि निर्माय मनोज्ञ-भावैः ।
अचेतना सा सपदि प्रपेदे निद्रां विलोलायतचारुनेत्रा ॥ १७

प्रशान्त-तल्पे सुत-सून-गुच्छे लोलालका घर्मकणाञ्चिताऽस्या ।
प्रसन्नभावा जघनाति-रम्या भेजे चिरं गाढसुषुप्त्यवस्थाम् ॥ १८

सा पुत्रगात्रं करपल्लवेन संछाद्य वात्सल्यवती प्रभाति ।
यथा प्रियं स्वीय-नवोद्‌गमं च सूनं सदा पल्लव-पत्रवर्गः ॥ १९

सिताऽरविन्दच्छवि-भासमाना यशोधरा सा परिधान-रम्या ।
रेजे तदीयार्भकदेहभाभिः प्राचीव संध्यावृत-बाल-सूर्यः ॥ २०

यशोधरा सैकतरूप-शोभिनी शरीरलावण्यजलामलाशुभा ।
मनोऽज्ञ-हंसोपमितेन सूनुना बभौ प्रसन्ना शरदीव जाह्नवी ॥ २१

सुरोहिणी निम्नग-वक्र-भामिनी हिमालयाच्छच्छवि-तल्प-मध्यगा ।
नवोनवोत्पन्न-शरीर-शोभया भ्रेजे स्वयं मूर्तिमतीव शुभ्रता ॥ २२

मुखाब्ज-निष्यन्द-मयूख-पुञ्जैः व्यराजि पिण्डीकृतचन्द्रकान्तिः ।
पुरी-प्रभाकारित-दिव्यगात्री यशोधराऽकार-यशोधरेव ॥ २३

पून्जीकृता हैममिवाच्छ-भासा ज्योत्स्ना-प्रवाहामल-चारु-शुक्ला ।
प्रशान्त-भावा मुकुरोपमास्या जिगाय कान्त्या वरराज्य-लक्ष्मीम् ॥ २४

विशाल-शय्यातल-सुप्तमूर्तिः यशोधरा वञ्चित-जीवना स्यात् ।
यथा च नीहार-नगे नदीव प्रपूतचारित्र्य-सुजीविता सा ॥ २५

बभौ सबालः परिधान-मण्डले विवर्ण-जीर्णे मृदुलेऽपि भाससा ।
तथा प्रियं शैवल-जाल-विस्तरे सरोवरे पङ्कजकुड्मलं यथा ॥ २६

तदा तदा शैशवचापलात् भृशं विचालयन् स्वीय-मनोहराङ्गकान् ।
पयोधरार्थं यतते पयोधरे विगुञ्जमानः प्रचुरं विरोदिति ॥ २७

इति प्रियं तं स्वकराङ्गुलीभिः प्रेम्णा स्पृशन्ती मधुरं ललाप ।
रे पुत्र ! मे जीवित-जीवदायी स्वपस्व तूर्णं बहु चञ्चलोऽसि ॥ २८

तथापि माता बहु-सुप्त-भावा करेण चोलं शिथिलं विधाय ।
तमर्भकं स्वीय-पयोधरान्तं विनीय धत्ते च पयोधराग्रम् ॥ २९

इतीव माता सुदती यशोधरा चकास्ति कामं विपरीत-लक्षणा ।
ननु प्रसुप्ता खलु सुप्तमुद्रया कथं नु दैवं भवतीह निर्दयम् ॥ ३०

स बालकः प्रेमरसं स्वमातुः पिबन् प्रकामं सहसा प्रशान्तः ।
तथैव सुष्वाप यथा च मातुः गुणाः सदा संततिमाप्नुवन्ति ॥ ३१

धरातलं सर्वमुखप्रशान्तं विरौति मन्दं न हि झिल्लिकाऽपि ।
पत्राणि वृक्षाग्र-विचालितानि निद्रान्ति सौख्यं बहुधा रजन्याम् ॥ ३२

नीडेषु सुप्ताः पतगाः प्रियाभिः विचेतनाः चित्र-विचित्रिताण्डैः ।
सुखानुभूतिं नितरां भजन्ते पक्षान्तरेऽक्षिप्त-तदीय-पोतैः ॥ ३३

पतङ्ग-पुङ्गाः न हि रेजिरे तदा पत्रान्तरे कल्पित-तल्प-रूपाः ।
पञ्चत्वमापाद्य जगत् तदानीं पञ्चत्व-भावेन ललास कामम् ॥ ३४

अभ्यस्य रोमन्थमनन्त-भूत्या मृगाश्च कामं स्वमृगाङ्गनाभि. ।
भजन्ति विश्रान्ति-सुखं तदानीं निद्रामनोज्ञास्तरु-मूल-देशे ॥ ३५

चन्द्रः प्रियं यामवती-द्वितीयः निद्रारतं स्वीय-मनोनुकूलम् ।
आत्मैक्य-भावेन ममज्ज रात्रौ दृष्ट्वा च लोकं बहुराग-भावः ॥ ३६

सा यामिनी रागवती तदानीं ज्योत्स्ना-सुधाकल्पिततल्पदेशे ।
चन्द्रेण साकं गगनाधिराज्ये विलोल-तारा मधुरं चकासे ॥ ३७

चन्द्रस्तदानीं रजनीं सगाढं ज्योत्स्नांशुकान्तर्गतभासमानाम् ।
विचुम्ब्य शिश्लेष परं लुलोट पपौ सुधा-बिन्दुममन्द-भावैः ॥ ३८

इति श्रीगीर्वाणान्ध्र-भाषा-प्रवीणेन ओगेटि-परीक्षित्-शर्मणा विरचिते विंशति-सर्गीय-यशोधरा-महाकाव्ये यशोधरा-प्रसव-समलङ्कृतः अष्टमः सर्गः समाप्तः ।

न व मः स र्गः

महाभिनिष्क्रमणम् ।

तत्रैव पार्श्वे मृदु-तल्प-देशे लुठन् व्यथाकारित-देह-यष्टिः ।
मायासुतः काञ्चन-कान्ति-देहः बभार चिन्ताकुलितं स्व-चित्तम् ॥ १

शय्या तदीया मृदिता प्रकर्षमुष्णं तनोत्येव वितूल-गर्भा ।
स्वेदप्रसिक्तापि धराधिपस्य संसर्ग-भावेन गुणा भवन्ति ॥ २

उरस्थलोपान्त-विराजमानं यज्ञोपवीतं हृदयं तु राज्ञः ।
द्विधाकृतं दुःखभरेण नूनं रेखेव संदर्शयतीति मन्ये ॥ ३

तदीय-गात्रेण वितप्त-शय्या रेखासहस्रैः मुकुलीकृतास्या ।
व्यनक्ति रम्याक्षर-पङ्क्तिरूपं जटी नरेन्द्रो भविता धरण्याम् ॥ ४

मनोविकाराः प्रचुरं भवन्ति प्रायेण लोके सहजं निशीथे ।
एकाकिनस्तप्त-विदीर्ण-भूपतेः चिन्ताविदग्धस्य परं हि जन्तोः ॥ ५

शय्या च नाम्ना शयनानुकूला तथापि सा नैव भवत्यथार्थम् ।
नरेन्द्र-देहाञ्चित-रम्यरूपा सिंहासनं तत्र बभूव राज्ञः ॥ ६

तथा तदीयं कमलश्रियं मुखं तुषार-संघातमिवावभासितम् ।
श्रिया विहीनं तनु-यष्टि-रूपितं मृणाल-नालेन समं तदाऽभवत् ॥ ७

विचिन्त्यमानोर्ध्वतलं च पश्यन् दृष्टिं शनैः पार्श्वतले प्रसार्य ।
अधोमुखः पश्यति चिन्तयाऽपि तदीय-शय्यां भजते विलम्ब्य ॥ ८

नहि क्षणं तिष्ठति तप्तचित्तः नहि क्षणं पश्यति भिन्नचेताः ।
अशान्त-भावैः ज्वलितो नरेन्द्रः प्रतिक्षणं स्थान-विपर्ययेन ॥ ९

इतस्ततः चालित-दीर्घ-गात्रः महार्ह-शय्या-लुठितो नरेन्द्रः ।
तपात्यये मानस-संचरन्तं हंसस्थितिं प्राप विमोचनाय ॥ १०

पदे पदे दीर्घ-कवोष्ण-निःश्वसैः प्रदर्शयन् मानस-ताप-वीचिकाः ।
निषेदिवान् आनत-शीर्षकः परं प्रबन्ध्य जानू-करवेष्टनेन सः ॥ ११

कराल-कालाकृति-भौम्यलोके पञ्चत्वमापाद्य पुनश्च भूत्वा ।
न कामये चक्रित-जन्म-रूपं तज्जन्म-राहित्य-महं विकाङ्क्षे ॥ १२

काङ्क्षे प्रियं सन्मनसा सुमार्गं सन्मार्ग-यानेन यतीन्द्र-योग्यम् ।
निर्वाणबुध्या सकलां धरित्रीं विसृज्य काङ्क्षारहितो भवेयम् ॥ १३

इति क्षणं चिन्तित-कालरात्रौ तदीय-चित्तं शतधा विभिन्नम् ।
यथोर्वरा भाति विभिन्न-रूपा गभस्ति-चण्डातप-तप्त-देहा ॥ १४

संसार एवाखिलसारहीनः विरागमार्गश्च विरागयुक्तः ।
विरागमार्गे मरणं च योग्यं संसार-सिन्धौ पतनात् पदे पदे ॥ १५

इति प्रगाढं मनसि व्यथाभिः क्षणं च मौनेन विचिन्त्यमानः ।
कर्तव्यमस्तीति परं सुबुद्ध्या ज्ञात्वा क्षणे मौन-सुमुद्रिताऽस्यः ॥ १६

तथा च तां शान्तरस-स्वरूपां विलोक्य राजा दलिताऽन्तरङ्गः ।
निःश्वस्य दीर्घं नतमस्तकोऽपि स्व-मानसे चिन्तितवान् प्रगाढम् ॥ १७

एषा प्रसूता स्तनपावृता सती जानाति किंचित् नहि लोकजीवनम् ।
आबाल्यमानन्द-परीत-जीवना मामेव मेने वरवर्णिनीप्रियम् ॥ १८

भामा चकाङ्क्षे नृपवर्ग-मण्डले ब्रह्माण्डवत् रञ्जित-मण्डपे प्रिया ।
मामेव मालाभिरलङ्कृता शनैः ह्रिया जनावेष्टित-मन्द-गामिनी ॥ १९

अहं तु चिन्ता-भरपूर्ण-मानसः दिवाऽपि रात्रौ व्यथया प्रपीडितः ।
प्रमोदपूर्णा मधुराकृतिः प्रिया कथं हि भाव-द्वितयं पदे पदे ॥ २०

मदीयचित्तं प्रबलं पिनष्टि निद्राविहीनं पटु-चिन्तनात्तम् ।
अशाश्वतं भौतिक-जीवितं मे कदाऽपि शान्तिं न हि यच्छतीह ॥ २१

पिता च शुद्धोदन-चक्रवर्ती सुखालयं कल्पितवान् महात्मा ।
तथापि मे शान्ति-विहीन-चित्तं प्रतिक्षणं पश्यति काननान्तम् ॥ २२

प्रजावती मां सुत-निर्विशेषं पुपोष बाल्यात् जननी-समाना ।
सर्वं च सौख्यावृतमस्ति किन्तु चेतः सदा जीवति काननान्ते ॥ २३

एकं विधातुं वयमुद्यताः स्मः सदा भवत्यन्यदहो धरित्र्याम् ।
वयं न किंचित् करवाम दैवं बलीयसी दैवत-भावना हि ॥ २४

वैराग्य-भावेन वितप्त-चित्तः यशोधरा-प्रेम-निबद्ध-बुद्धिः ।
संसारमार्गे मम जीवनं च बलात् नियुक्तं व्रजते वनं हि ॥ २५

उच्छ्वास-निःश्वास-विलिप्त-भावः विचिन्तयन् दीर्घतरं प्रसह्य ।
प्रवेपमानो सहसा मनीषी चिरेण शान्ताकृतिमाप भूपः ॥ २६

नीवाक एवायमिति क्रमेण निश्चित्य डोलायित-चित्त-गेहे ।
वादावदालापमयेन वाग्भिः जवेन मञ्चात् उदतिष्ठदार्यः ॥ २७

उत्थाय पर्यङ्क-तलात् सकम्पं समेत्य जायां सुख-सुप्त-मूर्तिम् ।
भुजेन बालं सुमकोमलाङ्गम् परिष्वजन्तीं बिस-प्रन्निभेन ॥ २८

प्रशान्त-भावेन सुखं स्वपन्तं नवारविन्दाभ-विराजमानम् ।
यशोधरा-मानस-हंस-पोतं ददर्श राजा शरदिन्दु-रूपम् ॥ २९

विशाल-शय्यापत-बाल-शोभिनीम् प्रशान्त-मुद्रागत-रूप-भासिनीम् ।
शरत्-सरोजामल-रम्य-काशिनीं विभाव्य तां शारद-सुन्दरीम् इव ।। ३०

सौन्दर्यताया: परमावधिं तां वात्सल्य-भावावृत-मातरं ताम् ।
सर्वाङ्ग-सौन्दर्य-विसर्पिताङ्गीं प्रशान्त-निद्रा-निरतां स्व-जायाम् ।। ३१

मन्दस्मितोत्कलित-दीर्घ-नि:श्वसः सार्द्रान्त-रङ्गेन विलोक्य भावुकः ।
रेजे प्रियं बालक-दर्शनोत्सुकः निश्चेष्टितो गौतम-भूपतिश्चिरम् ।। ३२

मायासुतस्ताम् अनिमेषदृष्ट्या दृष्ट्वाऽनुकम्पाऽकलितार्द्रया सः ।
पस्पर्श तस्याः ललितं कपोलं शयेन चक्राञ्चित-दक्षिणेन ।। ३३

प्रियां स्वजायां तरुणीं यशोधरां मृदु-स्वभावाम् अकलङ्क-भाजिनीम् ।
कथं निशीथे परिहीय यास्यते कदापि नच्छेद्यमिदं स्वबन्धनम् ।। ३४

न किञ्चिदत्रास्ति चिरं धरण्यां भूम्या समं यद् भ्रमते नितान्तम् ।
वयं तु सर्वे न हि यौवनेषु जीवेम नूनं स्थिर-भाव-रूपैः ।। ३५

सर्वं जगत् स्वप्न-दशा-समानं न वस्तु जीवेत् शरदां शतं वै ।
कथं वयं शाश्वतमत्र-लोके जीवेम सौख्येष्विति तां ददर्श ।। ३६

यशोधरा बालकपार्श्वशायिनी शिशुश्च मातुः स्तनमण्डले स्वपन् ।
विरेजतुः शुभ्र-मनोज्ञ-कान्तिभिः प्रवाल-पुष्पाकर-मञ्जरी-समम् ।। ३७

प्रियं स्वपुत्रं जननीगले तं सुनिद्रितं कुड्मल-कोमलास्यम् ।
पयोधराऽच्छन्नमिवेन्दु-बालं निरीह-दृष्ट्या च निशाम्य तस्थौ ।। ३८

छित्वा स नि:श्वस्य जगाम तस्माद् असङ्ग-खड्गेन च बन्धनानि ।
पुत्रं प्रतीकं निज-जीवितस्य कलत्रबन्धून् सकलं स्वराज्यम् ।। ३९

निःशब्दगत्या स विवेश देहलीं कवाट-बन्धं विवृतं विधत्तवान् ।
अधिष्ठितो चन्न-सम तुरङ्गमं दुधाव नक्तं मनसा तपोवनम् ॥ ४०

अपावृते द्वार-कवाट-बन्धने सदागतिः सान्द्रतरं ववौ तदा ।
तेनैव वातेन विचाल्य दीपिका भियेव सान्द्रं विचकार कम्पनम् ॥ ४१

पुत्रं परिष्वङ्ग्य सुषुप्ति-मुद्रया कामं लसन्ती निज-देह-शोभया ।
दीपद्वितीयां च विहाय भामिनीं चिन्ता-जडः प्रस्थितवान् सनिर्दयः ॥ ४२

दृष्ट्वा गतं गौतम-भूमि-पालं वैशाख-राका-निशि-पूर्णचन्द्रः ।
विचिन्तयन् स्वस्वकुले प्रसूतं ललास निश्चेष्टितवत् प्रकामम् ॥ ४३

विकम्पिता प्रज्वलिता च दीपिका चकार शब्दं त्वर जागृहीति सा ।
अरिष्टगेहे प्रबलं विरोदनैः तदैव शब्देन बुबोध बालकः ॥ ४४

भविष्यमाणं सकलं नियन्ता छायेव संदर्शयतीह लोके ।
रुरोद शंशन्निव बालकोऽपि हठात् सबाधं कुररी-रवैश्च ॥ ४५

तदा स्वरावैः प्रचुरं समाविलं तथेति प्रत्युत्तर-भाषणैः परम् ।
अरिष्टगेहो प्रति-राव-संकुलैः दृढं करोतीव भविष्य-भारतीम् ॥ ४६

ज्ञातुं धरण्यां भवतीति किं किं कस्यापि केनापि सुखाऽतिपातः ।
न शक्यते किन्तु पुराकृतेन भोक्तव्यमस्मिन् खलु कर्मणैव ॥ ४७

इति श्रीगीर्वाणान्ध्र-भाषा-प्रवीणेन ओगेटि-परीक्षित्-शर्मणा विरचिते विंशति-सर्गीय-यशोधरा-महाकाव्ये महाभिनिष्क्रमण-समलंकृतः नवमः सर्गः समाप्तः ।

दशमः सर्गः।

यशोधरा-जागरणम्।

मातुः पयःपूर्ण-कुच-प्रदेशे शिशुः प्रकामं विललाप दीनम्।
विख्यात-शाक्यान्वय-पुण्य-मूर्तेः यशोधरायाः खलु राहुलोऽसौ॥ १

उन्मीलयन्ती नयने मनोज्ञे प्रोवाच सा शाक्य-कुलाऽधिनाथ!।
इतः स्मितोल्लासित-मञ्जुलास्यं भवान् क्षणं पश्यतु ते सुपुत्रम्॥ २

अहो कुमारः प्रबलं विरौति किम्? कदापि पूर्वं रुदितो न एवम्।
वदस्व राजन् कथमस्ति पीडितो भवान् समाश्वासयितुं समेतु भोः॥ ३

अयं कुमारो भवदीय-लक्षणैः स्वभाव-संक्रामित-भाव-पूरितैः।
अकाल-संभूत-मनोरथैः परं विचेष्टते पश्य धरातलाऽधिप॥ ४

अप्राप्य प्रत्युत्तरमाकुला सा नीरेजपत्रेक्षण-वश्यलोका।
उच्चैः वदन्ती बहु-भीत-चित्ता प्रसारयामास तदीय-दृष्टिम्॥ ५

यशोधरा तं मधुरं ब्रुवन्ती प्रबुध्य पर्यङ्कतले निषण्णा।
विराविणं तं बहु लालयन्ती हठात् स्वभर्तुः शयनं ददर्श॥ ६

सा जीवितेशं करुणान्तरङ्गं मत्वा गतं पार्श्वतले प्रसुप्तम्।
सुवर्ण-रत्नाञ्चित-दिव्यतल्पे भृशं चकम्पेऽनिल-दीपिकेव॥ ७

विचार-चित्ता-जननी-मतल्ली करे कपोलं मृदुलं वहन्ती।
ददंश दन्तैः मृदुलाधरोष्ठं पर्याप्तमश्रूणि विमुञ्चयन्ती॥ ८

उत्थाय सा शीघ्रमनर्घतल्पात् आलिङ्ग्य सुप्तं भुजवल्लरीभ्याम् ।
बालं समालोक्य सबाष्पनेत्रा त्वरा-भयाक्रामित-विह्वलाङ्गी ॥ ९

अनुक्षणं पश्यति दिक्षु तन्वी विनिक्षिपन्ती त्वरया स्वपादौ ।
विमोचयत्यञ्जननेत्र-बाष्पं विवर्ण-सुस्निग्ध-कपोल-भागे ॥ १०

किमेतदाश्चर्यमहो धरित्र्यां स्त्रीणां-मनोवृत्तिरगम्य एव ।
पयोधर-क्षीर-भृताः सुजीवाः क्षणेन नेत्राञ्चल-साश्रुपाताः ॥ ११

नेत्रोत्पलात् कज्जलमिश्रिताश्रु स्रवत् च भेजे मृदुनाल-भावम् ।
कपोल-भागे चिकुरः समन्तात् शैवाल-भावेन परं ततान ॥ १२

नितान्त-दुःखेन तदीय-नेत्रे निनाय रक्तोत्पल-युग्मसाम्यम् ।
अक्ष्णोर्निबद्धे किमितीह मन्ये कनीनिके बम्भरतामुपेते ॥ १३

तदीय-नेत्रे-घनपक्ष्ममालिके विलग्न-बाष्पाम्बु-विचित्रिते परम् ।
मनोज्ञभावं विशदं वितेनतुः तुषार-संछन्न-सितोत्पले इव ॥ १४

श्वेताम्बरावेष्टित-हेमगात्री पुत्रं वहन्ती विचचार दीनम् ।
दुःखाग्नि-संज्वालित-मूर्तिरेषा ज्योतिः स्वयं मार्गयतीव रेजे ॥ १५

भर्त्रा वियुक्ता शफरी विलोचना दुःखाकुला कुन्तल-चित्रितानना ।
स्वेदेन संसिक्तदुकूल-शोभिता स्नातेव सा शोकनदी-जले बभौ ॥ १६

प्रगाढ-दुःखेन विवर्ण-पेलवं भृशं चकासे प्रविकीर्ण-कुन्तलैः ।
उषोदये सान्द्र-हिमावगुण्ठिते शशाङ्क-बिम्बेन समं तदाननम् ॥ १७

दीना लताङ्गी पति-मार्गलग्ना जज्ञौ हि सा किं न तथा विधातुम् ।
शून्यं लुलोके सविचार-चित्ता यशोधरा-निर्गत-भर्तृकाऽथ ॥ १८

तदा विहातुं स्तनपं रुदन्ती शशाक न प्रेम-रस-स्वरूपम् ।
द्रष्टुं पतिं चाऽपि विलोल-चित्ता वात्सल्य-भावेन निरुद्ध-मार्गा ॥ १९

तन्मानसे शोक-रस-प्रपूर्णे कुचद्वयं कैरव-कुड्मलाभम् ।
बभौ विगुञ्जन् परितः पिपासुः मरन्द-पानाय मिलिन्द-बालः ॥ २०

यशोधरा सा सहस निवृत्ता पयोधरोत्सेध-पवित्र-भावा ।
पयोभिरालिङ्ग्य .सिञ्च गाढं चुचुम्ब मोहात् मृदु-सून-सूनुम् ॥ २१

अभाग्य-संछन्नमिवाऽवभासते सुभाग्य-रेखाञ्चित-दीप्त-जीवितम् ।
दिनान्तकाल-स्तरणिं विना यथा त्रियामया व्याकुलिता नहिराजते ॥ २२

यशोधरा कम्पित-पल्लवाधरा पयोधराऽबाधित-बालकं भिया ।
विभाव-भावैः सहसा च सात्त्विकैः प्रवीक्ष्य वात्सल्यवती रुरोद सा ॥ २३

किमर्थमेवं हससि प्रकामं नभस्तले नीलिम-मेघमाले ।
संचारि-भावैः प्रचुरं महिम्ना विराजसे मेदुररागपुञ्जैः ॥ २४

आकाश एवाखिल-शून्यभावैर् विजृम्भते नैव गभीररूपः ।
तदीय-बाधामवलोक्य नूनं श्यामायमानः सरसः समुद्रः ॥ २५

विसृष्ट-जायां जननीं यशोधराम् अभाग्य-संभार-भरेण नामिताम् ।
विलोक्य संतप्तमनाः पदे पदे विधुः शनैः याति पयोधरान्तरम् ॥ २६

रक्तोत्पला-शोभित-रम्य-बालं निक्षिप्य सोत्सङ्गतले प्रशान्तम् ।
पदे पदे जल्पित-दुर्दशा सा मूर्तीकृतः शोक इवावभासे ।। २७

पयःप्रपूर्णं मधुरं सुजीवितं पयःप्रपूर्णं भयदं विकारितम् ।
विहायसि प्राकृत-सौधमण्डलं प्रवातगत्योद्धत-मेघ-मण्डलम् ।। २८

व्याकीर्ण-केशा विगलत्-स्तनांशुका लोलालका चञ्चल-वीक्षणा प्रिया ।
आक्रन्दिता कांदिश-गामिनीव सा ग्लौ-बिम्ब-वक्त्रा दलितान्तरात्मना ।।

गौतम-संन्यास-स्वीकरणम् ।

गत्वा निशीथे तुरगाधिरूढः सर्वंसहात्यक्त-शरीरभारः ।
तत्याज लोकं बहुपाप-रूपं विचिन्तयन् साधु-जनालिमार्गम् ।। ३०

विचित्रभावैः तुरगात् स राजा विराजमानः सहसावतीर्य ।
चन्नं समालोक्य महोज्ज्वलः सन् पप्रच्छ दम्भोलि-समानवाक्यैः ।। ३१

रे चन्न! मे देहि कृपाण-धारां तया मदीयान् प्रचुरान् शिरोजान् ।
विच्छिद्य नूनं विततोत्तमाङ्गे संन्यासिनां मार्गगतो भवेयम् ।। ३२

विकम्पमानः स्वकृपाण-धारां चकर्ष तस्मात् बहु-घर्म-गात्रः ।
कोशात् लसन्तीं सित-कान्ति-दीप्तां तुरीय-राजानुमतिं विकुर्वन् ।। ३३

राजा कृपाणाञ्चल-रश्मि-दीप्त्या चिच्छेद सर्वं स्वशिरोज-भारम् ।
नवांशुमालीकृत-तामसीव घनीभवत्-पाप-समूह-जालम् ।। ३४

यद्यत्कृतं यत्क्रियते च गत्वा विसर्जितं वस्तु-चयं मदीयम् ।
प्रयच्छ सत्यं जनकाय चन्न! गच्छाम्यहं सान्त्वनमावहस्व ।। ३५

सर्वाणि राजोचित-लाञ्छनानि नीत्वा सधीरं व्रज बन्धुवर्गम् ।
आरुह्य चन्न! प्रिय-कन्थकाश्वं निवेदयस्वेति जगर्ज भीमम् ॥ ३६

प्रणम्य तं मण्डन-मण्डितं प्रभुं ततोऽवतस्थे चलनं विना शुचा ।
अगोचरत्वं सहसा प्रपद्यत शनैः शनैः गौतम-भूपतिः स्वयम् ॥ ३७

दैवं यदा यत् कुरुते च कस्मै न कोऽपि जानाति वसुन्धरायाम् ।
नावश्च यान्त्येव धरातलेऽपि रसातले हा शकटानि यान्ति ॥ ३८

न कोऽपि जानाति कदा ध्रुवं वा कथं प्रजा जीवति भौम्यलोके ।
को वा दरिद्रो भजते धनं च भुङक्ते धनी भीषण-निर्धनत्वम् ॥ ३९

चन्द्रास्तमय-वर्णनम् ।

भुक्त्वा यथेष्टं रजनीं क्षपाकरः पीत्वाऽमृतं बिम्बफलाधरोष्ठे ।
हृत्वा च मानं त्रपया नताङ्ग्याः क्रमेण कार्श्यं भजते विरागः ॥ ४०

विचित्र-रात्र्यास्तनु-सान्द्र-वर्णम् आचिक्कणाङ्गात्स्रुत-मत्त-रूपम् ।
विलोलतारेक्षण-रम्य-भावं निपीय मत्तः तनुतां प्रयाति ॥ ४१

कलाभिमानी सकलान्तरङ्गः सुधामयो यामवती-द्वितीयः ।
स्वरोहिणीयुक्त-तनु-प्रकाशः चिरेण मोक्षं भजते रजन्याः ॥ ४२

विनिर्गता सा रजनी शशाङ्कात् शशाङ्क-बिम्बोऽपि विनिर्गताऽस्याः ।
विमुक्ति-भावं सहसानुभूय कान्ता-परित्यक्त-इवावभासे ॥ ४३

नक्तं चकोराः प्रचुरं निपीय स्वकण्ठदघ्नं च सुधैक-सारम् ।
ययुस्तदालुप्त-तदीय-कान्त्या रराज सोमो सरधाकृतिश्च ॥ ४४

चान्द्रीमयैः लोकिक-वल्गु-पुञ्जैः रागान्विता यामवती सहासम् ।
मृगाङ्क-हस्त-ग्रहणैः सहेलं वाह्यालिसक्ता सुतरां प्रमत्ता ॥ ४५

निशावसाने श्रमया विदीर्णः विश्रान्तिमाप्तुं यतते स्म चन्द्रः ।
तदा त्रियामा-तत-पाण्डु-वर्णा भेजे भृशं भाव-विहीन-रूपा ॥ ४६

स्वकीय-कान्ति प्रसृतां धरण्यां विलोक्य कान्ति-क्षय-कालमग्रे ।
पुनर्नवं कान्तिमवाप्तुमर्कात् तूर्णं प्रयातीव बभौ क्षपेशः ॥ ४७

यशोधराक्रन्दनमासमग्रम् आकर्ण्य बाधा-कलितान्तरङ्गः ।
हृद्रोगछिद्रायित-मध्य-बिम्बः क्षीणाति कल्ये सुतरां शशाङ्कः ॥ ४८

यशोधरा-दैन्यपरीत-भावं माया-सुतस्यास्य विरक्ति-भावम् ।
तारापतिः स्वात्म-विरक्त-भावो ह्रसिष्णुतां याति विलोक्य खिन्नम् ॥४९

इति श्रीगीर्वाणान्ध्र-भाषा-प्रवीणेन ओगेटि-परीक्षित्-शर्मणा विरचिते विंशति-सर्गीय-यशोधरा-महाकाव्ये यशोधरा-जागरण-गौतम-संन्यास-स्वीकरण-चन्द्रास्तमयवर्णन-समलङ्कृतः दशमः सर्गः समाप्तः ।



एकादशः सर्गः।

अन्तःपुर-कोलाहलः।

महीपतिः शाक्य-कुलाधिपस्तु दिदेश सैन्यं परिमार्गणे तम्।
उत्तालचित्तेन विकम्पमानः विभिन्न-शङ्काविल-शून्य-चित्तः। १

विकम्पमानो गलिताङ्ग-यष्टिः विमुञ्चयन् बाष्पकणानियाय।
यत्रैव सा प्रोषित-भर्तृकाऽऽसीत् शोकाग्नि-दग्धेव लतान्तवल्ली॥ २

शुद्धान्तलोको बहु-भीषणैश्च कोलाहलैरावृत-धूम्रभावः।
बभूव सर्वे प्रवदन्ति दुःखैः गतो ह्ययं शोकमयं विधाय॥ ३

सखीजनं तत्र दुधाव तूर्णम् उरःस्थले साश्रुजलं वहन्ती।
विलोक्य तन्मण्डलमङ्गनानां यशोधरा भीकरमारुराव॥ ४

दृष्ट्वा समायान्तममुं जनालिं जाया परं श्रावणमेघनेत्रा।
दृढं सबाधं स्तनमण्डलं सा जघान दुःखं परमुज्जगार॥ ५

आगत्य सर्वे क्षितिपालभृत्याः कुत्रापि दृष्टो न हि चक्रवर्ती।
क्षमध्वमित्याशु ववन्दुरस्मै वदन्त एवानत-शीर्षकास्ते॥ ६

दृष्ट्वा रुदन्तीं जननीं सकम्पम् प्रधाव्य चिन्ताकुलवेत्रहस्तः।
न्यवेदयत् सर्व-कथां स्वराज्ञे सोच्छ्वास-संनद्ध-विकम्पनेन॥ ७

सा भामिनी संतत-शोकचित्ता पानाशने विस्मृत-भावनाऽभूत्।
आस्यं तु तस्याः सुतरां विजग्लौ नीहार-संघात-सरोजिनीव॥ ८

शुद्धान्त-नारीगण-मध्यराजी पीताम्बरा-वेष्टित-रम्यदेही।
विराजते कानन-वृक्ष-मूले काषाय-वस्त्रावृत-खिन्नदेहः॥ ९

सदा-स्व-शुद्धान्ततले च योषितां सुकङ्कण-प्रक्वण-मञ्जु निःस्वनैः ।
संतोष-भारेण बुभुञ्ज षड्रसान् सोऽयं हत! माधुकरेण जीवति ।। १०

सदैव हंसच्छद-तूलिकायां सुष्वाप पत्न्याः स्तन-मण्डले च ।
सोऽयं नरेन्द्रः स्वपते नितान्तं दर्भाङ्कुराच्छादित-भूमि-तल्पे ।। ११

नरेन्द्र-मूर्तिः न कदाप्यपश्यत् वर्षातपौ जीवित-सौख्य-मग्नः ।
स एव पेदे च जटाधराणां तुषार-संघात-परीत-मार्गम् ।। १२

गृहात् गृहं गच्छति भिक्षुकोऽयं पृच्छन् गृहस्थान् कवलानि नित्यम् ।
दिनानि संयापयतीति चिन्ता पर्णाविलं पल्वल-वा र-पानैः ।। १३

भिक्षार्थमेवं विचरन् जटी सदा कुक्षिभरन् नाशयतीति गौरवम् ।।
सुक्षत्रियाणां विमलं यशःप्रियं ज्योत्स्ना-वितानं सततं धरातले ।। १४

अनादि-संक्रामित-वंशकीर्तिः परंपराप्राप्त-वसुन्धरा च ।
प्रियं प्रजा-शासनमेव राज्ञाम् इतीरितं प्राकृत-शास्त्र-विद्भिः ।। १५

न किंचिदत्रास्ति चिरं धरण्यां विना च कीर्ति नृप-वंशजानाम् ।
तस्माच्च कीर्त्यैं प्रयतव्यमेव किमर्थमेवं जटिमार्गवेषः ।। १६

तृप्ति च भेजे स नरेन्द्रमूर्तिः यदृच्छया प्राप्त-फलं विभुञ्जन् ।
प्रायेण लोकेऽपि समीहिताय सुखानि कष्टानि भवन्ति नूनम् ।। १७

महाप्रजावती-शोकः ।

हा हन्त! शुद्धोदन-राजपुत्रो मायासुतः संन्यसितो बभूव ।
विसृज्य सर्वं वसुधातलं च गत्वा वनं कोमल-गात्र-यष्टिः ॥ १८

प्रजायमानस्य च गौतमस्य मायामतल्ली निधनं गताऽस्य ।
तदाप्रभृत्येव पयोधरं मे पीत्वा प्रियं सो ववृधे कुमारः ॥ १९

क्वासौ गतः कुत्र विचेष्टते वा मदीय-भाग्यं मम नेत्रचन्द्रः ।
दत्वा च मे दुःखमनन्यभावं मत्वा च मां केकय-पुत्रिकेव ॥ २०

कथं च जीवेयमहं रुदन्ती ज्वालामयं मे हृदयं क्षणेऽस्मिन् ।
वार्धक्य-भारेण परं नमामि व्रजामि दण्डेन कृतान्त-गेहम् ॥ २१

अयं स्व-बाल्यात् खलु दीनबन्धुः पुष्टो मया जीवित-निर्विशेषम् ।
विसृज्य मां प्रस्थितवान् कुमारः वार्धक्य-भारेण भृशं नताङ्गीम् ॥ २२

अहो! ममेदं बहुकष्टमेव यल्लोक-सामान्यमयं च भावः ।
प्रजावती नादर-पूर्ण-भावं ददर्श मायासुतमात्मबुध्या ॥ २३

कथं वसेयं सभयं वहेयं शरीरमेतत् बहुवर्ष-जीर्णम् ।
कृतं मया नन्दन-राज्यलोभात् प्रयाति लोके पटु किंवदन्ती ॥ २४

जानामि नाहं खलु पुत्रकस्य समीप्सितं यद् हृदये चकास्ति ।
नास्त्येव मे किंचिदपीह लोके काङ्क्षा परं स्वार्थ-फलोदयाय ॥ २५

कस्मिन् वने कुत्र नदीतटे वा चरन् परिश्रान्तमना बभूव ।
कस्मिन्-पथि प्रावृत-कण्टकेषु विचार्यमाणे हृदयं भिनत्ति ॥ २६

सर्वस्वमस्माकममूल्यरत्नं नैकोऽपि लोके सममस्ति तेन ।
मन्ये प्रियं तं सुत-निर्विशेषं तथापि तत्याज समस्त-बन्धून् ॥ २७

नाहं तु शक्ताऽस्मि बिभर्तुमेनं कलङ्क-भारं बहु-भग्नमानसा ।
यस्मादहं स्तन्यमयच्छमस्मै वात्सल्य-भावेन कुमारबुद्ध्या ॥ २८

अहो मदीयं हृदयं विदीर्णं भावद्वयेनाभिवृतं प्रगाढम् ।
पवित्र-वात्सल्य-गुणेन पूर्णं जनापवादेन विचूर्णितं च ॥ २९

नितान्त-दुःखेन परीत-मानसं वोढुं शक्ताऽस्मि जरा-विशीर्णा ।
अपास्य जीवेयमहो ! धरण्यां कथं प्रवादः प्रथितः प्रपञ्चे ॥ ३०

काङ्क्षा न मे नश्यति शक्ति-हीना शुद्धान्त-गेहेषु परिश्रमेण ।
आशा जनानां बलदायिनी च हठाज्जनं नाशयतीति नूनम् ॥ ३१

सत्यं जनानां सुखतत्परा धीः संसार-सौख्येन विवर्धमाना ।
विशिष्य लोके महिला-जनानां देहान्त-कालेऽपि न शाम्यतीति ॥ ३२

नन्द-विलापः ।

घोरं किमेतद्विकृतं विधत्तं किं कष्टमात्तं भवता न चोक्तम् ।
भवत्कृते किं न विधीयतेऽत्र भृशं विघातोऽस्मि दयान्तरङ्ग ॥ ३३

चिरं तदेतत्खलु राज्यभारम् ऊढ्वा च गन्तव्यमहो जरायाम् ।
किमर्थमेवं सकलं जनालिं त्यक्त्वा निशीथे क्व गतोऽसि नूनम् ॥ ३४

राज्यं त्वदीयं मम नास्ति किञ्चित् तपोवने जीवितुमस्मि सत्यम् ।
उदारभावेन तथागतोऽसि विसृज्य मह्यं सकलं स्वराज्यम् ॥ ३५

अहं कथं राज्यधुरं वहेयं ते पुत्रकोऽस्त्यौरसराहुलोऽयम् ।
तेनापि राज्यं कथमुह्यतेऽस्मिन् क्षणे ममाजायत चित्त-भीतिः ॥ ३६

राज्ञा विना कष्टतरं स्वराज्यं देशं सुखं पालयितुं प्रजानाम् ।
श्रुतं हि सर्वैरपि लोकवाक्यं राजा यथा भाति तथा प्रजा हि ॥ ३७

अनारतं सर्वजनास्तपन्ति नृपं विना सस्यमहीतलेऽपि ।
आधार-भूतोऽसि जनप्रियोऽसि प्रजानुरागेण विवर्धितोऽसि ॥ ३८

रामे वनं गच्छति पितृवाक्यात् उवाह राज्यं भरतस्तदानीम् ।
तद्वच्च मे किञ्चिदपीह नास्ति राज्याधिकारो नृपवर्ग-मौले ! ॥ ३९

अहं त्वदर्थं निवसामि राज्ये नास्त्येव मे जीवनलोलुपत्वम् ।
प्रविश्य भोः त्वं नगरं च तूर्णं प्रशाधि राज्यं जनमानसानि ॥ ४०

अहं निरीक्षे मुख-चन्द्रमण्डलं चकोर-बुद्धया निरतं दिने दिने ।
आप्त्वा च सिद्धिं वह राज्य-पालनं भ्रातः प्रियं वच्मि विदीर्ण-चित्तः ॥

नूनं त्वयाऽस्मिन् जडबुद्धिरूपे क्षिप्तं परं भीकर-कार्य-भारः ।
अशक्त एवास्मि विना भवन्तं विशाल-राज्ये वसितुं नितान्तम् ॥ ४२

इति श्रीगीर्वाणान्ध्र-भाषा-प्रवीणेन ओगेटि-परीक्षित्-शर्मणा विरचिते विंशति-सर्गीय-यशोधरा-महाकाव्ये अन्तःपुर-कोलाहलः, महाप्रजावती-शोकः, नन्द-विलापः इत्यादिभिः समलंकृतः एकादशः सर्गः समाप्तः ।

यशोधरा-सखी-संलापः ।

सखि ! प्रियं मे कथयस्व सत्यं कोऽयं मदीये हृदये चकास्ति ।
भर्ता वने जीवति सिद्धिमाप्तुं रात्रिं दिवं तापयतीव चित्तम् ॥ १

किमर्थमेवं सभयं विकम्पसे सहस्व किंचित्समयं प्रशान्तम् ।
अयं महात्मा तपसा पुनीतः स्वान्तं प्रियं सान्त्वनमाचरेद्धि ॥ २

शक्ताऽस्मि नाथं बहुकालमस्मिन् विस्मृत्य किं मन्मथमन्मथं तम् ।
वसेयमेकान्तमहो वसन्ते विस्फारिते रागमये वदालि ॥ ३

द्विरेफमाला मधुरं ध्वनन्ती प्रसून-पूर्णं मधुविन्दु-रम्यम् ।
आगुञ्जती वाऽस्ति मदीयचित्तं नाहं सहेयं मधुवासरेऽस्मिन् ॥ ४

ग्रीष्मे पुनः नैव ममास्ति शान्तिः स्वान्तं सदा दह्यति विप्रयोगे ।
आभासते काल इवावतीर्णः ग्रीष्मातपः चण्डरवि-प्रभावः ॥ ५

वर्षागमः चारुगभीर-वारिदैः विद्युल्लताभिः स्तनितैः मनोहरम् ।
आर्द्रो रसान्तःकरणाभिसज्जितः वियोगिनां शाश्वततापकारकः ॥ ६

मरालरूपायित-शरदागमः सिताच्छपक्षच्छद-शुक्लशोभिनी ।
प्रभुः शरीरोपमिता सुहासिनी धुनोति चित्तं शकलीकरोति च ॥ ७

दुःखाग्नि-सातत्य-वशेन चित्तं जाड्यैर् हिमानीकण-मण्डितश्च ।
हेमन्तकालोऽयमहर्निशं मे धुनोति शान्तं पटु-भीम-रूपः ॥ ८

आशीकराम्भःकण-मञ्जु-मण्डितः नग्न-द्रुमाणां प्रियसंगमोत्सुकः ।
नालं सदा शैत्यमयेन वायुना संतापकारी नुत-शैत्यकारकः ॥ ९

किय‌च्चिरं मे नयनद्वयेऽश्रु वहन् कपोले च कवोष्णरूपम् ।
शुद्धान्त-नारीगण-दुःखहेतुः भवेत्सखि! त्वं सुमनाः वदस्व ॥ १०

स्वेच्छा भृशं नास्ति महीतलेऽपि नृपालवंशोद्भवकामिनीनाम् ।
वरं वने स्थाणुमयं हि जन्म स्त्रीजन्मनः शान्ति-विहीन-मार्गात् ॥ ११

स्वतन्त्र-भावेन सदा प्रपञ्चे चरन्ति नूनं पुरुषाः प्रमत्ताः ।
अवश्यमेवाखिल-पापराशिः भोक्तव्यमेवास्ति सदाङ्गनाभिः ॥ १२

सा जानकी शुद्धचरित्ररूपा कुशीलवाभ्यां शुचमुद्ववाह ।
गङ्गातटे रम्यतपोवने च पवित्र-भावाऽदिकवेर्महिम्ना ॥ १३

सा जीवितं स्वीय-तनूजरक्षणे नियुज्य कष्टानि सुखेन सेहे ।
नालोकिता राम-कृतापराधं लोकापवादं न कदा मतल्ली ॥ १४

शकुन्तला शापवियुक्त-जीवना प्रोवाह दुःखं स्वकुमार-पोषणे ।
सपुत्रकः सर्व-महीतलं पुरा नयेन राज्यं च शशास कामम् ॥ १५

अन्विष्यमाणाः व्रजगोपकन्याः प्रपेदिरे तं प्रियगोपबालम् ।
अन्तर्हितं संतत-भक्तिमार्गैः तथैव लब्ध्वाहमपीह रेजे ॥ १६

पुरा सुगात्री तरुणी च तस्य रामानुजस्यापि पतिव्रता सा ।
हा ऊर्मिला यौवत-पूज्यशीला निनाय पुर्यां दिवसान्प्रहर्षम् ॥ १७

सखी-विजया-सान्त्वनम् ।

यशोधरे जीवन-लोलुपे प्रिये न युक्तमेवं कथनं प्रियंवदे ।
अनन्त-सौभाग्य भरालसा परं ब्रवीषि लोके सहजेयमापदा ॥ १८

वृणोति यस्मिन् विपदां परंपरा तदैव धैर्येण जनो वसेत् ध्रुवम् ।
सुखं च दुःखं च भविष्यतः परं समौ सतां चिन्तय चारु-रूपिणी ॥ १९

न चास्ति किञ्चित् तपनस्य कारणं सदा भवत्येव विपर्ययः सखे ।
क्रमेण कालः प्रियमप्रियोऽपि वा रथाङ्गवत् याति महोग्रचालनैः ॥ २०

अग्नौ यथा लक्षित-चारु-वर्णः तप्तः प्रकामं भवते सुवर्णः ।
तद्वत् सदा सज्जन-भव्य-भावः कष्टे परं भाति च नव्य-रूपः ॥ २१

विपत्सु नूनं सुजनस्य भावः वृद्धिं प्रयाते खलु वेग-शक्त्या ।
यथा च संताडित-कन्दुकोऽपि वेगेन खं चुम्बति हेलया हि ॥ २२

वियोगकाले सति प्रेमिकानां विवर्धते हार्दिक-राग-भावः ।
पुनः समायात-सुयोगकाले न कोऽपि मातुं प्रभवोऽस्ति भावम् ॥ २३

सर्वं समानं भवति प्रपञ्चे तथागतानां समदर्शिनां च ।
न तादृशी लौकिक-जीवितानान् अस्मादृशानां भवतीत्यमुष्मिन् ॥ २४

यशोधरा-परितापः ।

प्रिय ! स्वयं मे मृदु-पाद-युग्मं संवाह्य कामान्धतया सवेगम् ।
निपात्य मां पल्लव-संस्तरे च मदेन वात्स्यायन-कामबन्धान् ॥ २५

अभ्यस्तवान् गाढमनङ्ग-राज्ये शरीरशय्यालुठितो मदेन ।
त्वयाधुना सर्वमिदं च शास्त्रं विस्मारितं किं वद ? जीवितेश ! ॥ २६

न हि क्षणं स्थास्यसि मामवेक्ष्य मदीय-पाण्डित्यमनङ्ग-शास्त्रे ।
संस्मार्य सर्वं मम नेत्रचन्द्र ! कथं वने यापयसीति चिन्ता ॥ २७

किमर्थमेवं करुणातरङ्गितः करोषि शून्यं मम जीवितं प्रिय ।
इदं न कार्यं खलु शूर-जन्मनां यथा महीपः कुरुते तथा प्रजाः ॥ २८

प्रतिक्षणं मां तव बाहुपञ्जरे निधाय कामं मधुराधरं भृशम् ।
निपीय पर्याप्तममीं गुरुस्तनीमनेक-चातुर्य-कला-विलासिनीम् ॥ २९

पदे पदे त्वं बहुकाम-तप्तः प्रभूत-दाहेन मदीयमङ्गम् ।
नानाप्रकारैः पटुपेषणैश्च संध्यारुणाभं नितरां विधत्तः ॥ ३०

त्वां तादृशीःकामपरीत-भावना नैवं प्रभो तापयतीति मे मतिः ।
तत्तावकीना क्व च मारचिन्तना क्वैतादृशी तापस-मार्ग-चिन्तना ॥ ३१

सदा त्वदीयं तनुरूप-संपत् मदीय-सुस्वप्न-जगत्सु नित्यम् ।
संदृश्यते तत् सुरलोक-दिव्यं प्रत्यक्षमासीदिव जीविते मे ॥ ३२

त्वदीयरूपं मधुरं नवं वयः समीक्ष्य कन्येयमनङ्ग-मोहिनी ।
स्वयंवरेणैव परं समावृणोत् अनूह्यमेवात्र तवात्म-भावना ॥ ३३

निजस्वरूपं प्रकटीकृतोऽसि नैतादृशं भूप कदापि पूर्वम् ।
मयेत्थमेवावगतं यदि स्यात् कल्याणमेवात्र ससंशयं हि ॥ ३४

त्वदीय-चिन्ता-व्यथिता सुगात्री त्वया विना देहलतां कदा वा ।
असह्य-भारं प्रचुरं वहन्ती प्रपातयेत् चित्तज-चित्त-चोर ॥ ३५

अरण्यरूपं मम मानसं परं वियोग-चिन्ता नितरां विदाहते ।
तपात्यये वारिचय-प्रपूरितैः दयार्द्र-भावैः सपदं प्रसिञ्च भोः ॥ ३६

इति श्रीगीर्वाणान्ध्र-भाषा-प्रवीणेन ओगेटि-परीक्षित्-शर्मणा विरचिते विंशति-सर्गीय-यशोधरा-महाकाव्ये यशोधरासखी-संलापः, सखी-विजया-सान्त्वनम्, यशोधरा-परितापः इत्यादिभिः समलंकृतः द्वादशः सर्गः समाप्तः।

त्रयोदशः सर्गः ।

वियोगिनी यशोधरा ।

अबला विवशा गता सती प्रियभोग-स्मरणैर्विबोधिता ।
पटुघोरममुं निनिन्द सा तिमिरालंकृत-चन्द्रमण्डला ॥ १

अधुना खलु वञ्चिता भृशं विधिना निर्दय-घोरकर्मणा ।
अबला स्तनपावृता सती कथमेवं निवसेयमार्तिना ॥ २

न हि जातु विचिन्तितं मया न कदापि प्रिय-बन्धु-वर्गकैः ।
तदिमां खलु भीषणां दशां प्रतिपत्स्येऽति परैरपि प्रभो ! ॥ ३

मम पूर्ण-पुनीत-जीविते कथमेवं विपरीतमावृतम् ।
अदयं बत माम् अनिन्दिताम् अकरोः किं परिहास-भासिनीम् ॥ ४

वद मे प्रिय-विश्व-भूषण विलपन्तीमनिशं समीक्ष्य माम् ।
न हि ते हृदयं विदीर्यते बत राज्ञां हृदयं शिलामयम् ॥ ५

अहमेत्य मुदा तवान्तिकं पदसेवा-निरता भवामि च ।
त्वरितं वद दीन-बान्धव न हि जीवेयमहं पतिं विना ॥ ६

तिमिरे खलु सूतिकागृहे तव भार्यां जननीं यशोधराम् ।
विधिना पटुनिद्रितां प्रियां स्तनपालिङ्गित-भाव-रूपिणीम् ॥ ७

अविलोक्य सुताननं प्रभो कृतमेतद्विपरीतमाविलम् ।
अविमृश्य च लोकपद्धतिं करुणाहीनमनाः मनागसि ॥ ८

गदितं न कदापि संगमे हृदयान्तःस्थित-भाव-संचयम् ।
मधु-भासित-वाक्यरीतयो विषपूर्णा विलसन्ति मानसे ॥ ९

बहुधा परिपीडिता सती कथमेवं तव रूप-भाजिनम् ।
सुतमात्मज-राहुलं प्रियं पतिहीना परिपोषयामि च ॥ १०

चटुलं परभाव-वेदिनं प्रियपुत्रं परिपाल्य गौरवम् ।
मधुरं तव पाद-संनिधौ निवसेयं भुवि दीनबान्धव ॥ ११

रजनीकर-हास-भासिते विपिने नास्ति सुखानुजीवनम् ।
प्रचुरं सुतचन्द्र-हासिते लसते ते वर-जीवितं विभो ॥ १२

सपदि प्रतिपालयस्व ते पितरं पुत्रवतीं यशोधराम् ।
प्रथितोऽसि महीतले प्रिय करुणासिन्धुरयं हि गौतमः ॥ १३

जननाथ कदा पुनस्त्वया प्रतिपत्स्ये मधुसंगमं मुदा ।
तव संगमबद्ध-जीवना कथमेवं निवसेयमार्तिना ॥ १४

भणितं मणितं च योषितां परमानन्दमयं रसात्मनाम् ।
मधुराधर-सारि-वाचकं सहसाकर्ण्य समेहि भूपते ॥ १५

कथमेवमनन्य-चिन्तया ग्लपितं कोमल-मानसं तव ।
न हि दैहिक-सौख्य-हीनता परमार्थाय पदं भविष्यति ॥ १६

मद-भाव-परीत-यौवने मदधीनोऽसि विरागमानस ।
त्वरितं भवता समीहिता किमियं पूर्णविराग-भावना ॥ १७

सुखिनस्तव चित्त शान्तता विपिने नैव भविष्यतीति न ।
यदि राग-विलुप्त-मानसा यतसे योगपथानुवर्तनैः ॥ १८

न हि संस्मृतमेव किं पुरा बहवो योगपरायणाः स्वयम् ।
मलमल्लक-बन्धनाः सदा मधुलोलालक-दर्शने परम् ॥ १९

विवशाः पतनं प्रपेदिरे शतधा कामवशेन चेष्टिताः ।
अनिशं वनिता-पदाम्बुजे भ्रममाणाः परिहास-भूषिताः ॥ २०

विपिने पटु-शक्ति-कौशिकः प्रसभं प्राप तपोधनाऽप्रियम् ।
विविधैः सुम-गन्ध-संकुलैः सुरनारी-मृदु-बाहु-बन्धनैः ॥ २१

सदने परिचारिकाः प्रियं तव दैनंदिन-कार्य-तत्पराः ।
अविलम्बितमादरेण ताः निकटे ते विलसन्ति तक्षणम् ॥ २२

चटुलं त्वरया प्रियाङ्गनाः तव सांनिध्यमहर्निशं भृशम् ।
पदनीरज-मार्गयायिनो वरभृत्याः सभयं सिषेविरे ॥ २३

वसतिर्बहुदुष्करं बत! सकलानन्द-विलासिते गृहे ।
पटु-हिंस्र-समाकुले वने किमु सौख्यं भजसे विचिन्तय ॥ २४

सहजा खलु लोकचिन्तना परकीया मधुरा प्रकाशते ।
मधुरा-कर-भासिता सदा परिहासास्पदमेति निश्चयम् ॥ २५

अतिदूर-विराजितो नगः तरलो रम्यतरः प्रकाशते ।
किमिदं न कदापि चिन्त्यते भवितव्यं भवतीति निश्चितम् ॥ २६

अहमेवमनन्तबाधया सुतयुक्ता परकीयमाननम् ।
मधुरं दर-हास-सज्जितं विसहेयं प्रविलोक्य भूपते ॥ २७

मम जीवितमस्य शैशवं नगरं सर्वमराजकं प्रभो ।
अतिदैन्य-परीतमानसं त्वदधीनं परिहृत्य प्रस्थितः ॥ २८

कमलालय-पाद-संनिधौ पतितं सर्वमिदं धरातलम् ।
अविमृश्य हठात् विसृज्य माम् अपराधं कृतवानसि प्रभो! ॥ २९

किमिदं भवता च सांप्रतं कृतमस्मै प्रिय-सूनवे परम् ।
ननु राजकुले परंपरा प्रवहत्येव कलङ्क-भासिता ॥ ३०

बहु-भीषण-दृश्य-कम्पितां व्यथितां स्वप्न-भयेन कामिनीम् ।
हृदयेन समालिलिङ्गिथ सहसा प्रेम-रसोल्बणेन च ॥ ३१

मधुरं सरसं रसात्मनां पदलालित्यमहो विनिर्मलम् ।
तव वागमृतं निपीय तद् भुवि को नाम न रज्जते पुनः ॥ ३२

तव वाक्षु विदृश्यते मधु परकर्णाभरणे सुवर्णकम् ।
न हि कोऽपि विजानते भुवि ध्वनिकाव्यादर-हीन-सज्जनः ॥ ३३

यदि ते यति-मार्ग-जीवनं वरमित्याकलितं हृदन्तरे ।
किमु मां परिणीय चञ्चल! सुखहीनं कुरुते च जीवनम् ॥ ३४

पुरुषाः सहजेन भीकराः वनिताः प्राभवकोमलाबलाः ।
जगति प्रथिता स्वतन्त्रता पुरुषाणां विषये न योषिताम् ॥ ३५

मधुमासित-यौवनं प्रियं मधुमासे मधुहीन-भासितम् ।
मधुजीवितमेव जीवितं मधुहीनं च व्यथाविलं प्रभो! ॥ ३६

मधुमासित-यौवनाञ्चितं रमणीं ते प्रियदर्शिनीं विभो!
प्रकृतिं परिणाम-सुन्दरीम् अदयस्त्वं परिहीय बाधसे ॥ ३७

चतुरं मणि-भूषणादिभिः परमानन्द-विलास-दीप्तिभिः ।
मम जीवित-सौख्यमस्ति किं भवदीयं मधुसंगमं विना ॥ ३८

मधुसंगम-सौख्य-जीविनो गतसौख्यं नितरामहर्निशम् ।
अनुचिन्त्य सदा सुखाम्बुधिं वितरन्तीति जनश्रुतिः परम् ॥ ३९

तरुणीं त्वदधीन-मानसां जल-जातायत-नेत्र-सुन्दरीम् ।
परिहृत्य गतोऽसि निर्जनं गहनं चोरइवावनीपते ॥ ४०

युवतीं तवपुत्रकं प्रियं न कदापि स्मरसे प्रियं वद ।
यदि नैव विचारणा भृशं कथमेवं विदधीरयोमयम् ॥ ४१

अनिशं तपसे यतात्मना भवता यद्धि समाश्रितं प्रभो !
सततं च विगर्हितं जनैः विमलं तत्र विचारय स्वयम् ॥ ४२

नितरां तव रूपचिन्तने त्वदधीनं मम् मानसं दृढम् ।
यदि नास्ति तथैव ते प्रिय ! मयि चिन्ता ननु वञ्चिता दृढम् ॥ ४३

न कदापि मया विचिन्तितं तव बुद्धिः परिणाम-शालिनी ।
अधुना विदितास्मि मानसं कपटव्याल-कराल-भीषणम् ॥ ४४

भणितं कुरुते हि सज्जनः कुरुते किं ? भणितं हि दुर्जनः ।
कथमेवमहो ! चिकीर्षितं न हि कस्मिन् विषये प्रमत्तता ॥ ४५

मधुसार-परीत-वाचकं सहजं क्षत्रिय-वंश-जन्मनाम् ।
करणं शत-धारया समं न हि विश्वासपदं धराधिपाः ॥ ४६

मधुरां तव रूप-चिन्तनाम् अधरीकृत्य न मेऽस्ति जीवितम् ।
मधुराधर-पानवर्जने न हि ते जीवनमस्ति कानने ॥ ४७

मनसा तव पादवर्तिनीं प्रियपुत्रं भवदीय राहुलम् ।
नगरीममरावतीसमाम् अविलोक्यैव सुखं न वास्ति ते ॥ ४८

अनुभूय यथेष्टमेव मा मदयं सर्व-सुखानि भूयसा ।
सुतरां न हि तृप्ति मालभन् परनारीमृदु-बाहुबन्धने ॥ ४९

सफलं यदि कर्म-भूतले क्रियतेऽस्माभिरहो वयं सदा ।
अधिपा मदमत्त-भा काः न तथेदं वयमेव सेवकाः ॥ ५०

सततं तवसङ्गमे मतिः भवतीति कृतनिश्चयाभवम् ।
वद तुभ्यमियं मदालसा न हि भोगाय सदोपयोगिनी ? ५१

निरतं तव-देह-सौष्ठवं पटुदीर्घं भुज-मांसलं तनुम् ।
प्रविलोक्य कृतं रतौ मनः न हि ते प्रस्थरतुल्यमानसम् ॥ ५२

विधिना लिखितं यदस्ति मे ननु भोक्तव्यमवश्यमेव हि ।
न हि लाभ इहास्ति जल्पने प्रसमीक्ष्ये भवितव्यतां धिया ॥ ५३

इति श्रीगीर्वाणान्ध्र-भाषा-प्रवीणेन ओगेटि-परीक्षित्-शर्मणा विरचिते विंशति-सर्गीये यशोधरा-महाकाव्ये वियोगिनी-यशोधरा-समलंकृतः त्रयोदशः सर्गः समाप्तः ।

चतुर्दशः सर्गः

यशोधरा-विलापः ।

शोकाग्नि-तप्ता हि तदीय-मेधा हृदि-व्यथाकारित-गह्वरेषु ।
प्रस्राविता भावविलाप-काव्यं जज्ञे समुद्‌गीर्ण-सुवर्ण-रूपम् ॥ १

हे भूपते ! निर्मलचित्तरूप ! त्वयि प्रसन्नात्मनि लग्नचित्ता ।
भुक्ता यथेष्ठं भवता प्रमोदं त्यक्ता च देवी करुणा कुतस्ते ? २

दिने दिने त्वं व्यथया विचिन्तयन् कदापि मां कारणमेव नोक्तवान् ।
कथं निशीथेऽविगणय्य बान्धवान् गतोऽसि हा गौतम-विश्वभूषण ! ॥ ३

त्वया विना जीवितमेव नास्ति मे तटिल्लता वा घन-भूभुजं विना ।
ऋते शशाङ्काद‍ुडुयुक्तयामिनी यथैव रागाश्रय-हीन-गीतिका ॥ ४

त्वमेव सर्वं मम जीवितं सदा तथा समुद्‌गीर्य मुदालिलिङ्गिथ ।
क्व तादृशी प्रेमपरीत-भावना क्व कर्म ते घोरमिदं वद प्रभो ! ॥ ५

कुचेष्टितं चञ्चल-चित्तया मया विचार्यमाणेऽपि न याति दृश्यताम् ।
कृतेऽपि तस्मिन् तव पाद-वर्तिनीं न शासितुं किं तव शक्तिरस्ति वा ?

जानाम्यहं किं भवितेति नूनं व्यथाकुलस्यात्म निगूहिणस्ते ।
विलोक्य हा मानसमेव भेजे विश्रान्ति-हीनं मम कातरत्वम् ॥ ७

आगत्य सर्वं न हि बोधितोऽसि पत्नीं स्वपन्तीं युवतीं कदापि ।
नैवाब्ज-शोभा वदनं त्वदीयं संदर्शयामासिथ चारुनेत्र्यै ॥ ८

कथं नु बालं दरहासलोलं विलासिनीं मां हृदयेश्वरीं ते ।
प्रियान्स्वबन्धून् गुरुराज्यवर्गं तृणाय मत्वा गतवान्निशीथे ॥ ९

प्राणाधिकं जीवित-सौख्यभूतं दिवानिशं त्वां व्यथया विशीर्णम् ।
विलोकयन्तीव सहस्र-नेत्रैः परं न सुप्तास्मि निशासु तासु ॥ १०

हे द्वार-भूमे ! वद मां प्रियां ते कथं प्रभुः गौतम-चक्रवर्ती ।
गतः स्वयं येन पथा निशीथे स्वप्नं तदा प्राप्तवती न किंचित् ॥ ११

अद्यैव मां काल-निशा सिषन्ती निनाय निद्रावशतां प्रमत्ताम् ।
अस्यां क्षपायामपि जागरेच्छुः हा मन्द-भाग्या विधिना हतास्मि ॥ १२

गुरुः पिता पूर्ण-सुखाय तुभ्यं त्वदीयचिन्तामपनेतु माशु ।
कलासु सर्वासु सुशिक्षितं तत् ददौ प्रशस्तं बहुयौवतं हि ॥ १३

मदीय-मूर्ति सततं तवाग्रे समीक्ष्य कामं मुमुहे तदा त्वम् ।
अपश्यतो माम‌धुनापि नैव विदीर्यते ते हृदयं नरेन्द्र ॥ १४

पपौ हि पुष्पासवमेकपात्रे भवान्मया केलिकथासु पूर्णम् ।
स्मृत्वाऽपि ताः कामकथास्तु कामिन् नायासि मां दीनदया-स्वभावा ॥ १५

अन्योन्य-संपर्क-सुखेन जाताम् आत्मीय कामोद्भव-भावजाताम् ।
अन्योन्य-साकूत-विलासरम्याम् स्मरामि गाढं भवदीय चेष्टाम् ॥ १६

किमर्थमेवं कुपितोऽसि तूर्णं जानामि नाहं मम-पापकर्म ।
सत्यं प्रभो ! मे हृदयं द्वितीयं भाषस्व किं ते करणीयमस्ति ॥ १७

विलास-वापीषु विलोलदृग्भिः विलासिनीनां भुजमूलकान्तिभिः ।
उरोजकल्हार-सुकान्ति-कुड्मलैः सुखानुभूतिर्न हि चिन्त्यते विभो ॥ १८

वसन्तकाले सित-चन्द्रिकायां पुष्पोच्चये पल्लव-सैकतेषु ।
विलास-भावैः परिरभ्य मां त्वं संतोषयामासिथ रम्यबन्धैः ॥ १९

द्राक्षालता-मण्डप-डोलिकासु कला-निधेः सान्द्र-मरीचि-जालैः ।
पार्श्वस्थितैः स्रावित-वारि-यन्त्रैः सुखावधिं नेच्छसि किं प्रभो त्वम् ॥ २०

किं रोहिणी-पार्श्वतटस्थकानने नानाविधैः पुष्प-मरन्दरञ्जिते ।
वल्लीषु शय्यामधु-पुष्पगुञ्जने कामं भवान् बम्भर-कार्य-कारकः ॥ २१

भूत्वा प्रकामं बहुचिक्कणं तनुं सर्वं प्रियं यौवन-सार-भासुरम् ।
संगृह्य कामं मधुराधरं मम भुङ्क्तोऽसि कन्दर्पक-दर्पदायिन् ॥ २२

किमर्थमेवं मम जीवितं नु करोषि प्राणेश्वर ! सौख्यहीनम् ।
क्षिप्रं समाधान-मनागसोऽपि ददासि ते जीवित-चारुनेत्र्यै ॥ २३

हे भूपते दर्शन-मात्र-वश्य बभूव वैवाहिकमावयोर्हि ।
परस्पर-प्रेक्षण-मालिकाभिः पुरा च राजन्य-कदम्बमध्ये ॥ २४

कथं वसेयं सविचार-चित्ता सुताननेन्दुं तवरूप-भाजम् ।
विलोकयन्ती गतचित्र-भावान् संस्मारयन्तं बहुकामबन्धान् ॥ २५

गाढं प्रसुप्तां हृदयाधितल्पे विस्मृत्य बाधां सुखडोलिकायाम् ।
विसृज्य गच्छन् हृदयेश्वरीं मां न किंचिदागत्य जगाद भावम् ॥ २६

तस्यां रजन्यां मधुपानमत्तो नेत्रद्वयं घूर्णितवान्प्रकामम् ।
प्रसूनदाम्नाकिल ताडितोऽसि विस्मृत्य तत्प्रस्थितवान्विभो किम् ॥ २७

किं विस्मृतः काम-विलास-केन्द्रं हे भूपते ! काम-कला-प्रवीण ।
आधार-भूता मम यौवन-श्रीः आधेय-हीना न हि राजते हि ॥ २८

दिवानिशं भाति मदीय जीवितं प्रगाढ-दुःखेन च पूर्ण-सागरम् ।
पिबामि गाढाश्रु-जलं व्यथाकुला प्रतिक्षणं गौतम-तृष्णया परम् ॥ २९

इतः परं जीवन-वल्लरीयं विनाश्रयाशिलष्यति भूमिमेव ।
प्रति-त्रियामा मम जीवने किं विराजिता दीपन-दीप-हीना ॥ ३०

न कामये नश्वर-राज्य-वैभवं शरीर-सौख्यं विमलं च भूषणम् ।
सकाङक्ष्यते यो मम पुण्य-संचयो यतः सतीनां पतिरेव भूषणम् ॥ ३१

चन्द्रं प्रयात्येव विशुद्ध-चन्द्रिका शम्पालता मेघतले विलीयते ।
छायानुसंगच्छति भास्करं सदा नार्यो न यान्त्येव पतिं तु दुःखिताः ॥ ३२

तपात्यये कातर-विभ्रमाः प्रियाः महापगाः कङ्कण-निक्वणैस्तुरम् ।
प्रयान्ति संकीर्ण-विलोल-वीचिभिः पतिं समुद्रं विरहातुराः परम् ॥ ३३

प्रायेण लोके पशु-पक्षि-यूथे एको न चान्यं परिहृत्य तिष्ठेत् ।
कथं वयं प्रेम-परीत-भावाः वशेम शङ्काकुल-दैन्यचित्ताः ॥ ३४

सर्वेषु धर्मेषु गृहस्थ-धर्मं सुखावहं श्रेष्ठतमं हि मन्ये ।
तं तादृशं धर्म-गुणं विहाय विराग-मार्गे पतितोऽसि राजन् ? ३५

सप्तर्षयो भान्ति नभस्थले ते होमाग्नि-संभार-सती-समेताः ।
पुरा च सर्वे जनकादयोऽपि गार्हस्थ्य-धर्मेण भृशं पुनीताः ॥ ३६

विवाह-काले भवता किलोक्तं कदापि धर्मान्न हि चाल्यतेति ।
त्वया दृढ यद्विहितं प्रकामं स्मरस्व तत्रैव वने प्रशान्ते ॥ ३७

विरागमार्गे प्रगतिर्नवास्ति कलत्रपुत्रैः सहितस्य राज्ञः ।
स चानुमन्तव्य अहो जरायां युवाद्यसंसार-धुरं रोसि ॥ ३८

विलोक्य विद्याममलां च शेमुषीं मुदा पिता मे गुण-रूप-संपदम् ।
ददौ हि मां ते सहधर्मचारिणीं न चिन्तितं तत् सुतरां नराधिप ॥ ३९

समस्त-पापाधि-समाश्रये क्षपे विना ध्रुवं चन्द्रमसः समागमम् ।
विचित्र-तारावलिभिः समञ्चिता न राजसे ध्वान्त-परीत-विग्रहे ।। ४०

प्रजा च ते ध्वान्त-परीत-विग्रहं प्रवीक्ष्य कार्याणि विगर्हितानि ।
करोति पश्चादभिजानते भृशं कथं त्रियामे सुतरां न लज्जसे ।। ४१

तेभ्यः परं त्वं नितरां धरण्यां कीर्ति-प्रतिष्ठे प्रचुरं भजेः किं ?
गत्वा वनं किं भयता क्रियेत ? सर्वं पुरा प्रोक्तमहो ऋषीभिः ।। ४२

किमर्थमेवं प्रबलं धुनोषि हे कोकिल त्वं प्रभुवर्जितां माम् ।
त्वदीय-संमोहन-कण्ठरावैः ततस्त्वमेवं खलु कालरूपः ।। ४३

हे कोकिल ! गच्छ व ं प्रमत्तः यत्रास्ति राजा हृदयेश्वरो मे ।
आश्रावय त्वं कलकण्ठरागं तपस्यतो निर्दय-गौतमाय ।। ४४

हे चन्द्रमास्त्वं किमिति प्रसन्नः ? दृष्ट्वा दयालुं तव वंश-भूपम् ।
विसृज्य राज्यं विगतं निशीथे पापी किमर्थं भवसीति प्रश्नः ।। ४५

प्रसन्नताच्छादित-पूर्णिमादिने कला-समेतोऽपि कलङ्क-चित्रितः ।
यतस्त्वया पातकमाविलोकितं ततः सदाङ्केन विराजसे ध्रुवम् ।। ४६

अभाग्य-रूपं मम सून-यौवनं विना सुयोगं क्षयते महीपते ।
कृतं मया पूर्वमनन्त-दुष्कृतं विभुज्यते तन्निरतं मयाधुना ।। ४७

यत्रैव नार्यः सततं भजन्ते सुखानि भर्तुः सविधे प्रमोदम् ।
अवश्यमेवात्र वसन्ति देवाः कथं भृशं विस्मृत-भावुकोऽसि ।। ४८

हे यामिनि ! प्रेक्ष्य सदा-सुखान्विताम् ईर्ष्यायुता सन्निहित-प्रियां च माम् ।
दुःखैक-युक्तामकरोर्वियोगिनीं हा स्त्रैणमेवाखिल-पापकारणम् ।। ४९

तथा रुदन्तीं शतधा विलोक्य विमोचयन्तीव कवोष्ण-बाष्पम् ।
अरिष्टशय्यान्तिक-दीपवल्ली ससर्ज तीव्रं बहुतैल-बिन्दून् ॥ ५०

यतस्त्वमेवं बहुधान्यपुष्ट ! करोषि संताप-वियोगिनीं माम् ।
त्वदीय संमोहन-कण्ठरावैः ततस्त्वमेवं खलु कालरूपः ॥ ५१

निरीक्ष्य तां गौतम-धर्मचारिणीं सुधांशुमाली व्रजते हि पाण्डुताम् ।
दिने दिने कर्शित-राजयक्ष्मणा कृष्णेऽति नूनं भजते तनिम्नताम् ॥ ५२

परं रुदन्तीं विवशां कृशाङ्गीम् इयेष सा नेक्षितुमेवरात्रिः ।
इयं प्रयाता त्वरया हि तस्मात् इतीव प्राच्यामरुणो बभासे ॥ ५३

सूर्योदये बन्धुततिस्तदीया रोरूयमाणा समुपस्थिताशु ।
एकोऽपि तामार्द्र-हृदानुपश्यन् शशाक नास्याः शुचमापनेतुम् ॥ ५४

समागतं बन्धुततिं विलोक्य यशोधरा-दुःखमनन्तरूपम् ।
हठात् क्षणं संववृधे पुरस्तात् विभिन्नरूपैः बहुलं जनस्य ॥ ५५

अनुक्षणं गद्गद-खिन्नकण्ठी दुःखाग्नि संछन्नवतीव रेजे ।
अस्पष्ट-वर्णैः प्रबलं रुदन्ती नेत्राश्रु-पूर्णार्णव-भावसाम्यम् ॥ ५६

इति श्रीगीर्वाणान्ध्र-भाषा-प्रवीणेन ओगेटि-परीक्षित्-शर्मणा विरचिते विंशति-सर्गीय-यशोधरा-महाकाव्ये यशोधरा-विलाप-समलंकृतः चतुर्दशः सर्गः समाप्तः ।

पञ्चदशः सर्गः

श्वशुरोपलालनम्।

आधार-दण्डेन विकम्पमानः पदैस्खलन् भृत्यजनानुयायी।
विषाद-पूर्णास्य विविक्त-भावः याशोधरीयं सदनं प्रविश्य ॥ १

शुद्धोदनो वृद्धमहीपतिः शनैः संवीक्ष्य तां कम्पित-चेतनोऽभूत्।
हे पुत्रिके ! दुःख-परीत-मानसे मे हार्द-वाक्यं श्रवण-प्रियं शृणु ॥ २

तथागतस्ते हृदयेश्वरः परं ममात्मजश्चापि महीपतिः स्वयम्।
अहो सुगात्रि ! त्वमतीव दुःखिता सहस्व दुःखं सममेव नौ भृशम् ॥ ३

अस्मादृशानां गृहमेवसर्वं तथागतानां वसुधैवगेहः।
भावैर्विकारैर्वयमेव युक्ताः परं तु ते भौतिककर्म-बाह्याः ॥ ४

न कोऽपि जानाति कदापि कस्य भवेच्च किं प्राज्ञ-जनोऽपि लोके।
यदृच्छयापन्न-विपत्ति-कालः सदानुभोक्तव्यमहो सुगात्रि ! ॥ ५

लोके जनाः स्वात्मज-राज्य-वर्गं संरक्षितुं वैभव-भोग-भाग्यम्।
कृतप्रयत्नाः सततं भवन्ति कर्मानुसारं फलमाभजन्ते ॥ ६

ते जीवितं राज्यमिदं च रक्षितुं कृतप्रयत्नोऽस्मि वृथा बभूव च।
वयं हि सर्वे नितरां निमित्ताः करोति सर्वं खलु भागधेयम् ॥ ७

असंशयं प्राप्स्यति ते पतिः पुनः समागमं दिव्यतया स्वबन्धुभिः।
इति ब्रुवन् वृद्ध-महीपतिस्तदा विमुच्य बाष्पाणि ययौ व्यथाकुलः ॥ ८

प्रभातकाले तरुणी प्रियंवदा सखी कृशाङ्ग्याः सहसा च मैत्रिणी ।
ददर्श तां दुःखवतीमचेतनां हिमाञ्चितामैन्द्र-दिशं यथा सतीम् ॥ ९

उषोङ्क-बालार्क-समंज्वलन्तम् उत्सङ्ग-शय्या-शयितं कुमारम् ।
सुतप्तजाम्बूनद-रम्यदेहं ददर्श सा विक्लव-भीत-चित्ता ॥ १०

सखी-सुमना-प्रसान्त्वनम् ।

यशोधरां तां सहचारिणी सखी विलोक्य निर्नीरतलेवहल्लकम् ।
प्रतिक्षणं साश्रु-जलाप्रदुःखिता प्रसान्त्वयामास कथाभिरेवसा ॥ ११

उद्विग्न-चित्ता परुषाक्षरैस्तं निनिन्ददुःखाकुलिताङ्गना सा ।
नराधिपं वज्रकठोर-चित्तं व्यथाविला तां बहु-सान्त्वयन्ती ॥ १२

तस्याश्च दुःखं व्यपनेतुकामा सखी तदानीं सुमनाः प्रकामम् ।
रसान्तरे तां विनिवेशयन्ती पदैः सुवर्णैः कथयां बभूवे ॥ १३

हे भामिनि! वक्रित-चारुकैशिके किमर्थमेवं व्यथिता विरोदिसि ।
किमत्र कर्तव्यमिति त्वया परं विनिश्चितं तत्सपदं भवत्यहो ॥ १४

प्रायेण लोके विपदां परंपरा प्राप्नोति कष्टावृत-जीवसंचयम् ।
नैवास्ति कष्टं सततानुरागिणाम् आनन्द-पूर्णादर-चित्तदेहिनाम् ॥ १५

पतिव्रते प्राणसमे यशोधरे सहस्व दुःखं क्षमया मनस्विनी ।
वयं न किञ्चित् करवाम दैविकं तथापि भोक्तव्यमवश्यमेव हि ॥ १६

दशां त्वदीयामधुनापवीक्ष्य मे मनस्तु संदग्धमिवाव भासते ।
कथं नु ते स्वामिमनो विदीर्यते कठोरचेताः खलु राजवंशजाः ।। १७

हे चन्द्रमाः त्वं न हि राजसे किं क्षपावसाने बहुछिद्रगात्रः ।
कथं नु तां तामसरूपिणीं तु त्रपाविहीनोऽसि विहाय नूनम् ।। १८

वज्रात्कठोरं हृदयं नृपाणाम् अपि प्रसूनान्मृदुलं तथेति ।
अस्मादृशानां बहुपीडितानां जनः श्रुतिः सा शतधा हि तथ्या ।। १९

कथं कुमारं तरुणीं स्वजायां समस्त-सौख्याकर-राज्यलक्ष्मीम् ।
विहाय यातो बहु हिंस्त्र-केन्द्रं वनं लतागुल्मपरीत-घोरम् ।। २०

नाना सतीं निष्फलमेव सर्वं तथेति शास्त्राणि परं शशासुः ।
किं कानने तेन चिकीर्षुतुं वा गतं वदालि मम धर्मचिन्ता ।। २१

कुत्रापि दृष्टः प्रथितः कथासु लक्ष्मीकटाक्षैः परिरभ्यमाणः ।
विमुच्य माधुर्य-गुणैक-जायां श्रुतो न वै दृष्ट-जनः पृथिव्याम् ।। २२

विशाललोके बहवः प्रभूताः परं तु ते भौतिक-सौख्यमग्नाः ।
कदा न दृष्टं न कदापि चोक्तम् एतादृशं दारुण-घोरकर्म ।। २३

स्त्रियं प्रपञ्चे पुरुषा विमन्वते विलासकेन्द्रं मधुपानपात्रम् ।
कदापि ते साधु न चिन्तयन्ति किं सती प्रधानं खलु देशगौरवम् ।। २४

प्रायेण लोके पुरुषाः सुवाचो स्त्रिया क्षणं प्राप्य सुखं यथेष्टम् ।
संत्यज्य यान्त्येव विचार-शून्याः प्रसून-माधुर्यमिव द्विरेफाः ।। २५

यावत् सुगात्री वशमेति तावत् विरामहीनाः सततं यतन्ते ।
लोके नराः कामुकभावदीप्ताः विचित्रवेषाः स्थिर-भावलुप्ताः ।। २६

एते नराः भावि विचार-हीनाः तत्कालचेष्टा पटुवीरकृत्याः ।
उन्मत्तरूपाः परिहास-पुञ्जाः विधाय किं वाऽपि परं चरन्ति ॥ २७

अमुष्य कृत्यं निरतं विचार्य नास्त्येव बाधा मम मानसे च ।
किमर्थमेवं गतनिःस्पृहोऽभूत् प्रियां सुपुत्रं परिहीय तूर्णम् ॥ २८

सा मैत्रिणी चित्र-विचित्र-भावैः विभिन्न-तत्त्वानि मनोरथांश्च ।
अवर्णयत् क्लैब्य-विषादचित्ता सविस्तरं लौकिकवर्तनां च ॥ २९

निशम्य नेत्राञ्चलवारि-संततिं प्रमार्जयन्ती जननी यशोधरा ।
शिशुं च संस्थाप्य पयोदमण्डले जगाद सा निर्मथितान्तरङ्गिणी ॥ ३०

इति श्रीगीर्वाणान्ध्र-भाषा-प्रवीणेन ओगेटि-परीक्षित्-शर्मणा विरचिते विंशति-सर्गीय-यशोधरा-महाकाव्ये श्वशुरोप-लालनं, सखी-सुमना-प्रसान्त्वनम् इत्यादिभिः पञ्चदश-सर्गः समाप्तः ।

षोडशः सर्गः ।

यशोधरा-समाधानम् ।

सखि ! त्वदीयं परुषाक्षरान्वितं विगर्हितं पूरुष-जाति-निन्दितम् ।
वचस्तवेदं सततं हि बाधते ममान्तरङ्गं पतिवर्जितं भृशम् ॥ १

त्वदीरितं सत्यमिति प्रभाति जनेषु लोके सुखतत्परेषु ।
अयं महा-गौतम-चक्रवर्ती न तादृशो धर्मपथानुवर्ती ॥ २

आशैशवादस्य मनः प्रतप्तं व्यथानुकम्पाकरुणादिभिश्च ।
अयं हि सौख्यान्वित-जीवितोऽपि विसृज्य यातो दलितान्तरात्मा ॥ ३

शुद्धोदनस्तं सततं विरक्तं संस्थाप्य हर्म्यान्तर-डोलिकासु ।
ददौ सुसौख्याकर-वस्तुजालं प्रौढाङ्गनाः चारु-विलासमूर्तीः ॥ ४

तथापि सो नैव चचाल किञ्चत् विलोक्य तत्रस्थ विलास-भामाः ।
परं निनिन्देदमनन्तलोकं विराग-भावो सुगतस्तदानीम् ॥ ५

अयं पुरा कानन-दुर्गदेशे विहङ्गवीरुत्तरु-गुल्म-भीमे ।
हतं किरातेन गतं च भूमिं शुशोच तं पक्षिणमेव वीक्ष्य ॥ ६

तं देवदत्तं बहुदूषयन् तदा द्विजं स्वगेहं सनिनाय पाणिना ।
ततः परं मर्त्य-मृगाण्डजादिषु व्यथानुचिन्ताकुलितश्च मैत्रिणी ॥ ७

विचित्रलोकं भवरोगमग्नं विचेष्टमानं मनसानुमीय ।
संसार-एवायमसार-रूपः सदैव-निर्विण्णमना बभूव ॥ ८

तदा प्रभृत्येव सुजात-भावनः युवा बलीयानतिसुन्दरो मम ।
पतिः समस्तां वसुधां विहाय तत् निनिन्द सौख्यं सुतरां व्यथाविलः ॥ ९

जानन्यहं तस्य मनः समस्तं संसार-भारेण परं प्रतप्तम् ।
तथापि मे बाष्प-परीवहेन विरामहीनं मम नेत्र-युग्मम् ॥ १०

निरर्थकास्ते ऋतवो विना तं रविः शशी शाद्वलमेचका-भूः ।
मयूरलास्यं पिककीररावः सदात्र वासन्त-समीर-गन्धाः ॥ ११

सुखेन डोलायित-बाहुबन्धवे कदा पुनः तस्य समागमो भवेत् ।
ध्रुवं मदीयं नयनद्वयं लसेत् विधूदये फुल्लमिवोत्पलं श्रिया ॥ १२

विनास्थितायाः मम तेन भर्त्रा प्रगाढ-दुःखाकुल-मानसायाः ।
प्रपञ्च-चक्रस्य निदान-भूताः कथं व्यथीता ऋतवो भवेयुः ॥ १३

विहाय तं जीवितमेव वोढुं न शक्नुयां बालकमुद्वहन्ती ।
बालस्तु पृच्छेद्यदितं नरेन्द्रं कथं नु शक्ता कथितुं रुदन्ती ॥ १४

एनं मदीयं सुगुणं तनूजं प्रभूत-शिक्षान्वित-भासुरं वा ।
विधायनूनं प्रथिता भवेयम् अनन्तलोके सुगतस्य पत्नी ॥ १५

वियोगिनं तं घनमारुदन्ती पतिं निरीक्षे वर-चातकीव ।
तदीय-दिव्यामृत-बोधनेन श्रये मुदा भर्तु-पदारविन्दे ॥ १६

पतिव्रता मूढजनैर्विनिन्दिता बहिष्कृता रामजनाधिपेन सा ।
वियोग-भारा विवशाऽथकानने निनाय सीता कथमप्यहानि च ॥ १७

बाढं कथंचित् पति-वर्जिता सा शकुन्तला पुत्रयुता व्यनैषीत् ।
तां कण्वपुत्रीं हृदये सदाहं संस्मार्य धैर्येण मुदा वसेयम् ॥ १८

पुरा च पत्नी नल-चक्रवर्तिनः समस्त-कान्तागण-चारु-रूपिणी ।
उवाह दुःखं प्रियविप्रयोगजं हृदम्बुधौ भावतरङ्ग-संकुले ॥ १९

यथा च भैमी गत-निःस्पृहासती नलं समासाद्य नवं व्यराजत ।
तथा कदा वाऽपि मदीय-जीवितं पुनः सुखं प्राप्य मुदा लसेत् ध्रुवम् ।। २०

पतिव्रता सा धरणी-तनूजा नैवास्ति साम्यं मम जीवितस्य ।
प्रोक्तं विदुःखावृत-जीवितेन तथा च साम्यं मम पाप एव ।। २१

शकुन्तला स्वर्ग-धरातलस्य समागमा तत्र महर्षि-पुष्टा ।
नाहं तथा वर्धित-दिव्यकन्या तथा च साम्यं परिहास एव ।। २२

नलस्य पत्नी वरवर्णिनी सा अनेक कष्टानि बभार भैमी ।
तया सुगात्र्या न हि मेऽस्ति साम्यं व्यथाविला वच्मि वियोगभारा ।। २३

आशा मदीया शतधा व्यनक्ति पुरा यथा ताः सकलाश्च दिव्यम् ।
समागमं स्वीय-वरैरवापुः तथा ममाप्येवमवश्यमस्तु ।। २४

याशोधरीयं हृदयं रसात्मकं दुःखाग्नि-संछादित-सागरोपमम् ।
कल्लोलमाला-परिभूषिताननं नूनं विलोक्यैव जलायितोऽदधिः ।। २५

तथा रुदन्तीं प्रविलोक्य भामिनीं शशङ्किरे तत्र समागता जनाः ।
ध्रुवं नु सा पत्तनसुन्दरी वरं दधार याशोधर-रूप-संपदम् ।। २६

आक्रन्द्यमानां तरुणीं यशोधराम् आलोक्य नूनं नगरी व्यथाकुला ।
नानाविधैः दुःख-परीत-रूपकैः आभाति रामा-मुखमण्डलैः भृशम् ।। २७

अनागसं नैव कृताऽस्मि नूनं हे भूपते शाक्यकुलाधिनाथ ।
त्वामेव प्राप्स्यामि सबालकाऽहं विना भवन्तं न हि जीवितं मे ।। २८

यद्यत् कृतं भावज-भावकर्मणा सर्वं मदीये हृदये व्यलिख्यत ।
काव्यं मदीयं हृदयं व्यपद्यत सान्तत्यबाधाविल-भावपङ्क्तिभिः ।। २९

न कोऽपि शक्तः पठितुं धरण्यां कारुण्यभावाञ्चित-रम्यकाव्यम् ।
विना रसार्द्रीकृत चित्त-सद्म भाषां विजानन्नपि काव्यलोके ॥ ३०

संगीत-नादाञ्चित-शब्दजालं शृङ्गार-चेष्टावृत-हाव-भावान् ।
अज्ञानतो लौकिक-पाठकस्य भवेदिदं नूनमगाधमेव ॥ ३१

हे नाथ ! नूनं सुतरां न जातु विचिन्तितं काव्य-रस-स्वरूपम् ।
त्वया मदीयं हृदयं स्वबुद्ध्या ध्रुवं महारण्य-तपस्विना किम् ? ॥ ३२

यदीदृशी दिव्य-विराग-भावना पुरा विवाहाद्यदि तेऽभ्यरोचत ।
किमर्थमेतादृश-भावबन्धनं प्रकल्प्य यातोऽसि विनावरुन्धनम् ॥ ३३

आशा जनानां नवजीवदायी कार्ये विलग्नं सुमुखं करोति ।
आलस्य-भावेन परीत-चित्तम् उत्साहपूर्णं सततं विधत्ते ॥ ३४

प्रतिक्षणं गौतम-तृष्णया परं दिवानिशं भाति मदीय-जीवितम् ।
प्रगाढदुःखेन विरच्य सागरं पिबामि गाढाश्रुजलं व्यथाकुला ॥ ३५

पदे पदे चुम्बनमाचरन्ती बालं प्रियं चञ्चल-पाणिपादम् ।
स्वीयं चरित्रं शतधा विनिन्द्य रुरोद सा जीवित-सौख्यहीना ॥ ३६

इति ब्रुवन्त्या विशदं मृगाक्ष्याः बभूव शोकाग्नि-सुदीप्त-बुद्धिः ।
प्रमृज्य सा बाष्प-जलं कवोष्णं पटान्त-भागेन मुखं जुगोप ॥ ३७

शुच-द्वितीया जननी सगद्गदा पदे स्खलन्ती दृढनिश्चया सती ।
विवेश बालेन तमिस्रमन्दिरं तटिद्यथा मेचकनीरदन्तरम् ॥ ३८

इति श्रीगीर्वाणान्ध्र-भाषा-प्रवीणेन ओगेटि-परीक्षित्-शर्मणा विरचिते विंशति-सर्गीय-यशोधरा-महाकाव्ये यशोधरा-समाधान-समलंकृतः षोडश सर्गः समाप्तः ।

स प्त द शः स र्गः

ऋ तु घो ष णा .... वसन्तर्तुः ।

वसन्त-वार्युर्विमलं वहन् प्रियं लताद्रुमाभं तनुयष्टि-भासुरम् ।
विलीन-जीवामल-सारपूरितं करोति सत्त्वं ननु चेतनं सदा ।। १

चूतप्रवालान् बहुधानुभूय पुंस्कोकिलोऽयं निज-कण्ठरावैः ।
मत्तः परं कूजति मञ्जुरागं वसन्तरागेण मनोजमूर्तिम् ।। २

तटाकतीरे विलसद्द्रुमाणां शाखाग्र-नीडेषु पतङ्ग-जीवाः ।
स्वजीवितं दैहिक-कामबन्धैः कुर्वन्ति ते चञ्चु-पुटैः सरागम् ।। ३

स्वेदाम्बु बिन्दु-प्रविकीर्णदेहैः नासाग्र-घर्माम्बुलव-प्रकीर्णैः ।
उरोजलिप्तैः मधुपुष्परागैः गन्धायिताश्चैत्र-मनोज्ञरामाः ।। ४

लोके जनास्तत्परमानसाभवन् चिञ्चाल-पत्रैः कृत सूप-भक्षणे ।
हैयङ्गवीना-कलिते सुगन्धिले कुस्तुम्भरी-शाक-विलिप्त-भोजने ।। ५

वसुन्धराचित्रितवृक्षजालैः प्रकामसंरूढ-पवित्रघासैः ।
विलोकिनां दृष्टिपथं समेति यथा नवोढेव हरीत-रूपा ।। ६

मनोज्ञपङ्केरुह-चारुगन्धैः गुञ्जन्मधुव्रातरवैः प्रमोदम् ।
नानाविधैः पक्षिगणाभिभान्तं सरोवरं सर्व-सुखावृतं च ।। ७

सुपुष्पिताः वृक्षलताः प्रहर्षिताः मदाञ्चितैर्बम्भर-गुञ्जनैस्तदा ।
विराजमानाः फलगर्भ-तुन्दिलाः भवन्ति नूनं मधुमास-शोभिताः ।। ८

प्राप्ते वसन्ते नववत्सरे मुदा जनाः सदाशावृत-भावचित्ताः ।
आम्लाम्र-निम्बाकृतव्यञ्जनादीन् आस्वादयन्तो सुखमाप्नुवन्ति ॥ ९

जनाः प्रहृष्टाः विविधैः सुगीतैः नक्तं च नानाविधभिन्नकाण्ठैः ।
संदाहयन्तः खलु कामदेवं विडम्बनां केवलमाचरन्ति ॥ १०

अनारतं रागपरीत-चेताः वसन्तमूर्तिः सुतरां न रेजे ।
अनन्त-भावाविल-मानसां तां यशोधरां वीक्ष्य वियोगिनीं तु ॥ ११

खिन्नः सदा सूक्ष्मतरेण वायुना दृष्ट्वा प्रकामं वरपत्तनश्रियम् ।
दुःखाकुलां तां जननीं व्यथाकुलः सहायहीनश्चपलं तिरोऽभूत् ॥ १२

ग्रीष्मर्तुः ।

समस्त-जीवानिल-तापितं बृहत् नितान्त-वात्युद्धत-भीकरं महत् ।
प्रचण्ड-सूर्यातप-दीपितं जगत् बभूव सर्वं ग्लपितान्तरालकम् ॥ १३

गीष्माऽऽतपे चण्डरविप्रभावैः विदीर्णगर्भार्क-फलानि वेगम् ।
तन्वन्ति वात्योद्धतवेगकीर्णैः वातूल-पुञ्जैः निभृतं च शून्ये ॥ १४

निष्क्रान्तमेनं प्रकृतिर्विलोक्य रौद्राकृतिः खण्डितमेव चक्रे ।
रेजे प्रसान्द्रं विमलं यशोऽस्य, तथेति तूलं शकलायितं परम् ॥ १५

सूर्यातप-ग्लापित-देहवर्णा सा चोर्वरोदीर्ण-हृदन्तराला ।
प्रियं च वर्षागमसंगमोत्सुक परं विवृत्याजधनेव रेजे ॥ १६

स्वल्पाम्बु-संभासित-पल्वलेषु स्वपन्ति तृप्ता द्युमणीर्वितप्ताः ।
अर्धाङ्ग-मग्नाः प्रचुरं लुलायाः तदा तदा शृङ्ग-खनित्र-कूर्दलाः ॥ १७

मण्डाम्बुतक्राञ्चित-गन्धवारि हिमाश्मखण्डावृत-पान-शाला: ।
मनोज्ञनेत्राञ्चल-दीप्त-भामा: प्रपालिका भान्ति मरुस्थलीषु ।। १८

प्रवीक्ष्य तत् घोरममुष्य कृत्यं गभस्तिमान् नैव सहिष्णु-भावः ।
रौद्रं प्रचण्डानल-मूर्तिमन्तं स्वीयं प्रतापं बहुकोपपूर्णम् ।। १९

वर्षर्तुः ।

वर्षागमः सान्द्रघनावृतस्तुरं विद्युल्लता-दर्शित-लोकमार्गः ।
निरन्तरं दर्दुरवेदपाठकैः संकीर्तितो पश्यति जीवलोकम् ।। २०

अनारतं सान्द्रमनोविकारः मयूरलास्यामलचित्तवृत्तिः ।
सशीकारारम्भः कणमण्डितश्च प्रभाति संपच्चयमुच्छलीन्द्रः ।। २१

सकेतकीगन्धरजोगुणाक्तः निरस्तरोलम्ब-मनोहर-ध्वनिः ।
छिद्रातिभारेण-विमृष्टशोभः कल्हार-पत्राञ्चित-वर्षबिन्दुः ।। २२

जलाशयौ श्रावण-भाद्रपादौ यशोधरा-कज्जल-नेत्ररूपौ ।
नीलोत्पलाभावृतदृष्टिपातौ अनारतं वर्षत एव दुःखम् ।। २३

दुःखाविलो ध्वान्तपरीतचित्तः रसार्द्रतां कल्पितवान् धरण्याम् ।
यशोधरायाः स्थितिमाविलोक्य धाराप्रपातैरिव शोकमूर्तिः ।। २४

प्रियाः प्रियान् स्वीयभुजान्तरेषु संबद्ध्य कामावृतबाहुबन्धैः ।
आलिङ्गनैः कोष्णविचुम्बनैश्च कुर्वन्तिकामान्धममुं च वर्षम् ।। २५

नितान्तदम्भोलिकरालरूपः विद्युल्लतावेल्लित-कालदेहः ।
एकान्तशय्यागत-कामुकानां रतान्त-सौख्यं विददाति नूनम् ।। २६

अन्तर्गतान् रागपरीत-भावान् प्रदर्शिताः सर्वकलाप्रवीणाः ।
रामाः प्रियं कौरवकारुणाभैः विचित्रिता भान्ति-कराङ्गुलीभिः । २७

यशोधरा-दुर्दिन-भावरूपं वर्षाकृतैः दुर्दिन-कालमार्गैः ।
एकीकृतं भाति घनान्धकारे धाराप्रवाहैर्गगनं च भूमिः ॥ २८

शरदृतुः ।

आभूषिताः कार्तिकमेघपुञ्जैः प्रसन्नशीतांशुमयूखजालैः ।
ज्योत्स्नांशुलावण्य-परीतदेहा ग्लौबिम्बवक्त्रामलतारका बभौ ॥ २९

अम्भोधि-कल्लोलपुनीतदेहा कार्तीकराकानिशि पूर्णवक्त्रा ।
कल्हारमालाम्बुरुहाभिरूपा ज्ञानाच्छवर्णावृत-शारदा हिं ॥ ३०

ईशान-हैमावलि-नारदाभा कुन्देन्दुहंसच्छवि-भासमाना ।
शेषेन्द्र-मल्लीसुम-शङ्खवर्णा सा शारदा कामदुहामला हि ॥ ३१

सा शारदा शुभ्रतनु-प्रकाशा यशोधरा-साम्यमनुव्रजन्ती ।
चन्द्रार्भकाशान्त-परिभ्रमन्ती प्रकाशते गौतम-भावशुभ्रा ॥ ३२

अगस्त्यमौनीन्द्र-पुनीततोया ज्योत्स्ना-शशाप्लावन-दत्तदृष्टिः ।
सुधाच्छभावावृत-गौतमस्य कीर्तिप्रभाकाश इवावतस्थे ॥ ३३

हेमन्तर्तुः ।

शरद्व्यपाये हिमबिन्दुरम्यः हेमन्तकालः समुपागतोऽयम् ।
नीहारपूर्णः पटुभीकरात्मा सस्यावृतो जीवन-जीवदायी ।। ३४

संध्यारुणाभावृतरागलोकः केदार-भूभाग-मनोहराकृतिः ।
अम्बारवोत्प्लावित-धेनुलोकः विचित्र-धान्यावृत-जीवलोकः ।। ३५

संक्रान्तसूर्यातपकोष्णलोकः सानन्द-शीतोष्ण-समानदर्शी ।
समस्त-सस्यावलि-दृप्तरूपी प्रपञ्चितापूर्ण-समस्तधान्यः ।। ३६

श्रीरामचन्द्राभिमतः प्रकामं कूष्माण्ड-पङ्क्त्यावलि-सूनराशिः ।
रसार्द्र-पूर्णामलकैर्लसन्तः रामाधराभैः बदरी-फलैश्च ।। ३७

सर्वत्र देशे च जलाशयेषु नीहार-रूपेण विनिर्गतोऽसौ ।
यशोधरा-शोक-कृपीटयोनेः विनिर्गतो धूमइवावभासे ।। ३८

शिशिरर्तुः ।

शनैः शनैश्चाशिशिरप्रभुत्वं ततान लोके पटुशीतदृष्टचा ।
जडत्वमापाद्य जडप्रपञ्चे स जाडचभावं वितनोति नूनम् ॥ ३९

शैत्यानिल-प्राभव-दीर्णदेहः शिव! शिवाया हि समस्तलोकम् ।
रक्षस्व जाडचादिति लोकजीवाः प्रियस्तवैर्जागरयन्ति देवम् ॥ ४०

लोकः समस्तो विकृतिं समाप्य वार्धक्य-चिह्नोऽपि परिष्वजन्ती ।
पत्राम्बरा-निर्गत-देहयष्टिः विराजते कान्ति-विहीन-जीवः ॥ ४१

दृष्ट्वा तदीयं पटुशोच्यभावं विमुञ्चयन् बाष्पमिवावधुन्वन् ।
स्वकीयपत्राणि दिवानिशं च अन्तर्गतं क्रन्दति शीत्कृतैः सः ॥ ४२

समागतं पूजित-कामदेवं वसन्त-बन्धुं शिशिरः प्रवीक्ष्य ।
शनैः शनैर्नग्नशरीर-रोगैः तिरोगतिं प्राप विभिन्नचित्तः ॥ ४३

इति श्रीगीर्वाणान्ध्र-भाषा-प्रवीणेन ओगेटि-परीक्षित्-शर्मणा विरचिते विंशति-सर्गात्मके यशोधरा-महाकाव्ये ऋतुघोषणा-समलङ्कृतः सप्तदशसर्गः समाप्तः ।

अ ष्टा द शः सर्गः

राहुल-शैशव-वर्णनम् ।

क्रमेण सा विस्मृत शोच्यभावना कुमार-चेष्टादि-विनोदनैः चिरम् ।
यथा कथंचित् परितुष्टमानसा निनाय कष्टेन दिनानि भामिनी ॥ १

उरोदराभ्यां विचलन्तमेनं पद्भ्यां कराभ्यां वितरन्तमेनम् ।
संसारसिन्धुं हसितप्रलापैः समीक्ष्य सा सस्मितचारुवक्त्रा ॥ २

आलाप-माधुर्य पदाभिभूषिता हस्ते गृहीत्वा नव-पुत्तलीमिव ।
आनन्दरूपेण च खेलनोद्यतं पुत्रं मतल्ली नितरां विभासिता ॥ ३

हे अम्ब ! हे तात ! पितः सखी मे त्यस्पष्टविज्ञेय सवर्णपादैः ।
प्रजल्पितं प्रसृत-फेनिलं तं दृष्ट्वा कुमारं जननी तुतोष । ४

जानासि न त्वं हृदयं स्तनन्धया ! मदीयचिन्ताकलितं विदग्धम् ।
यथा च ते कामितमस्ति चित्ते तथैव नूनं कुरुषे पितेव ॥ ५

भ्रमन् सबालो मणिकुट्टिमेषु छायां विलोक्यापतितां स्वकीयाम् ।
अनुक्षणं तां स्वकरेण गृह्णन् अप्राप्यतां प्राप्य भृशं रुरोद ॥ ६

आक्रन्दमानः प्रचुरं प्रसर्पन् जानूकराभ्यां वसुधातले च ।
इतस्ततोत्क्षिप्त तदीय-बिम्बं भूम्यां भियावीक्ष्य विरौति बालः ॥ ७

तदीयवक्त्रं मुखफेनिलार्द्रं सुहासितं दाडिमबीजदन्तान् ।
नवीन-तूलाधिक-मार्दवं तं पयोवराभ्यां दृढमालिलिङ्ग ॥ ८

तं पुत्रकं पीनपयोदमण्डले निक्षिप्यवात्सल्यमयाऽभिचेष्टया ।
नूनं प्रपेदे पुलकाङ्कुरादीन् पिण्डीकृताङ्गं तनयं विधाय सा ॥ ९

संस्थाप्य तं बालकिशोरमूर्तिम् आनन्ददोलायितदोर्लतायाम् ।
आलापनाभिः प्रिय-तालनादैः आश्वासयन्ती नितरां चकासे ।। १०

तदा तदाऽकर्षति मुष्टिभिस्तां तदीयफाले चिकुरप्रकाण्डम् ।
नखन् तदीयं मुखमण्डलं तु हठात् सदंदंशति नाशिकां च ।। ११

मात्रा तया क्षोणितले स-बालो धरा-परागाञ्चित-नग्नदेहः ।
दृष्टः परं रुद्ध-तदीय-मार्गः विरौति संलक्षित-दन्त-पङ्क्तिः ।। १२

विलोक्य तं खेलन-मग्नचित्तं सुरोहिणी-शीतल-सैकतेषु ।
क्रीडारसं प्राप्य विभुञ्जमानं ननन्द सा निर्विशतीव बाल्यम् ।। १३

नीलाम्बरे कन्दुकरूप-शोभिनं चन्द्रं समालोक्य रुरोद बालकः ।
तद्रोदनं शामयितुं यशोधरा नीलाम्बरी रागमसौ जगौ मुदा ।। १४

संहृत्य सर्वं विदलिष्यमाणं श्यामायमानं मृदुकाकपक्षम् ।
प्रसादयित्वा जननी तदीयं विचुम्बते चन्द्रमुखं तदानीम् ।। १५

न हि क्षणं त्यक्ष्यति पुत्रकं सा प्रतिक्षणं चुम्बति किन्तु माता ।
न कोपि जानाति तदीय-भावं मात्रा स्वयं सर्वमिदं समूह्यम् ।। १६

दृष्ट्वा तदीयं हसितारुणास्यं बालस्य लोलाकृति-काक-पक्षम् ।
विचुम्ब्य माता विशदं सुफालं वात्सल्य-भावेन तमालिलिङ्ग ।। १७

अम्बे ! प्रियं क्रीडनकं विभाति विहायसे सत्वरमानयस्व ।
तथेति पश्यन् गगने मृगाङ्कं पदे पदे क्रन्दितवान् कुमारः ।। १८

चुचुम्ब तं प्रस्खलितं पदाभ्यां विना निमित्तं मधुरं हसन्तम् ।
कुर्वन्तमार्द्रं ललितोष्ठनादैः परुरत्परुरन्मञ्जुमहोप्रनादम् ।। १९

रम्यं तदीयं करपल्लवाग्रं संचारयामास समावलम्ब्य ।
शनैः शनैः बुद्बुद-फेन-पुञ्जैः हसन् प्रयातो जननीं किशोरः ।। २०

अंसौ विनिक्षिप्य सुखेन तन्वी प्रसान्त्वयन्ती प्रचुरं लपन्ती ।
इतस्ततो भ्रामित-देहवल्ली तमानुनाशिक्यरवैः जुगुञ्ज ।। २१

तदा तदा चंक्रमणैः प्रधावन् पथि प्रहृष्टो निखिलं च पश्यन् ।
मुखे च तत्तद्विनिवेश्य खादन् हसन् सदा मातरमेति बालः ।। २२

कालक्रमेणाथ विचुम्बितानि सुपञ्चवर्षाणि प्रभावितानि ।
तदैव सर्वाक्षर-मालिका च जजाप बालः प्रथमेक्षणेन ।। २३

अस्पष्ट-गीर्वाण-विचित्ररेखाः लिलेख बालः सित-सैकतेषु ।
अदृष्टरेखा इव जीवितस्य न कोऽपि शक्तः पठितुं समीक्ष्य ।। २४

सुवर्ण-सूत्रान्तर-वर्ण-बिन्दवः परं पिनद्धाम्र-शलाटु-रूपकाः ।
कुमारमध्यं परितः सचित्राः चकासिरे तारक-मालिकेव ।। २५

न हि क्षणं तिष्ठति गेहभागे सदा स्वयं क्रीडन-तत्परोऽभूत् ।
शृणोति किंचित् न हि मातृवाक्यं चिन्ता-विहीनः खलु राहुलोऽयम् ।। २६

राहुलक्रीडा-वर्णनम् ।

बालः कदाचित् सहवासिभिः समं तस्यां नगर्यां बहु खेलने परः ।
आखेल्य सायं विविध-प्रकारैः स्विन्नः समायाति च नैज मन्दिरम् ॥ २७

पुत्रः सदा धूलिविलिप्तदेहः काञ्ची-गुणाभासित-गुल्म-भागः ।
प्रतिक्षणं फेनिल-शून्य-हासैः स्वमातरं पारयतीव दुःखम् ॥ २८

विलोक्य हर्षेण रजःकणावृतं तदीय चेष्टा-विभवाञ्चितं तनुम् ।
प्रियं समालिङ्ग्य यशोधरा परं बभूव गाढं पुलकाञ्चिता भृशम् ॥ २९

कुमार-शीर्षे विदलिष्यमाणं भृङ्गाङ्गना-चिक्कण-काक-पक्षम् ।
आभासते पाप-परीत-भावैः पित्रा परित्यक्त इतीव शंशन् ॥ ३०

आघ्राय मूर्धानमभाग्यभामा हस्तेन संस्पृश्य तदीयफालम् ।
प्राणाश्च मे जीवन-सौख्य-रूप ! प्रियं त्वमेवासि मदीय-चन्द्रः ॥ ३१

दृष्ट्वा कुमारं सह बाल-पुत्रैः क्रीडाङ्गणे सैकत-चित्रदेशे ।
नानाविधान् कृत्रिम-गेह-रूपान् विरच्यमानं प्रचुरं मुमोद ॥ ३२

सदा स्वमित्रैः सहितः कुमारः प्रयाति संयाति गृहं विजल्पन् ।
पप्रच्छ तां मातरमेकदापि वियोगिनीं सो न हि दुःखितां च ॥ ३३

एवं स्वकालं विविधैश्च खेलनैः संयाप्य गेहं प्रति याति बालकः ।
मित्राणि सर्वेऽपि गृहं व्रजन्ति सर्वं यथापूर्वमिवावतस्थे ॥ ३४

स एकदा स्वीय-सुहृज्जनालिं दृष्ट्वा प्रियं नन्दित-पितृभिश्च ।
प्रयान्तमाशावृत-चित्त-भावः विचारयामास हठात् स बालः ॥ ३५

बाला इमे यान्ति प्रहर्षपूर्णाः खाद्यं सुरम्यं मधुवस्तु-जालम् ।
आमोदिताः क्रीडनकानि कानि क्रेतुं द्रुतं यान्ति घन-प्रलापैः ॥ ३६

अहं स्वयं मातृ-पदारविन्दे क्रीडामि नित्यं निवसामि सत्यम् ।
कदापि मात्रासहितो नगर्यां दृष्टोस्मि चित्राणि विचित्रितानि ॥ ३७

अनेक-भावैर्बहुचिन्तयित्वा रुदन् स वीथ्यासु दुधाव बालकः ।
मित्राणि सर्वे समवीक्ष्य सर्वं तमेव भीत्या परमन्वधावन् ॥ ३८

अहो वयस्य ! किमवेक्ष्य रोदिसि कथं नु दुःखाकुल-चेतनोऽभवः ।
चलस्व मित्रैः सममेव निर्भयं नवं वयं क्रीडनकं नयेम ते ॥ ३९

वयं प्रियाः मित्रवराः नितान्तं नैवास्ति किंचित् खलु कारणं ते ।
अकारणं रोदिसि राहुलोऽसि दास्याम रे क्रीडनकं च तुभ्यम् ॥ ४०

तदीय मित्राणि मधुप्रलापैः प्रसान्त्वयित्वा सह तेन जग्मुः ।
सर्वं पितृभ्यां विनिवेद्य सान्तं ते बभ्रमुश्चित्रमनोरथैश्च ॥ ४१

वीथ्यासु बालाः प्रियमण्डितानि वस्तूनि दृष्ट्वा परमारटन्तः ।
मह्यं सुरूपः खलु रोचतेऽयं नायं कुरूपः पटुकालवर्णः ॥ ४२

अयं मयूरो बहुपिच्छरम्यः नेत्रोत्सवं मे वितनोति चित्रम् ।
क्रीत्वा तमेवाखिल-मित्रबालाः क्रीडेम सायं सुकुमाररूपाः ॥ ४३

अयं मृगो चन्द्रमसि प्रदीप्तो द्रष्टुं मनोरथं मे नितरां चकर्ष ।
पुरा वने हेममृगो यथा च सीतापतेः प्रेमपरीतचित्तम् ॥ ४४

चिक्रीय खाद्यानि च मोदकानि फलानि नानाविध-बीजकानि ।
खादन्त एवाखिल वस्तु-राशीन् विलोक्य सर्वे मुदिता भवन्ति ॥ ४५

दृष्ट्वा च तेषां विविध-प्रचारान् प्रडीन-सौभाग्य-विराजमानान् ।
स्वयं तदा ते पितरः प्रहर्षं चिन्ता-विहीनाः मुदिताऽभवन्स्ते ॥ ४६

आसायमेवं बहुखेलनेषु श्रान्ताः परं घर्म-जलाविलाश्च ।
भूरागलिप्ताः प्रियबालकास्ते सौधानि सायं सहसा व्रजन्ति ॥ ४७

इति श्रीगीर्वाणान्ध्र-भाषा-प्रवीणेन ओगेटि-परीक्षित्-शर्मणा विरचिते विंशति-सर्गीये यशोधरा-महाकाव्ये राहुल-शैशव-वर्णनम्, राहुल-क्रीडा-वर्णनम् इत्यादिभिः समलङ्कृतः अष्टादशः सर्गः समाप्तः ।

ए को न विं श ति स र्गः ।

यशोधरा-राहुल-संवादः ।

अम्बे क्षुधार्तोऽस्मि परं प्रयच्छ खाद्यं वयस्यैः सह क्रीडितोऽस्मि ।
तथा क्षणे क्षालित-हस्तपादो उपाविशत् भोजन-लग्न-चित्तः ।। १

अतिप्रियं स्वादु मधु-प्रपूरितं भुञ्जन् सबालो जननीमवोचत् ।
मतल्लिके भुञ्ज सुपायसान्नं स्वादिष्टमस्तीति पदे पदे ताम् ।। २

अहं प्रकामं व्रतमाचरामि नाहं विभुञ्जेयमिदं सुपायसम् ।
न किञ्चिदिच्छा मम विद्यतेऽस्मिन् सुत! प्रियं भुञ्ज सुखेन सर्वम् ।। ३

तदा स मातुर्वचनं विशृण्वन् बालः स्वयं तां जननीमपृच्छत् ।
किमर्थमेवं व्रतमाचरन्ती निर्लक्ष्यभावाऽसि शरीरसौख्ये ।। ४

शरीरमेवाखिल-कर्मकारणं सुकर्मणा दिव्य-शरीरभावः ।
अन्योन्य भावेन जनः समस्तं नूनं विधत्ते खलु कर्मकाण्डम् ।। ५

भुञ्जाम्यहं सर्व-रसात्तखाद्यं क्रीडामि सायं मम मित्र-वर्गैः ।
देहं मदीयं पटु-शक्ति-पूर्णम् असंभवं कर्तुमपि क्षमं च ।। ६

एवं वदन् मातरमेकदा हि पप्रच्छ तूर्णं क्व पिता ममाद्य ।
पार्श्वगृहे प्रत्यहमेव बालाः पितेति तं जुह्वति भक्तिभावम् ।। ७

तेषां मतल्ली कुरुते स भक्तिकं सेवां तु तस्मै स्वयमेव सर्वदा ।
ताभ्यां कुमाराः प्रणमन्ति सादरं तौ तान् गृहीत्वा मधुरं विचुम्बतः ।। ८

मातुः प्रियं प्रश्न-परंपराभिः शुकप्रलापेन समं विजल्पन् ।
उत्संगतल्पे विनिमय्य शीर्षं भृशं विगुञ्जन् प्रबलं रुरोद ।। ९

श्रुत्वा तदीयं वचन-प्रवाहं सगद्गदा सा जननी प्रकामम् ।
तपात्यये कुल्य जलानुरूपं प्रपूरयामास जलेन नेत्रे ॥ १०

तदीय वाचा नितरां नुदन्ती सविस्तरं पूर्व-कथां जगाद ।
यथाक्रमं नेत्र-विनिर्गताश्रु विसर्जयन्ती स्वसुतोत्तमाङ्गे ॥ ११

विलोक्य तन्वीं विवशां रुदन्तीं जजल्प बालो जननीं सभीतः ।
अहं स्वयं मे पितरं नयेयं यदि त्वयाऽऽज्ञप्तवरो भवेयम् ॥ १२

कथं पिता मेऽस्ति तदीय वाणी कथं च तद्वर्तनमेव मातः ।
किं देह-वर्णः समकाञ्चनं किं प्रेम्णा च सर्वं कथयस्व दिव्यम् ॥ १३

पिता मदीयः क्व गतः कथं वा कस्मिन् प्रदेशे तपते महात्मा ।
निर्वर्ण्य मां त्वं यदि प्रेषयेस्तं गत्वा नयेयं सहसा सहर्षम् ॥ १४

आकाश-मार्गेण पितुः प्रदेशं पक्षान्समाबध्य मदीय बाह्वोः ।
उड्डीय तं मे वर-पक्ष-भागे निक्षिप्य संतोष-भरेण यास्ये ॥ १५

कथं समाज्ञास्यति पुत्रकोऽयं कथं मदीयानि वचांसि शृण्यात् ।
विलोक्य मां सो यदि ताडयेद्वा कथं नयेयं जननि ! वदस्व ॥ १६

मया समागच्छ पवित्र-देशं यत्रैव राजा लसते तपस्यन् ।
आवां च तस्मै बहुपूजनादीन् कुर्याव नित्यं भवराग-भावैः ॥ १७

निशम्य वाक्यं ललितं सुतस्य प्रसन्न-माधुर्य गुणात्मकं च ।
आघ्राय शीर्षं सुचिरं तदीयं विचुम्बयन्ती दृढमालिलिङ्ग ॥ १८

हे वत्स ! किं ते प्रियमाचरेयं वदस्व मे लोचन-पूर्ण-चन्द्र ।
जानामि नाहं क्व गतः पिता ते वक्ष्यामि कस्मात् गतवान् निशीथे ॥ १९

महीपतिः सर्व-धरातलस्य पीनोन्नतोरस्थल-कम्बुकण्ठः ।
सुवर्ण-वर्णेन तदीय देहः प्रयाति सम्यक् तुलनां कुमार ।। २०

आजानुबाहुः पृथुलं च वक्षः विशाल-नेत्रो विशदश्चफालः ।
नवेति संख्याकृति कर्ण-शाली किं किं वदेयं मम भाग्य-राशे ।। २१

अयं महा-गौतम-चक्रवर्ती पिता च ते मे हृदयं द्वितीयम् ।
राजा स्वयं प्राणि-हिताय लोके जगाम तप्तुं विपिनं कुमार ।। २२

द्रक्ष्यामि सत्यं जनकं मदीयं महाप्रभुं सर्वजनाभिपूज्यम् ।
प्रभातकाले मम मित्रवर्यैः पित्रा विना जीवितमेव नास्ति ।। २३

प्रभुं विना जीवितमेव नास्ति तथापि मे शैशव-जीवितस्य ।
आवां कथं जीवित-सौख्यभावं भुञ्जेव सान्तं भुवि निर्विशेषम् ।। २४

सायंतने बालक-मण्डलं तु पित्रा व्रजत्येव समस्तलोकम् ।
आवां तु गेहे नितरां लपन्तौ कथं हि तृप्तिं जननि! भजेव ।। २५

सर्वे कुमाराः सततं वदन्ति रथ्यासु ते क्रीडनकैर्हसन्तः ।
पित्रा विसृष्टः खलु राहुलोऽसौ तस्मै प्रदातव्यमिदं च किञ्चित् ।। २६

अम्बे वनं सायममन्दगत्या प्रविश्य यस्मिन् तपते महात्मा ।
तत्रैव मोदेन मयूरवृन्दैः रंस्ये नितान्तं हरिणाङ्गनाभिः ।। २७

अनन्तरावावृत-वन्य-जन्तवः विचित्र-वर्णैः खलु चित्रिताः खगाः ।
मुदा च मे शैशव-जीवितं वने विना भयं यापयितुं समीहते ।। २८

वने सदा हारि विचित्ररूपाः सुखं भृशं स्वादुजलावगाहाः ।
मृगाः तृणं स्वेच्छतया चरन्तः मया समं खेलन-तत्परास्युः ।। २९

उत्प्लुत्य मे संनिधि वर्तिनः स्युः शशाभिया चङ्क्रमणैः सवेगम् ।
करेण नीत्वामल-शान्तभावैः शशाङ्क-रूपेण परं चकासे ।। ३०

विजृम्भिते सिंह-किशोरवक्त्रे क्रमेण दन्तान् विगणय्य सान्तम् ।
हस्ते गृहीत्वा वरकेसरान् तान् आरुह्य तस्मिन् प्रभावामि राजा ।। ३१

उत्सङ्ग-तल्पे चकितं निवेश्य चित्रातिचित्रं हरिणं गृहीत्वा ।
प्रशान्त-भावेन च सौम्यचित्तो मृगाङ्क-रूपेण मुदा विभासे ।। ३२

आस्फाल्य तीक्ष्णांकुश-हस्तघातैः गजेन्द्रकुम्भं रभसाधिरुह्य ।
लताद्रुमं काननमेवसर्वं बिडौज-रूपेण परं समीक्ष्ये ।। ३३

अनेकवर्णाविल-चारुपिच्छं केकारवध्वानित-काननान्तम् ।
अधिष्ठितः चित्रमयूरपीठं कुमारदर्पेण भृशं विराजे । ३४

कूजन्ति कामं कलगीतिकाभिः पुंस्कोकिलाः पञ्चमरागलुब्धाः ।
अहं वने कोकिल-साहचर्यात् गान्धर्व-विद्या-निपुणो भवेयम् ।। ३५

विधाय नूनं विपिने गजेन्द्रं प्रियं सुसंवाहन-योग्यरूपम् ।
आरोप्य तस्मिन् नगरं प्रयास्ये संतप्यमानं जनकं महीपम् ।। ३६

अहं पितुः पादराजःकणैश्च प्रपूत शीर्षो नितरां समीपे ।
तदीय पूजाविधिमाचरिष्यन् संतोषभारेण परं विकासे ।। ३७

अरण्यवासः सततं हि राज्ञां योग्यः परं धर्मपथानुगानाम् ।
तस्मादहं जन्मत एव सिद्धं कार्यं प्रियेणैव समाचरिष्ये ।। ३८

प्रजल्पितः तस्य कुमारकस्य मुखं प्रपेदे उदयार्करागम् ।
आश्लिष्य माता सहसा तनूजं विचुम्बनैः सान्त्वनमाचकार ॥ ३९

वियोगिनी सा बहुभावगर्विणी प्रादर्शि भस्मावृत्-पावकः कणः ।
विधाय पूजादिकमेव वाद्यकैः प्रशान्तभावावृत-वर्तनैः सदा ॥ ४०

विपत्तिकाले सततं धरण्यां जनः सदा शान्तमयेन गत्या ।
स्वजीवितं सौख्यमयं विधत्ते दैवे सुनिक्षिप्तमनाः सहर्षम् ॥ ४१

उषोदये प्रत्यहमेव तन्वी भूपाल-रागैर्मधुरैः सखीनाम् ।
अबोधि सा स्नान-पवित्रदेहा दैवे समायत्त पवित्रभावा ॥ ४२

प्रपूज्य बिल्वैः सततं पिनाकिनं पवित्रगङ्गामल-रोहिणी-जलैः ।
विभूति-भस्मावृत-चारुमण्डना ललास सा शैलसुतेव निश्चला ॥ ४३

सा शङ्करालङ्करणाभिरामैः समर्चयन्ती सित-पुष्पगुच्छैः ।
सुधास्रवद्भिर्मधुगानपूर्णैः रागैर्भवं गायति लग्नचित्ता ॥ ४४

ललाप सोमाऽभरणं सुगात्री समर्पितोमाऽभरणं सुपुष्पम् ।
कर्पुर-नीराजनमेव दत्त्वा परं चकासे व्रतमग्नगौरी ॥ ४५

प्रदक्षिणीकृत्य मृगाङ्क-शेखरं विभूति-पुष्पैर्मधु-बिल्वपत्रकैः ।
प्रस्तौति गीतैः स्वर-वैदिकैर्मतैः वियोगभारा जननी यशोधरा ॥ ४६

अनन्तरं सा प्रविकीर्य पूर्णं बलिं प्रियं तत् बलिभुक्प्रमोदम् ।
क्षणे परब्रह्मणि-लग्नमानसा निरीक्षते स्वीय पतिं च गौतमम् ॥ ४७

प्रदाय दाडीफल-राग-बीजं शुकाय सा पञ्जर-जीविताय ।
गानैश्च तं शिक्षयतीव नित्यं संयापयामास विदीर्ण-चित्ता ॥ ४८

तां शारिकां काञ्चन-पञ्जरस्थां प्रशिक्षयन्ती पति-वाक्य-जालैः ।
तथा क्षणं साधु विजल्पिता सा विकारिता छिन्नविभिन्न-भावैः ॥ ४९

कलारता भव्यरता वियोगिनी विपञ्चिकां मेदुर-निक्वणान्विताम् ।
निधाय सोत्सङ्गतले कलस्वना क्रमेण-रागं मधुरं जगौ प्रियम् ॥ ५०

तां वल्लकीं सा मृदु-बाहुबन्धे निक्षिप्य रागेण समालिलिङ्ग ।
मधुक्वणन्ती प्रिय-नाद-साम्यं भ्रमापरिव्याप्तमना-यशोधरा ॥ ५१

तदीय नामाङ्कित-वर्ण-गीतं पदे पदे सा मधुरं लपन्ती ।
प्रभूत-नेत्राञ्चल-वारिजालैः प्रस्नापयन्तीव बभौ स्ववाणीम् ॥ ५२

तदा तदा सा विषमोद्‌गतेन वर्ण-क्रमेणाखिल-सुस्वरेण ।
प्रेम्णा कथंचिन्त्मृदुलं लपन्ती दुःखातिभारेण विमूर्च्छिता सा ॥ ५३

विमूर्च्छिता तूर्णमसौ प्रवाले प्रसुप्त वीणा प्रतिमां भजन्ती ।
सुखेन मौनेन भृशं शुशोच वीणा समैक्यं प्रतिपद्य तन्वी ॥ ५४

प्रवाल-शय्यागत-देहवल्लरीं ममज्ज तद्‌हृद्‌गत-वल्लकीस्वने ।
सिताम्बर-प्रावरणा सुशोभिनी ललास वाणीव प्रसन्न-मुद्रया ॥ ५५

तदीय गानामृत-दिव्यमन्दिरं ररौ प्रतिध्वानित-रम्यवाचकम् ।
प्रभुः स्वयं यास्यति सत्वरं गृहं सहस्व किंचित् समयं मनस्विनी ॥ ५६

स्वरेण तस्याः किमुशिक्षिता सा विपञ्चिका सुस्वर-मूर्च्छनां किम्।
नोचेत्तया सा पटुशिक्षितेति संजायते संशय एव तत्र ॥ ५७

तदीय देहः कलनिःस्वनस्वनैः समावृता गानतरङ्ग-मारुतैः।
प्रकुर्वते शब्दमनन्त-सुस्वरैः सुगीत-शालेव समस्तवाद्यकैः ॥ ५८

नानाविधैः चित्रविचित्रवर्णैः नानाविधाभिः खलु तूलिकाभिः।
रस्यां क्षितीन्द्राकृतिमेव तन्वी कुडये तदा निर्मितुमाचकाङ्क्षे ॥ ५९

आपादशीर्षं तरुणी विलिख्य रेखासुचित्रं खलु तस्य राज्ञः।
दुःखेन सा तूलिकया वरिष्ठं रूपं च कन्दर्पजितं ददर्श ॥ ६०

अदृष्ट चित्रा सुतरां निनिन्द पदे पदे बाष्पपरीतनेत्रा।
विधिं तदा व्याकुल-मानसा सा हा चित्ररूपेण पतिं न लक्ष्ये ॥ ६१

कुरङ्ग-नेत्रा पतिरूपकामा कुसुम्भगन्धेन विनिर्मितं सा।
तदीय चित्रं हृदये प्रसह्य निक्षिप्य तत् सादरमालिलिङ्ग ॥ ६२

बालः समागत्य विलोक्य चित्रं कोऽयं वदस्वेति बलादपृच्छत्।
पीनोन्नतोरस्थल-कम्बुकण्ठो कर्णान्त-विश्रान्त-विशालनेत्रः ॥ ६३

अयं पिता ते मम नेत्र-चन्द्र! भजस्व नित्यं भव पुण्य-मूर्तिम्।
दिदेश तन्वी तनयं सभक्त्या चित्रे विनिक्षिप्य तदीय दृष्टिम् ॥ ६४

कदा समायास्यति किं वदेयं कथं च यास्यन्ति वियोगिनीनाम्।
अमी प्रभूताः दिवसाः सुरम्याः प्रदोषरागाः बहुमोहनाढ्याः ॥ ६५

कदा कथं वा भजते महीपः शुद्धान्त-भूमिं दरहासवक्त्रः ।
इति प्रिया सा बहुधा नताङ्गी विचिन्तयन्ती गणनां विधत्ते ॥ ६६

यशोधरा सा नितरां प्रपञ्चे बाभातु नारीषु पतिव्रतासु ।
तस्याश्च दुःखेन विदीर्यमाणा सदा च सख्यं प्रकृतिर्विदध्यात् ॥ ६७

जयन्तु लोके समुदीरितास्ताः तस्याः सुगात्र्याः स्फटिकप्रवाहाः ।
यावच्च नद्यो गिरयः सुरूपाः वहन्ति तिष्ठन्ति विनाऽविनाशम् ॥ ६८

दशां तदीयामनुवीक्ष्य भूधरो हिमालयः प्राप जलाशयं तदा ।
तथेति नद्यो बहुधा वहन्त्यमीं रसात्मतां तस्य सुघोषयन्त्यहो ॥ ६९

यशोधराक्रन्दनमामनन्ती धरा परं निर्दलितान्तरङ्गा ।
चकास्ति संदर्शयतीव बाधां विदीर्ण-रूपेण च भूमिकम्पैः ॥ ७०

इति श्रीगीर्वाणान्ध्र-भाषा-प्रवीणेन ओगेटि-परीक्षित्-शर्मणा विरचिते विंशति-सर्गीय-यशोधरा-महाकाव्ये यशोधरा-राहुल-संवादालंकृतः एकोनविंशति-सर्गः समाप्तः ।

विंशतिः सर्गः ।

गौतमबुद्ध-प्रत्यागमनम् ।

न हि क्षणं तिष्ठति कालचक्रं कदापि तस्यास्ति न पक्षपातः ।
अनाथ-दीनेषु च भिक्षुकेषु जनेषु संपच्चय दर्पितेषु ॥ १

समाव्यतीता दिवसाः प्रशान्तं यशोधरा-जीवन-सौख्यहीनाः ।
हठात्स्वयं गौतमबुद्धदेवः संन्यास-वेषे प्रविराजमानः ॥ २

समाययौ प्रेमनिविष्ट-मानसा सुतीक्ष्णदृग्भिः सकलं धरातलम् ।
प्रशासयन् सादर-भावलोकनैः मनोज्ञरूपेण पवित्र-वाङमयैः ॥ ३

जटा-प्रभाभिः परि-दीप्त-शीर्षः विराग-भासावृत-देहकान्तिः ।
उषोदये दीप्त-गभस्ति-बिम्बं यथा तथा लोकममुं प्रपेदे ॥ ४

पुरा च यो गौतमनामधारी शुद्धोदनस्यात्मसमानरूपः ।
मायासुतो ज्ञानमयः प्रदीपो विवेश शान्त्या कपिलाख्य-देशम् ॥ ५

सुतप्तकार्तस्वरवर्णदेहस्तपोमहिम्ना च पवित्रमूर्तिः ।
समागतो भासुर-रश्मि-देहः प्राचीसमुत्पन्नमिवार्कबिम्बम् ॥ ६

हठात् समायान्तममुं जनालिः मेने पतन्तं गगनाच्च ऋक्षम् ।
प्रमोद-विस्फारित-लोचनान्तः परस्परं भाषण-लग्नचित्तः ॥ ७

आसन् तदा चित्र-विचित्र-भावाः जनान्तरङ्ग-स्थल-लास्य-रूपाः ।
चकासिरे पल्लविताङकुरास्ते जलेन बीजाङकुर-साम्यमेत्य ॥ ८

स्वैरं यथा स्वीय-पवित्र-पादैः संचारपूतं वसुधातलं च ।
कुर्वन् विवस्वानिव दीप्त-ऋग्भिः विभासते चारुतरं महात्मा ॥ ९

समागतः पार्श्व-जनानुकीर्णं प्रशान्तगत्या करुणान्तरङ्गः ।
जनास्पदं दिव्य-पद-प्रवाहैः संस्नापयन् गौतम-बुद्ध-देवः ॥ १०

अनेक-शिष्यैः परिवेष्टमानः सत्यं वदेत्याशयरूपितात्मा ।
प्रबोधयन् पावन-वीक्षणैश्च समाययौ रूपित-शान्त-भावः ॥ ११

धर्मं चरेत्यार्द्रवचःप्रपूर्णैः परं स्वधर्मे परिवर्तमानः ।
दिदेश सर्वान् शबरालयस्थान् अनुक्षणं दीपितवाक्यरीतिः ॥ १२

काषायवस्त्रावृत-देह-यष्टिः भिक्षाकपालाञ्चित-पञ्च-शाखः ।
पिनद्ध संध्यारुण-केशपाशो हिरण्यरेता इव देहदीप्तिः ॥ १३

आयान्तमेनं जटिनं प्रसन्नं ज्ञानप्रभादीपित-दिव्यगात्रम् ।
आसन् प्रजाः स्तम्भितभाव-रूपाः विलोक्य संफुल्ल-विशाल-नेत्राः ॥ १४

विरेजुरानन्दसुधा-पयोधौ सुशीतलैर्लोचनवारिजालैः ।
दृष्टिप्रपातैश्च प्रमोदचिह्नैः भावोर्मिकाडोलित-हंसचित्ताः ॥ १५

कोऽयं ? प्रभा-भासित-देश-भागः प्रसन्न-मुद्रावृत-शान्तदृष्टिः ।
नाकात् ततारोयमहोमहेन्द्रः कैलासवासीति जनानुमेयः ॥ १६

हिंसा च लोके खलु धर्मबद्धः तथा कृपाहीन-नरेश्वराणाम् ।
मतं प्रपञ्चे करुणान्तरङ्गाः भूयासुरेवं शतधा यतन्तः ॥ १७

अहिंसयाच्छादितमस्ति लोके सत्यं दया शौच-परीत-चित्तं ।
धर्मश्च जीवेषु दयास्वभावः परं जनानां सुकृतोपयोगः ।। १८

न चास्ति लोके चिरजीवि-वस्तु पुण्येन लोके सुखमाप्नुते हि ।
तस्माच्च ये सौख्यपदाभिषिक्ताः कुर्वन्तु पुण्यं शतधा धरण्याम् ।। १९

सर्वो जनः शान्तिमयेन गत्या स्वजीवितं चारुतरं विदध्यात् ।
नैवास्ति लोके विषमस्थलं हि स्थानं च हिंसामय-जीवितस्य ।। २०

आयान्तमेनं प्रतिभान्वितं ते कांपिल्यदेशीय-विवृद्ध-पौराः ।
अयं विरागी भवतीति नूनं मायासुतो गौतम-भूमिपालः ।। २१

योऽयं पुरा पुत्रकलत्रवर्गं विहाय नक्तं विपिनं जगाम ।
स एव नूनं जटिमार्गगामी शुद्धोदनस्यात्मज एव सत्यम् । २२

यशोधरा-पुष्पित-जीवनस्य वृन्तोपमोयं वसुधाधिपस्तु ।
समाजगामात्तपवित्रदृग्भिः प्रशासितुं लोकममुं स्वसूक्तैः ।। २३

अयं पिता राहुल-पुत्रकस्य परात्मभावामृतपानचक्षुः ।
आयान्तु तं लोचन-चन्द्र-विम्बं विलोकितुं सादरमेव पौराः ।। २४

इति प्रमोदावृत-पङ्कजास्याः प्रजाप्रियं तन्निकटं दुधावुः ।
सर्वाः समायान्तममीः प्रजाश्च संतोषयामासुरहो प्रलापैः ।। २५

आबाल-गोपालममुं व्रजन्तं तं बुद्धदेवं भयभक्ति-नम्राः ।
पौराः प्रियं प्रेरणया स्वपादैः अशक्नुवन्तो मनसा विजग्मुः ।। २६

प्रधाव्य पौराः सहसाह्यवोचन् यशोधरा-राहुल-बन्धुवर्गम् ।
आयातवान् गौतम-चक्रवर्ती परं परिव्राजक-जीवनेन ॥ २७

इतस्ततो धावित-घर्म-देहाः न हि क्षणं तत्र समाविशन् ते ।
अराजिषुः पौर्णिम-चन्द्रहासाः सहर्ष-बाष्पाकुलिताः सुपौराः ॥ २८

निशम्य सा राहुल-पुत्र-माता मानाभिमानावृतचित्तसद्म ।
क्षणं समालोच्य तदीय-पुत्रं जुहाव रोमाञ्चित-घर्म-गात्री ॥ २९

आहूय सा तं प्रिय-राहुलं च विधाय शीर्षं मधुरं विचुम्ब्य ।
ससर्ज संतोषभरेण साश्रु बालस्य शीर्षे बहुलं रुदन्ती ॥ ३०

समागतस्ते जनकः प्रभुर्मे प्रजानुरागं बहु-भाव्यमानः ।
आवां मुदा तस्य पदारविन्दे भवेव तत्त्वामृत-पायिनश्च ॥ ३१

गच्छेव बाल पितरं महान्तं प्रत्युद्गमानन्द-परीत-रूपौ ।
सौधं समानेतुममन्दहर्षं सदा प्रजा-रञ्जन-लग्न-चित्तम् ॥ ३२

अत्रान्तरे केचन पौरवृद्धाः यशोधरा-मन्दिरमाशु गत्वा ।
न्यवेदयन् गौतम-भिक्षु-गाथाम् अगाध-चित्ताः सहसा प्रहृष्टाः ॥ ३३

तदीय-देहः सुषमा-परीतो विलोकिनां लोचन-विभ्रमं तु ।
संजायतेत्यादरभावपूर्णं व्यजिज्ञपन् तस्य महोन्नतिं च ॥ ३४

श्रुत्वा तदुक्तिं सहसा दुधाव शुद्धान्त-नारी-जनमादरेण ।
विकम्पमानः प्रसभं पिता च प्रजावती सार्धमगात् तदानीम् ॥ ३५

शुद्धान्त-नारीजन-बन्धु-वर्गः क्रमेण तं स्वामिनमादरेण ।
प्रणम्य तस्यामृत-वाङ्मयं च निपीय पूतश्चकितं ललास ॥ ३६

मनस्विनी सा तरुणी सुगात्री पदारविन्दे प्रिय-गौतमस्य ।
आनन्द-संभार-सुशीतलाश्रु विस्रंसयामासास पवित्र-भावा ॥ ३७

प्रणम्य बालेन समं वियोगिनी शशाक यातुं न हि भावसज्जिता ।
सर्वैः समाकीर्णममुं विरागिणं समीपमायान्तमहो यशोधरा ॥ ३८

तां भामिनीं राहुल-पुत्रकं च बुद्धोदिदेशाखिल-बौद्ध-धर्मम् ।
सर्वोऽपि भक्त्या विजजाप सूक्तं गच्छामि बुद्धं शरणं महान्तम् ॥ ३९

गच्छामि धर्मं निरतं धरण्यां गच्छामि संघं मनसा च सिद्धयै ।
वदामि सत्यं मम देश-भूत्यै अहिंसया सर्वमताभिमानम् ॥ ४०

इति श्रीगीर्वाणान्ध्र-भाषा-प्रवीणेन ओगेटि-परीक्षित्-शर्मणा विरचिते विंशति-सर्गीये यशोधरा-महाकाव्ये गौतमबुद्ध-प्रत्यागमन-समलंकृतः विंशतितमः सर्गः समाप्तः ।

इति यशोधरा-महाकाव्यं संपूर्णम् ।

शुद्धिपत्रम्

पत्रम्	श्लोकः	अशुद्धम्	शुद्धम्
१३	९८	एतादृशं	एतादृशीं
१३	९८	पवित्रं	पवित्रां
१३	९८	भारताख्यं	भारताख्यां
१४	१०१	तनिम्नया	तनिम्नगा
१४	१०४	सकला ।	सकलाः
२१	३६	जीवनः	जीवनाः
२८	५	बर्हपुष्टाः	बर्हपृष्ठाः
२९	१७	यशोर	यशोधरा
३३	१०	घृणाक्षर	घुणाक्षर
४४	५९	कउद्रिक्त	उद्रिक्त
४७	१	भास्वन्	भास्वान्
५१	४६	संध्यारुण	संध्यारुणश्रीः
५४	१०	भास्तदानीं	भामास्तदानीं
५७	३४	महर्हं	महार्हं
५९	१	र्हंम	महार्हम्
६०	२५	वली	धवली
६५	२३	सौख्यावत	सौख्यावृत
६८	७	सुवण	सुवर्ण
७६	२२	वोढुं	वोढुं न
७७	२८	कुर	कुमार
७७	३४	ऊढव	ऊढ्वा
९४	४४	व	वनं
९५	५४	सूर्ोदये	सूर्योदये

पत्रम्	श्लोकः	अशुद्धम्	शुद्धम्
१०७	२७	कौरव	कैरव
१०७	२९	आभूषिताः	आभूषिता
११०	५	स्तनंधया	स्तनंधय !
११२	२०	यातो	प्रयातो
११३	२८	सैः	हासैः
११९	३१	प्रभावामि	प्रभवामि
१२२	५८	देहः	गेहः
१२२	५८	समावृता	समावृतो
१२२	६०	शीषं	शीर्षं
१२७	३५	प्रजावती सार्धं	प्रजावतीसार्धं

———

Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya ★ Bharatiya Vidya

शारदा-गौरव-ग्रन्थमाला, 'शारदा', पुणे ३०

पुष्पम्		लेखकः	मूल्यम्
१.	डॉ. राजेन्द्रप्रसादचरितम्	वा. आ. लाटकर	३.००
२.	वात्सल्यरसायनम्	डॉ. श्री. भा. वर्णेकर	१.००
४.	श्रीरामकृष्णपरमहंसीयम्	डॉ. श्री. भा. वर्णेकर	१.२५
५.	बालकानां जवाहरः	पं. विघ्नहरि भा. देव	१.००
६.	श्रीमान् विन्स्टनः चर्चिलः	पं. वा. ना. औदुम्बरकरशास्त्री	१.००
७.	अप्पाशास्त्री : साहित्यसमीक्षा	प्रा. अशोक अकलूजकर	२.००
८.	श्रीशिवराज्योदयम् (साहित्य अकादमी पारितोषिकम् १९७५)	डॉ. श्री. भा. वर्णेकर	४०.००
९.	'समानमस्तु वो मनः'	डॉ. ग. बा. पळसुले	३.००
१०.	मराठी-संस्कृत-शब्दकोषः	जोशी-परांजपे-गाडगीळ	२५.००
११.	भूपो भिषक्त्वं गतः	पं. ग. पां. लोण्ढेशास्त्री	१.००
१२.	विनायक-वीर-गाथा	डॉ. ग. बा. पळसुले	३.००
१३.	आङ्ग्ल-लघु-काव्यानुवादमाला	पं. ल. ज. खरे	२.००
१४.	श्रीराजयोगभाष्यम्	डॉ. चिं. त्र्यं. केङ्घे	५.०५
१५.	मुक्तक-मञ्जूषा	पं. दि. दा. बहुलीकर	२.००
१६.	ललित-गीता-लहरी	पं. ओगेटि परीक्षित्शर्मा	१.००
१९.	संस्कृत-प्रगति-पथे कः तिष्ठति ?	पं. ल. म. चक्रदेव	२.००
२०.	शाङ्कर-दिग्विजयः	श्रीविद्यारण्यः	८.००
२१.	शिष्यलेखः (चन्द्रगोमिपादः)	डॉ. प. ल. वैद्य	५.००
२२.	महात्म-चरितम्	पं. प. ना. पाठक	२.००
२३.	स्तोत्र-पञ्चदशी	पं. म. स. आपटीकर	१.००
२४.	धन्येयं गायनी कला	डॉ. ग. बा. पळसुले	१.००
२५.	विवेकानन्द-चरितम्	डॉ. ग. बा. पळसुले	१८.००
२६.	शारदा-प्रसादः	पं. दत्तात्रेयशास्त्री दाणी	२.००
२७.	अरविन्दचरितम्	पं. यज्ञेश्वरशास्त्री	३.००

* *

(महाराष्ट्र-शासन-दत्त-युक्त-मूल्य-कागंजे मुद्रणम् १६५०)

* *

२८. धन्योऽहं धन्योऽहम्	डॉ. ग. बा. पळसुले	५.००
२९. खेटग्रामस्य चक्रोद्भवः	डॉ. ग. बा. पळसुले	१.००
३०. अप्पाशास्त्रि-चरितम्	पं. वा. ना. औदुम्बरकर	४०.००

---

३१. शिवराजाभिषेकम्	डॉ. श्री. भा. वर्णेकरः	१०.००

(महाराष्ट्रशासनस्य पुरस्कारेण प्रकाशितम्)

---

३२. श्रीगणपति-वाक्यार्थ-महासभा	पं. वसन्त अनन्त गाडगीळ	५.००
३३. अमरनाथकथा	ना. रा. बोडस	५.००
३४. आचार्यचरितम्	पं. कुंभघोणं नारायणशास्त्री	२.००
३५. श्रीगणपतिवाक्यार्थमहासभा	पं. वसन्त अ. गाडगीळ	५.००
३६. श्रीविष्णु-सहस्र-नाम-स्तोत्रम्	पं. भीमाशंकर त्र्यम्बक केण्ढे	२५.००
३७. यशोधरा-महाकाव्यम्	पं. ओगेटि परीक्षित्‌शर्मा	१५.००
३८. श्रीविष्णुसहस्रनामावलिः।	पं. वसन्त अ. गाडगीळ	२.००
३९. मनोबोधः।	श्रीरामदासानुदासः	१.२५
४०. उपनिषन्मधु	मनोहर दिवाण	५.००
४१. संशयरत्नमाला	प्रा. नलिनी पराडकर	१.५०
४२. स्तोत्राष्टकम्	विद्वान् बालगणपतिभट्टः	१.५०
४३. गणयञ्छागः	प्रा. कमलारत्नम्	१.००
४४. स्तोत्ररत्नमाला	प्रा. ह. त्र्यं. देसाई	१.५०
४५. श्रीशरन्नवरात्रचम्पूः	को. कृष्ण जोय्सर्	५.००
४६. भारतीय-राजनीति-प्रकाशः	पण्डितराज राजेश्वरशास्त्री द्रवीड	१५.००

प्राप्तिस्थानम् – 'शारदा'-कार्यालयः, पुण्यपत्तनम् 411 030

Bhawan's Sri Sankaracharya Sanskrit Vidya Mahavidyalaya
556

पं. ओगेटि परीक्षित्शर्मा

* जन्म १० ऑगस्ट १९३०
* तेलुगु-संस्कृत-भाषाद्वय-क्षेत्रे प्रथितयशः कविः नाटककारश्च ।
* संस्कृत-तेलुगु-हिन्दी-नाटकेषु प्रशंसनीयः अभिनयः ।
* मुम्बई-नभोवाणी-केन्द्रेण तथा मुम्बई-नगरीस्थैः महाविद्यालयैः संयोजितेषु काव्य-गान-समारोहेषु गीतानि स्वीय-गीतानि ।
* साहित्ये, संगीते, नृत्ये च प्रभूता अभिरुचिः ।
* प्रकाशितं संस्कृत-काव्य ग्रन्थरत्न-द्वयम् —
    १) ललित-गीता-लहरी (गेय-गीत-संग्रहः)
    २) यशोधरा (महाकाव्यम्)
* प्रकाशनोन्मुखं साहित्यम्
    १) परीक्षिन्नाटकचक्रम् (पञ्च एकाङ्किकाः)
    २) प्रताप-राणायनम् (महाकाव्यम्)
    ३) श्रीविश्वनाथ-कविता (तेलुगु)
    ४) PEN-FLOWERS (English-Poetry)
* भाषाप्रवीणः (तेलुगु-संस्कृतयोः) आन्ध्र-विश्वविद्यालयः
  बी. ए. (इङ्ग्लिश-साहित्ये) B.H.U.
  एम्. ए. (संस्कृत-अर्धमागधी) मुम्बई-विश्वविद्यालयः
  एम्. ए. (भाषाशास्त्र-इङ्ग्लिश) मुम्बई-विश्वविद्यालयः
* भाषाधिकारी (तेलुगु) भाषा-संचालनालयः
  विभागीय-कार्यालयः न्यू सेण्ट्रल बिल्डिङ्ग (द्वितीय-भूमिका)
  पुण्यपत्तनम् (महाराष्ट्र - भारत) ४११००१